अहियगहणं च तेसिं अणुग्गहट्ठं अणुण्णायं || ५६ ||

आणासुद्धो भावो देइ बहुं णिज्जरं ण गहणं वि ।
असणागहणे वि तओ फलसिद्धी छंदगस्स हवे || ५७ ||

जइ वि हु ण दाणगहणप्पभवं सुकडाणुमोअणं तत्थ ।
तह वि तयं विहिपालणसमुब्भवं होइ णियमेणं || ५८ ||

णाणादुवग्गहस्सासंसाए छंदगो कुणउ किच्चं ।
ण य पत्थिंतो तत्तो पच्चुवयारं च कित्तिं च || ५९ ||

कारेउ अ इअरो वि हु एत्तो एयस्स होउ लाभो त्ति ।
नो पुण अलस्सत्तणओ पच्चुवयारं च दाइंतो ॥ ६० ॥

एवं एयगुणाणं कहिया गंभीरधीरया दोण्हं ।
छंदणसामायारी एएहिं परिजिआ होइ ॥ ६१ ॥

गुरुपुच्छाइ मुणीणं अग्गहियसंपत्थणा णिमंतणया ।
सज्झायाइरयस्स वि कज्जुज्जुत्तस्स सा होइ ॥ ६२ ॥

इच्छाऽविच्छेदेणं कज्जुज्जोगो अ हंदि पइसमयं ।
परिणयजिणवयणाणं एसो अ महाणुभावाणं ॥ ६३ ॥

माणुस्सं संसारे मरुम्मि कप्पद्दुमो व्व अइदुलहं ।
एयं लद्धूण सया अप्पमत्तेणेव होयव्वं ॥ ६४ ॥

छुहिअस्स जहा खणमवि विच्छिज्जइ णेव भोअणे इच्छा ।
एवं मोक्खट्ठीणं छिज्जइ इच्छा ण कज्जम्मि ॥ ६५ ॥

सिद्धे मुणीण कज्जे तम्मि वि इच्छोचिया असिद्धम्मि ।
उक्किट्ठे तेणेव य समत्थियं किर णमुत्थु त्ति ॥ ६६ ॥

इच्छाविच्छेओ विय ण तारिसो जोग्गयं विणा भद्दो ।
भद्दा कहिं णु इच्छा उज्जू वंको य दो मग्गा ॥ ६७ ॥

तम्हा गुरुपुच्छाए इहमहिगयजोग्गओ कुणउ ।
किच्चं अकए किच्चे वि फलं तीए इहरा फलाभावो ॥ ६८ ॥

तयहीणकज्जगहणे वयणं उवसंपया उवगमस्स ।
सा पुण तिविहा भणिया नाणे दंसण चरित्ते य ॥ ६९ ॥

वत्तणसंधणगहणे नाणे सुत्तत्थतदुभयं पप्प ।
एमेव दंसणम्मि वि वत्तणमिहयं थिरीकरणं ॥ ७० ॥

घडणं च संधणा किर तस्स पएसंतरम्मि णट्ठस्स ।
गहणं अपुव्वधरणं इहयं चउरो इमे भंगा ॥ ७१ ॥

संदिट्ठो संदिट्ठस्सेवमसंदिट्ठयस्स संदिट्ठो ।
संदिट्ठस्स य इयरो इयरो इयरस्स णायव्वो ॥ ७२ ॥

पढमो एत्थ विसुद्धो बितियपदेणं तु हंदि इयरे वि ।
अव्वोच्छित्तिणिमित्तं जेणं ते वि य अणुण्णाया ॥ ७३ ॥

कारणजायं पप्प य नाणिट्ठफला तया अणापुच्छा ।
एत्थ य णेगमणओ परोप्परं तारतम्मं वि ॥ ७४ ॥

इहयं अत्थग्गहणे एस विही जिणवरेहिं पण्णत्तो ।
पुव्विं उचिए ठाणे पमज्जणा होइ कायव्वा ॥ ७५ ॥

दोन्नि निसिज्जाउ तओ कायव्वाओ गुरूण अक्खाणं ।
अकयसमोसरणस्स उ वक्खाणुचिय त्ति उस्सग्गो ॥ ७६ ॥

खेले य काइयाए जोग्गाइं मत्तयाइं दो होंति ।
तयवत्थेण वि अत्थो दायव्वो एस भावत्थो ॥ ७७ ॥

तावइया वि य सत्ती इहरा नूणं निगूहिया होइ ।
सत्तिं च णिगूहंतो चरणबिसोहिं कहं पावे ॥ ७८ ॥

अणुओगदायगस्स उ काले कज्जंतरेण णो लाहो ।
कप्पडववहारेणं को लाहो रयणजीवीस्स ॥ ७९ ॥

वंदंति तओ सव्वे वक्खाणं किर सुणंति जावइया ।
तत्तो काउस्सग्गं करेंति सव्वे अविग्घट्ठा ॥ ८० ॥

जइ वि हु मंगलभूयं सव्वं सत्थं तहा वि सामण्णं ।
एयम्मि उ विग्घखओ मंगलबुद्धी इइ एसो ॥ ८१ ॥

वंदिय तत्तो वि गुरुं णच्चासणे य णाइदूरे अ ।
ठाणे ठिया सुसीसा विहिणा वयणं पडिच्छंति ॥ ८२ ॥

वक्खाणम्मि समत्ते काइयजोगे कयम्मि वंदंति ।
अणुभासगमन्ने पुण वयंति गुरुवंदणावसरे ॥ ८३ ॥

नणु जेट्ठे वंदणयं इहयं जइ सोऽहिगिच्च पज्जायं।
वक्खाणलद्धिविगले तो तम्मि णिरत्थयं णु तयं ॥ ८४ ॥

पज्जाएणं वि लहुओ वक्खाणगुणं पडुच्च जइ जेट्ठो।
आसायणा इमस्स वि वंदावंतस्स रायणियं ॥ ८५ ॥

भन्नइ इहयं जेट्ठो वक्खाणगुणं पडुच्च णायव्वो।
सो वि य रायणिओ खलु तेण गुणेणं ति णो दोसो ॥ ८६ ॥

जाणंतस्स हि अगुणं अप्पाणं सगुणभावविक्खायं।
वंदावंतस्स परं दोसो मायाइभावेणं ॥ ८७ ॥

एत्तो अववाएणं पागडपडिसेविणो वि सुत्तत्थं।
वंदणयमणुण्णायं दोसाणुववूहणाजोगा ॥ ८८ ॥

निच्छयणएण इहयं पज्जाओ वा वओ वा ण पमाणं।
ववहारस्स पमाणं उभयणयमयं च घेत्तव्वं ॥ ८९ ॥

एएण नाणगुणओ लहुओ जइ वंदणारिहो नूणं।
होइ गिहत्थो वि तहा गुणंतरेणं ति णिद्दलियं ॥ ९० ॥

जेणेवं ववहारो विराहिओ होइ सो वि बलिअयरो।
ववहारो वि हु बलवं इच्चाइअवयणसिद्धमिणं ॥ ९१ ॥

उभयगहणा य णियणियठाणे कहियस्स सेवणं सेयं।
तेण ण कत्थइ कस्स वि दोसोऽगहणे वि णायव्वो ॥ ९२ ॥

चरणोवसंपया पुण वेयावच्चे य होइ खमणे य।
सीयणमाइवसेणं गमणं पुण अण्णगच्छम्मि ॥ ९३ ॥

आगंतुगो य पुराणओ अ जइ दो वि आवकहियाओ।
तो तेसु लद्धिमंतो ठप्पो इयरो अ दायव्वो ॥ ९४ ॥

अह दो वि लद्धिमंता दिज्जइ आगंतुओ च्चिय तया णं।
तयणिच्छाए इयरो तयणिच्छाए अ तच्चाओ ॥ ९५ ॥

इयरेसु वि भंगेसुं एव विवेगो तहेव खमणे वि ।
अविगिट्ठविगिट्ठम्मि य गणिणा गच्छस्स पुच्छाए ॥ ९६ ॥

खणमवि मुणीण कप्पइ णेव अदिन्नोग्गहस्स परिभोगो ।
इयराऽजोगे गेज्झो अवग्गहो देवयाए वि ॥ ९७ ॥

एवं सामायारी कहिया दसहा समासओ एसा ।
जिणआणाजुत्ताणं गुरुपरतंताण साहूणं ॥ ९८ ॥

अज्झप्पज्झाणरयस्सेसा परमत्थसाहणं होइ ।
मग्गम्मि चेव गमणं एयगुणस्सणुवओगे वि ॥ ९९ ॥

किं बहुणा इह जह जह रागद्दोसा लहुं विलिज्जंति ।
तह तह पयट्टिअव्वं एसा आणा जिणिंदाणं ॥ १०० ॥

इय संथुओ महायस जगबंधव वीर देसु मह बोहिं ।
तुह थोत्तेण धुव च्चिय जायइ ज़सविजयसंपत्ती ॥ १०१ ॥

## ॥ आराधकविराधकचतुर्भङ्गी ॥

श्रुतशीलव्यपेक्षायामाराधकविराधकौ ।
प्रत्येकसमुदायाभ्यां चतुर्भङ्गीं श्रितौ श्रुतौ ॥ १ ॥

द्रव्याज्ञाराधनादत्र देशाराधक इष्यते ।
सामाचारी तु साधूनां तन्त्रमत्र न केवलम् ॥ २ ॥

भग्नव्रतक्रियानात्तक्रियौ देशविराधकौ ।
क्रियाप्राधान्यमाश्रित्य ज्ञायेते परिभाषितौ ॥ ३ ॥

श्रुतशीलसमावेशात्सर्वाराधक इष्यते ।
संमील्य न पृथक् सिद्धं देशाराधकताद्वयम् ॥ ४ ॥

अप्राप्तिः प्राप्तभङ्गो वा द्वयोर्यत्र नियोगतः ।
अस्पर्शान्मोक्षहेतूनां स तु सर्वविराधकः ॥ ५ ॥

# ॥ अध्यात्मसारः ॥

## अध्यात्मशास्त्रमाहात्म्याधिकारः ॥ १ ॥

ऐन्द्रश्रेणिनतः श्रीमान्नन्दतान्नाभिनन्दनः ।
उद्दधार युगादौ यो जगदज्ञानपङ्कतः ॥ १ ॥

श्रीशान्तिस्तान्तिभिद्भूयाद्भविनां मृगलाञ्छनः ।
गावः कुवलयोल्लासं कुर्वते यस्य निर्मलाः ॥ २ ॥

श्रीशैवेयं जिनं स्तौमि भुवनं यशसेव यः ।
मारुतेन मुखोत्थेन पाञ्चजन्यमपूपुरत् ॥ ३ ॥

जीयात् फणिफणप्रान्तसंक्रान्ततनुरेकदा ।
उद्धर्तुमिव विश्वानि श्रीपार्श्वो बहुरूपभाक् ॥ ४ ॥

जगदानन्दनः स्वामी जयति ज्ञातनन्दनः ।
उपजीवन्ति यद्वाचमद्यापि विबुधाः सुधाम् ॥ ५ ॥

एतानन्यानपि जिनान्नमस्कृत्य गुरूनपि ।
अध्यात्मसारमधुना प्रकटीकर्तुमुत्सहे ॥ ६ ॥

शास्त्रात्परिचितां सम्यक्संप्रदायाच्च धीमताम् ।
इहानुभवयोगाच्च प्रक्रियां कामपि ब्रुवे ॥ ७ ॥

योगिनां प्रीतये पद्यमध्यात्मरसपेशलम् ।
भोगिनां भामिनीगीतं संगीतकमयं यथा ॥ ८ ॥

कान्ताधरसुधास्वादाद्यूनां यज्जायते सुखम् ।
बिन्दुः पार्श्वे तदध्यात्मशास्त्रास्वादसुखोदधेः ॥ ९ ॥

अध्यात्मशास्त्रसंभूतसंतोषसुखशालिनः ।
गणयन्ति न राजानं न श्रीदं नापि वासवम् ॥ १० ॥

यः किलाशिक्षिताध्यात्मशास्त्रः पाण्डित्यमिच्छति ।
उत्क्षिपत्यङ्गुलीं पङ्गुः स स्वर्द्रुफललिप्सया ॥ ११ ॥

दम्भपर्वतदम्भोलिः सौहार्दाम्बुधिचन्द्रमाः ।
अध्यात्मशास्त्रमुत्तालमोहजालवनानलः ॥ १२ ॥

अध्वा धर्म्मस्य सुस्थः स्यात्पापचौरः पलायते ।
अध्यात्मशास्त्रसौराज्ये न स्यात्कश्चिदुपप्लवः ॥ १३ ॥

येषामध्यात्मशास्त्रार्थतत्त्वं परिणतं हृदि ।
कषायविषयावेशक्लेशस्तेषां न कर्हिचित् ॥ १४ ॥

निर्दयः कामचण्डालः पण्डितानपि पीडयेत् ।
यदि नाध्यात्मशास्त्रार्थबोधयोधकृपा भवेत् ॥ १५ ॥

विषवल्लिसमां तृष्णां वर्धमानां मनोवने ।
अध्यात्मशास्त्रदात्रेण छिन्दन्ति परमर्षयः ॥ १६ ॥

वने वेश्म धनं दौस्थ्ये तेजो ध्वान्ते जलं मरौ ।
दुरापमाप्यते धन्यैः कलावध्यात्मवाङ्मयम् ॥ १७ ॥

वेदान्यशास्त्रवित् क्लेशं रसमध्यात्मशास्त्रवित् ।
भाग्यभृद्भोगमाप्नोति वहते चन्दनं खरः ॥ १८ ॥

भुजास्फालनहस्तास्यविकाराभिनयाः परे ।
अध्यात्मशास्त्रविज्ञास्तु वदन्त्यविकृतेक्षणाः ॥ १९ ॥

अध्यात्मशास्त्रहेमाद्रिमथितादागमोदधेः ।
भूयांसि गुणरत्नानि प्राप्यन्ते विबुधैर्न किम् ॥ २० ॥

रसो भोगावधिः कामे सद्भक्ष्ये भोजनावधिः ।
अध्यात्मशास्त्रसेवायां रसो निरवधिः पुनः ॥ २१ ॥

कुतर्कग्रन्थसर्वस्वगर्वज्वरविकारिणी ।
एति दृङ्निर्म्मलीभावमध्यात्मग्रन्थभेषजात् ॥ २२ ॥

धनिनां पुत्रदारादि यथा संसारवृद्धये ।
तथा पाण्डित्यदृप्तानां शास्त्रमध्यात्मवर्जितम् ॥ २३ ॥

अध्येतव्यं तदध्यात्मशास्त्रं भाव्यं पुनः पुनः ।
अनुष्ठेयस्तदर्थश्च देयो योग्यस्य कस्यचित् ॥ २४ ॥

## अध्यात्मस्वरूपाधिकारः ॥ २ ॥

भगवन् किं तदध्यात्मं यदित्थमुपवर्ण्यते ।
शृणु वत्स यथाशास्त्रं वर्णयामि पुरस्तव ॥ १ ॥

गतमोहाधिकाराणामात्मानमधिकृत्य या ।
प्रवर्तते क्रिया शुद्धा तदध्यात्मं जगुर्जिनाः ॥ २ ॥

सामायिकं यथा सर्वचारित्रेष्वनुवृत्तिमत् ।
अध्यात्मं सर्वयोगेषु तथानुगतमिष्यते ॥ ३ ॥

अपुनर्बन्धकाद्यावद्गुणस्थानं चतुर्दशम् ।
क्रमशुद्धिमती तावत् क्रियाध्यात्ममयी मता ॥ ४ ॥

आहारोपधिपूजर्द्धिगौरवप्रतिबन्धतः ।
भवाभिनन्दी यां कुर्यात् क्रियां साध्यात्मवैरिणी ॥ ५ ॥

क्षुद्रो लाभरतिर्दीनो मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसंगतः ॥ ६ ॥

शान्तो दान्तः सदा गुप्तो मोक्षार्थी विश्ववत्सलः ।
निर्दम्भां यां क्रियां कुर्यात् साध्यात्मगुणवृद्धये ॥ ७ ॥

अत एव जनः पृच्छोत्पन्नसंज्ञः पिपृच्छिषुः ।
साधुपार्श्वं जिगमिषुर्धर्म्मं पृच्छन् क्रियास्थितः ॥ ८ ॥

प्रतिपित्सुः सृजन् पूर्वं प्रतिपन्नश्च दर्शनम् ।
श्राद्धो यतिश्च त्रिविधोऽनन्तांशक्षपकस्तथा ॥ ९ ॥

दृङ्मोहक्षपको मोहशमकः शान्तमोहकः ।
क्षपकः क्षीणमोहश्च जिनोऽयोगी च केवली ॥ १० ॥

यथाक्रमममी प्रोक्ता असंख्यगुणनिर्जराः ।
यतितव्यमतोध्यात्मवृद्धये कलयापि हि ॥ ११ ॥

ज्ञानं शुद्धं क्रिया शुद्धेत्यंशौ द्वाविह संगतौ ।
चक्रे महारथस्येव पक्षाविव पतत्रिणः ॥ १२ ॥

तत्पञ्चमगुणस्थानादारभ्यैवैतदिच्छति ।
निश्चयो व्यवहारस्तु पूर्वमप्युपचारतः ॥ १३ ॥

चतुर्थेपि गुणस्थाने शुश्रूषाद्या क्रियोचिता ।
अप्राप्तस्वर्णभूषाणां रजताभूषणं यथा ॥ १४ ॥

अपुनर्बन्धकस्यापि या क्रिया शमसंयुता ।
चित्रा दर्शनभेदेन धर्म्मविघ्नक्षयाय सा ॥ १५ ॥

अशुद्धापि हि शुद्धायाः क्रिया हेतुः सदाशयात् ।
ताम्रं रसानुवेधेन स्वर्णत्वमधिगच्छति ॥ १६ ॥

अतो मार्गप्रवेशाय व्रतं मिथ्यादृशामपि ।
द्रव्यसम्यक्त्वमारोप्य ददते धीरबुद्धयः ॥ १७ ॥

यो बुद्ध्वा भवनैर्गुण्यं धीरः स्याद् व्रतपालने ।
स योग्यो भावभेदस्तु दुर्लक्ष्यो नोपयुज्यते ॥ १८ ॥

नो चेद्भावपरिज्ञानात्सिद्ध्यसिद्धिपराहतेः ।
दीक्षाऽदानेन भव्यानां मार्गोच्छेदः प्रसज्यते ॥ १९ ॥

अशुद्धानादरेऽभ्यासायोगान्नो दर्शनाद्यपि ।
सिध्येन्निसर्गजं मुक्त्वा तदप्याभ्यासिकं यतः ॥ २० ॥

शुद्धमार्गानुरागेणाशठानां या तु शुद्धता ।
गुणवत्परतन्त्राणां सा न क्वापि विहन्यते ॥ २१ ॥

विषयात्मानुबन्धैर्हि त्रिधा शुद्धं यथोत्तरम् ।
ब्रुवते कर्म्म तत्राद्यं मुक्त्यर्थं पतनाद्यपि ॥ २२ ॥

अज्ञानिनां द्वितीयं तु लोकदृष्ट्या यमादिकम् ।
तृतीयं शान्तवृत्त्या तत्तत्त्वसंवेदनानुगम् ॥ २३ ॥

आद्यान्नाज्ञानबाहुल्यान्मोक्षबाधकबाधनम् ।
सद्भावाशयलेशेनोचितं जन्म परे जगुः ॥ २४ ॥

द्वितीयाद्दोषहानिःस्यात्काचिन्मण्डूकचूर्णवत् ।
आत्यन्तिकी तृतीयात्तु गुरुलाघवचिन्तया ॥ २५ ॥

अपि स्वरूपतः शुद्धा क्रिया तस्माद्विशुद्धिकृत् ।
मौनीन्द्रव्यवहारेण मार्गबीजं दृढादरात् ॥ २६ ॥

गुर्वाज्ञापारतन्त्र्येण द्रव्यदीक्षाग्रहादपि ।
वीर्योल्लासक्रमात्प्राप्ता बहवः परमं पदम् ॥ २७ ॥

अध्यात्माभ्यासकालेऽपि क्रिया काप्येवमस्ति हि ।
शुभौघसंज्ञानुगतं ज्ञानमप्यस्ति किञ्चन ॥ २८ ॥

अतो ज्ञानक्रियारूपमध्यात्मं व्यवतिष्ठते ।
एतत्प्रवर्द्धमानं स्यान्निर्दम्भाचारशालिनाम् ॥ २९ ॥

## दम्भत्यागाधिकारः ॥ ३ ॥

दम्भो मुक्तिलतावह्निर्दम्भो राहुः क्रियाविधौ ।
दौर्भाग्यकारणं दम्भो दम्भोऽध्यात्मसुखार्गला ॥ १ ॥

दम्भो ज्ञानाद्रिदम्भोलिर्दम्भः कामानले हविः ।
व्यसनानां सुहृद्दम्भो दम्भश्चौरो व्रतश्रियः ॥ २ ॥

दम्भेन व्रतमास्थाय यो वाञ्छति परं पदम् ।
लोहनावं समारुह्य सोऽब्धेः पारं यियासति ॥ ३ ॥

किं व्रतेन तपोभिर्वा दम्भश्चेन्न निराकृतः ।
किमादर्शेन किं दीपैर्यद्यान्ध्यं न दृशोर्गतम् ॥ ४ ॥

केशलोचधराशय्याभिक्षाब्रह्मव्रतादिकम् ।
दम्भेन दुष्यते सर्वं त्रासेनेव महामणिः ॥ ५ ॥

सुत्यजं रसलाम्पट्यं सुत्यजं देहभूषणम् ।
सुत्यजाः कामभोगाश्च दुस्त्यजं दम्भसेवनम् ॥ ६ ॥

स्वदोषनिह्नवो लोकपूजा स्याद् गौरवं तथा ।
इयतैव कदर्थ्यन्ते दम्भेन बत बालिशाः ॥ ७ ॥

असतीनां यथा शीलमशीलस्यैव वृद्धये ।
दम्भेनाव्रतवृद्ध्यर्थं व्रतं वेषभृतां तथा ॥ ८ ॥

जानाना अपि दम्भस्य स्फुरितं बालिशा जनाः ।
तत्रैव धृतविश्वासाः प्रस्खलन्ति पदे पदे ॥ ९ ॥

अहो मोहस्य माहात्म्यं दीक्षां भागवतीमपि ।
दम्भेन यद्विलुम्पन्ति कज्जलेनेव रूपकम् ॥ १० ॥

अब्जे हिमं तनौ रोगो वने वह्निर्दिने निशा ।
ग्रन्थे मौर्ख्यं कलिः सौख्ये धर्म्मे दम्भ उपप्लवः ॥ ११ ॥

अत एव न यो धर्तुं मूलोत्तरगुणानलम् ।
युक्ता सुश्राद्धता तस्य न तु दम्भेन जीवनम् ॥ १२ ॥

परिहर्तुं न यो लिङ्गमप्यलं दृढरागवान् ।
संविज्ञपाक्षिकः स स्यान्निर्दम्भः साधुसेवकः ॥ १३ ॥

निर्दम्भस्यावसन्नस्याप्यस्य शुद्धार्थभाषिणः ।
निर्जरां यतनां दत्ते स्वल्पापि गुणरागिणः ॥ १४ ॥

व्रतभारासहत्वं ये विदन्तोप्यात्मनः स्फुटम् ।
दम्भाद्यतित्वमाख्यान्ति तेषां नामापि पाप्मने ॥ १५ ॥

कुर्वते ये न यतनां सम्यक्कालोचितामपि ।
तैरहो यतिनाम्नैव दाम्भिकैर्वञ्च्यते जगत् ॥ १६ ॥

धर्मीतिख्यातिलाभेन प्रच्छादितनिजाश्रवः ।
तृणाय मन्यते विश्वं हीनोऽपि धृतकैतवः ॥ १७ ॥

आत्मोत्कर्षात्ततो दम्भी परेषां चापवादतः ।
बध्नाति कठिनं कर्म्म बाधकं योगजन्मनः ॥ १८ ॥

आत्मार्थिना ततस्त्याज्यो दम्भोऽनर्थनिबन्धनम् ।
शुद्धिः स्यादृजुभूतस्येत्यागमे प्रतिपादितम् ॥ १९ ॥

जिनैर्नानुमतं किंचिन्निषिद्धं वा न सर्वथा ।
कार्ये भाव्यमदम्भेनेत्येषाज्ञा पारमेश्वरी ॥ २० ॥

अध्यात्मरतचित्तानां दम्भः स्वल्पोऽपि नोचितः ।
छिद्रलेशोऽपि पोतस्य सिन्धुं लङ्घयतामिव ॥ २१ ॥

दम्भलेशोपि मल्ल्यादेः स्त्रीत्वानर्थनिबन्धनम् ।
अतस्तत्परिहाराय यतितव्यं महात्मना ॥ २२ ॥

## भवस्वरूपचिन्ताधिकारः ॥ ४ ॥

तदेवं निर्दम्भाचरणपटुना चेतसि भव-
स्वरूपं संचिन्त्यं क्षणमपि समाधाय सुधिया ।
इयं चिन्ताऽध्यात्मप्रसरसरसीनीरलहरी
सतां वैराग्यास्थाप्रियपवनपीना सुखकृते ॥ १ ॥

इतः कामौर्वाग्निर्ज्वलति परितो दुःसह इतः
पतन्ति ग्रावाणो विषयगिरिकूटाद्विघटिताः ।

इतः क्रोधावर्तो विकृतितटिनीसंगमकृतः
समुद्रे संसारे तदिह न भयं कस्य भवति ॥ २ ॥

प्रियाज्वाला यत्रोद्वमति रतिसंतापतरला
कटाक्षान् धूमौघान् कुवलयदलश्यामलरुचीन् ।
अथाङ्गान्यङ्गाराः कृतबहुविकाराश्च विषया
दहन्त्यस्मिन्वह्नौ भववपुषि शर्म क्व सुलभम् ॥ ३ ॥

गले दत्वा पाशं तनयवनितास्नेहघटितं
निपीड्यन्ते यत्र प्रकृतिकृपणाः प्राणिपशवः ।
नितान्तं दुःखार्त्ता विषमविषयैर्घातकभटै-
र्भवःसूनास्थानं तदहह महासाध्वसकरम् ॥ ४ ॥

अविद्यायां रात्रौ चरति वहते मूर्ध्नि विषमं
कषायव्यालौघं क्षिपति विषयास्थीनि च गले ।
महादोषान् दन्तान् प्रकटयति वक्रस्मरमुखो
न विश्वासार्होऽयं भवति भवनक्तंचर इति ॥ ५ ॥

जना लब्ध्वा धर्म्मद्रविणलवभिक्षां कथमपि
प्रयान्तो वामाक्षीस्तनविषमदुर्गस्थितिकृता ।
विलुट्यन्ते यस्यां कुसुमशरभिल्लेन बलिना
भवाटव्यां नास्यामुचितमसहायस्य गमनम् ॥ ६ ॥

धनं मे गेहं मे मम सुतकलत्रादिकमतो
विपर्यासादासादितविततदुःखा अपि मुहुः ।
जना यस्मिन् मिथ्यासुखमदभृतः कूटघटना
मयोऽयं संसारस्तदिह न विवेकी प्रसजति ॥ ७ ॥

प्रियास्नेहो यस्मिन्निगडसदृशो यामिकभटो-
पमः स्वीयो वर्गो धनमभिनवं बन्धनमिव ।

मदामेध्यापूर्णं व्यसनबिलसंसर्गविषमं
भवः कारागेहं तदिह न रतिः क्वापि विदुषाम् ॥ ८ ॥

महाक्रोधो गृध्रोऽनुपरतिशृगाली च चपला
स्मरोलूको यत्र प्रकटकटुशब्दः प्रचरति ।
प्रदीप्तः शोकाग्निस्ततमपयशोभस्म परितः
स्मशानं संसारस्तदभिरमणीयत्वमिह किम् ॥ ९ ॥

धनाशा यच्छायाप्यतिविषममूर्छाप्रणयिनी
विलासो नारीणां गुरुविकृतये यत्सुमरसः ।
फलास्वादो यस्य प्रखरनरकव्याधिनिवह-
स्तदास्था नो युक्ता भवविषतरावत्र सुधियाम् ॥ १० ॥

क्वचित् प्राज्यं राज्यं क्वचन धनलेशोप्यसुलभः
क्वचिज्जातिस्फातिः क्वचिदपि च नीचत्वकुयशः ।
क्वचिल्लावण्यश्रीरतिशयवती क्वापि न वपुः
सुरूपं वैषम्यं रतिकरमिदं कस्य नु भवे ॥ ११ ॥

इहोद्दामः कामः खनति परिपन्थी गुणमही-
मविश्रामः पार्श्वस्थितकुपरिणामस्य कलहः ।
बिलान्यन्तःक्रामन्मदफणभृतां पामरमतं
वदामः किं नाम प्रकटभवधामस्थितिसुखम् ॥ १२ ॥

तृषार्त्ताः खिद्यन्ते विषयविवशा यत्र भविनः
करालक्रोधार्काच्छमसरसि शोषं गतवति ।
स्मरस्वेदक्लेदग्लपितगुणमेदस्यनुदिनं
भवग्रीष्मे भीष्मे किमिह शरणं तापहरणम् ॥ १३ ॥

पिता माता भ्राताप्यभिलषितसिद्धावभिमतो
गुणग्रामज्ञाता न खलु धनदाता च धनवान् ।

जनाः स्वार्थस्फातावनिशमवदाताशयभृतः
प्रमाता कः ख्याताविह भवसुखस्यास्तु रसिकः ॥ १४ ॥

पणैः प्राणैर्गृह्णात्यहह महति स्वार्थ इह यान्
त्यजत्युच्चैर्लोकस्तृणवदघृणस्तानपरथा ।
विषं स्वान्ते वक्त्रेऽमृतमिति च विश्वासहतिकृद्-
भवादित्युद्वेगो यदि न गदितैः किं तदधिकैः ॥ १५ ॥

दृशां प्रान्तैः कान्तैः कलयति मुदं कोपकलितै-
रमीभिः खिन्नः स्याद् घनधननिधीनामपि गुणी ।
उपायैःस्तुत्याद्यैरपनयति रोषं कथमपी-
त्यहो मोहस्येयं भवभवनवैषम्यघटना ॥ १६ ॥

प्रिया प्रेक्षा पुत्रो विनय इह पुत्री गुणरति-
र्विवेकाख्यस्तातः परिणतिरनिन्द्या च जननी ।
विशुद्धस्य स्वस्य स्फुरति हि कुटुम्बं स्फुटमिदं
भवे तन्नो दृष्टं तदपि बत संयोगसुखधीः ॥ १७ ॥

पुरा प्रेमारम्भे तदनु तदविच्छेदघटने
तदुच्छेदे दुःखान्यथ कठिनचेता विषहते ।
विपाकादापाकाहितकलशवत्तापबहुलाज्-
जनो यस्मिन्नस्मिन्क्वचिदपि सुखं हन्त न भवे ॥ १८ ॥

मृगाक्षीदृग्बाणैरिह हि निहतं धर्म्मकटकं
विलिप्ता हृद्देशा इह च बहुलै रागरुधिरैः ।
भ्रमन्त्यूर्ध्वं क्रूरा व्यसनशतगृध्राश्च तदियं
महामोहक्षोणीरमणरणभूमिः खलु भवः ॥ १९ ॥

हसन्ति क्रीडन्ति क्षणमथ च खिद्यन्ति बहुधा
रुदन्ति क्रन्दन्ति क्षणमपि विवादं विदधते ।

पलायन्ते मोदं दधति परिनृत्यन्ति विवशा
भवे मोहोन्मादं कमपि तनुभाजः परिगताः ॥ २० ॥

अपूर्णा विद्येव प्रकटखलमैत्रीव कुनय
प्रणालीवास्थाने विधववनितायौवनमिव ।
अनिष्णाते पत्यौ मृगदृश इव स्नेहलहरी
भवक्रीडाव्रीडा दहति हृदयं तात्त्विकदृशाम् ॥ २१ ॥

प्रभाते संजाते भवति वितथा स्वापकलना
द्विचन्द्रज्ञानं वा तिमिरविरहे निर्म्मलदृशाम् ।
तथा मिथ्यारूपः स्फुरति विदिते तत्त्वविषये
भवोऽयं साधूनामुपरतविकल्पस्थिरधियाम् ॥ २२ ॥

प्रियावाणीवीणाशयनतनुसंबाधनसुखै-
र्भवोयं पीयूषैर्घटित इति पूर्वं मतिरभूत् ।
अकस्मादस्माकं परिकलिततत्त्वोपनिषदा-
मिदानीमेतस्मिन्न रतिरपि तु स्वात्मनि रतिः ॥ २३ ॥

दधानाः काठिन्यं निरवधिकमाविद्यकभव-
प्रपञ्चाः पाञ्चालीकुचकलशवन्नातिरतिदाः ।
*गलत्यज्ञानाभ्रे प्रसृमररुचावात्मनि विधौ*
चिदानन्दस्यन्दः सहज इति तेभ्योऽस्तु विरतिः ॥ २४ ॥

भवे या राज्यश्रीर्गजतुरगगोसंग्रहकृता
न सा ज्ञानध्यानप्रशमजनिता किं स्वमनसि ।
बहिर्याः प्रेयस्यः किमु मनसि ता नात्मरतय-
स्ततः स्वाधीनं कस्त्यजति सुखमिच्छत्यथ परम् ॥ २५ ॥

पराधीनं शर्म्म क्षयि विषयकाङ्क्षौघमलिनं
भवे भीतिः स्थानं तदपि कुमतिस्तत्र रमते ।

बुधास्तु स्वाधीनेऽक्षयिणि करणौत्सुक्यरहिते
निलीनास्तिष्ठन्ति प्रगलितभयाध्यात्मिकसुखे ॥ २६ ॥

तदेतद्भाषन्ते जगदभयदानं खलु भव-
स्वरूपानुध्यानं शमसुखनिदानं कृतधियः ।
स्थिरीभूते यस्मिन्विधुकिरणकर्पूरविमला
यशःश्रीः प्रौढा स्याज्जिनसमयतत्त्वस्थितिविदाम् ॥ २७ ॥

## वैराग्यसंभवाधिकारः ॥ ५ ॥

भवस्वरूपविज्ञानाद्द्वेषान्नैर्गुण्यदृष्टिजात् ।
तदिच्छोच्छेदरूपं द्राग् वैराग्यमुपजायते ॥ १ ॥

सिद्ध्या विषयसौख्यस्य वैराग्यं वर्णयन्ति ये ।
मतं न युज्यते तेषां यावदर्थाप्रसिद्धितः ॥ २ ॥

अप्राप्तत्वभ्रमादुच्चैरवाप्तेष्वप्यनन्तशः ।
कामभोगेषु मूढानां समीहा नोपशाम्यति ॥ ३ ॥

विषयैः क्षीयते कामो नेन्धनैरिव पावकः ।
प्रत्युत प्रोल्लसच्छक्तिर्भूय एवोपवर्द्धते ॥ ४ ॥

सोमत्वमिव सिंहानां पन्नगानामिव क्षमा ।
विषयेषु प्रवृत्तानां वैराग्यं खलु दुर्लभम् ॥ ५ ॥

अकृत्वा विषयत्यागं यो वैराग्यं दिधीर्षति ।
अपथ्यमपरित्यज्य स रोगोच्छेदमिच्छति ॥ ६ ॥

न चित्ते विषयासक्ते वैराग्यं स्थातुमप्यलम् ।
अयोघन इवोत्तप्ते निपतन्बिन्दुरम्भसः ॥ ७ ॥

यदीन्दुः स्यात् कुहूरात्रौ फलं यद्यवकेशिनि ।
तदा विषयसंसर्गिचित्ते वैराग्यसंक्रमः ॥ ८ ॥

भवहेतुषु तद्द्वेषाद्विषयेष्वप्रवृत्तितः ।
वैराग्यं स्यान्निराबाधं भवनैर्गुण्यदर्शनात् ॥ ९ ॥

चतुर्थेपि गुणस्थाने नन्वेवं तत् प्रसज्यते ।
युक्तं खलु प्रमातृणां भवनैर्गुण्यदर्शनम् ॥ १० ॥

सत्यं चारित्रमोहस्य महिमा कोप्ययं खलु ।
यदन्यहेतुयोगेऽपि फलायोगोऽत्र दृश्यते ॥ ११ ॥

दशाविशेषे तत्रापि न चेदं नास्ति सर्वथा ।
स्वव्यापारहतासङ्गं तथा च स्तवभाषितम् ॥ १२ ॥

यदा मरुन्नरेन्द्रश्रीस्त्वया नाथोपभुज्यते ।
यत्र तत्र रतिर्नाम विरक्तत्वं तदापि ते ॥ १३ ॥

भवेच्छा यस्य विच्छिन्ना प्रवृत्तिः कर्म्मभावजा ।
रतिस्तस्य विरक्तस्य सर्वत्र शुभवेद्यतः ॥ १४ ॥

अतश्चाक्षेपकज्ञानात् कान्तायां भोगसन्निधौ ।
न शुद्धिप्रक्षयो यस्माद्धारिभद्रमिदं वचः ॥ १५ ॥

मायाम्भस्तत्त्वतः पश्यन्ननुद्विग्नस्ततो द्रुतम् ।
तन्मध्येन प्रयात्येव यथा व्याघातवर्जितः ॥ १६ ॥

भोगान् स्वरूपतः पश्यंस्तथा मायोदकोपमान् ।
भुञ्जानोपि ह्यसङ्गः सन् प्रयात्येव परं पदम् ॥ १७ ॥

भोगतत्त्वस्य तु पुनर्न भवोदधिलङ्घनम् ।
मायोदकदृढावेशात्तेन यातीह कः पथा ॥ १८ ॥

स तत्रैव भवोद्विग्नो यथा तिष्ठत्यसंशयम् ।
मोक्षमार्गेपि हि तथा भोगजम्बालमोहितः ॥ १९ ॥

धर्म्मशक्तिं न हन्त्यत्र भोगयोगो बलीयसीम् ।
हन्ति दीपापहो वायुर्ज्वलन्तं न दवानलम् ॥ २० ॥

बध्यते बाढमासक्तो यथा श्लेष्मणि मक्षिका ।
शुष्कगोलवदंश्लिष्टो विषयेभ्यो न बध्यते ॥ २१ ॥

बहुदोषनिरोधार्थमनिवृत्तिरपि क्वचित् ।
निवृत्तिरिव नो दुष्टा योगानुभवशालिनाम् ॥ २२ ॥

यस्मिन्निषेव्यमाणेपि यस्याशुद्धिः कदाचन ।
तेनैव तस्य शुद्धिः स्यात् कदाचिदिति हि श्रुतिः ॥ २३ ॥

विषयाणां ततो बन्धजनने नियमोस्ति न ।
अज्ञानिनां ततो बन्धो ज्ञानिनां तु न कर्हिचित् ॥ २४ ॥

सेवतेऽसेवमानोपि सेवमानो न सेवते ।
कोपि पारजनो न स्याच्छ्रयन् परजनानपि ॥ २५ ॥

अत एव महापुण्यविपाकोपहितश्रियाम् ।
गर्भादारभ्य वैराग्यं नोत्तमानां विहन्यते ॥ २६ ॥

विषयेभ्यः प्रशान्तानामश्रान्तं विमुखीकृतैः ।
करणैश्चारुवैराग्यमेष राजपथः किल ॥ २७ ॥

स्वयं निवर्त्तमानैस्तैरनुदीर्णैरयन्त्रितैः ।
तृप्तैर्ज्ञानवतां तत्स्यादसावेकपदी मता ॥ २८ ॥

बलेन प्रेर्यमाणानि करणानि वनेभवत् ।
न जातु वशतां यान्ति प्रत्युतानर्थवृद्धये ॥ २९ ॥

पश्यन्ति लज्जया नीचैर्दुर्ध्यानं च प्रयुञ्जते ।
आत्मानं धार्मिकाभासाः क्षिपन्ति नरकावटे ॥ ३० ॥

वञ्चनं करणानां तद्विरक्तः कर्तुमर्हति ।
सद्भावविनियोगेन सदा स्वान्यविभागवित् ॥ ३१ ॥

प्रवृत्तेर्वानिवृत्तेर्वा न संकल्पो न च श्रमः ।
विकारो हीयतेऽक्षाणामिति वैराग्यमद्भुतम् ॥ ३२ ॥

दारुयन्त्रस्थपाञ्चालीनृत्यतुल्याः प्रवृत्तयः ।
योगिनो नैव बाधायै ज्ञानिनो लोकवर्तिनः ॥ ३३ ॥

इयं च योगमायेति प्रकटं गीयते परैः ।
लोकानुग्रहहेतुत्वान्नास्यामपि च दूषणम् ॥ ३४ ॥

सिद्धान्ते श्रूयते चेयमपवादपदेष्वपि ।
मृगपर्षत्परित्रासनिरासफलसंगता ॥ ३५ ॥

औदासीन्यफले ज्ञाने परिपाकमुपेयुषि ।
चतुर्थेपि गुणस्थाने तद्वैराग्यं व्यवस्थितम् ॥ ३६ ॥

## वैराग्यभेदाधिकारः ॥ ६ ॥

तद्वैराग्यं स्मृतं दुःखमोहज्ञानान्वयात्त्रिधा ।
तत्राद्यं विषयाप्राप्तेः संसारोद्वेगलक्षणम् ॥ १ ॥

अत्राङ्गमनसोः खेदो ज्ञानमाप्यायकं न यत् ।
निजाभीप्सितलाभे च विनिपातोपि जायते ॥ २ ॥

दुःखाद्विरक्ताः प्रागेवेच्छन्ति प्रत्यागतेः पदम् ।
अधीरा इव संग्रामे प्रविशन्तो वनादिकम् ॥ ३ ॥

शुष्कतर्कादिकं किंचिद्वैद्यकादिकमप्यहो ।
पठन्ति ते शमनदीं न तु सिद्धान्तपद्धतिम् ॥ ४ ॥

ग्रन्थपल्लवबोधेन गर्वोष्माणं च बिभ्रति ।
तत्त्वान्तं नैव गच्छन्ति प्रशमामृतनिर्झरम् ॥ ५ ॥

वेषमात्रभृतोऽप्येते गृहस्थान्नातिशेरते ।
न पूर्वोत्थायिनो यस्मान्नापि पश्चान्निपातिनः ॥ ६ ॥

गृहेऽन्नमात्रदौर्लभ्यं लभ्यन्ते मोदका व्रते ।
वैराग्यस्यायमर्थो हि दुःखगर्भस्य लक्षणम् ॥ ७ ॥

कुशास्त्राभ्याससंभूतं भवनैर्गुण्यदर्शनात् ।
मोहगर्भं तु वैराग्यं मतं बालतपस्विनाम् ॥ ८ ॥

सिद्धान्तमुपजीव्यापि ये विरुद्धार्थभाषिणः ।
तेषामप्येतदेवेष्टं कुर्वतामपि दुष्करम् ॥ ९ ॥

संसारमोचकादीनामिवैतेषां न तात्त्विकः ।
शुभोऽपि परिणामो यज्जाता नाज्ञारुचिस्थितिः ॥ १० ॥

अमीषां प्रशमोऽप्युच्चैर्दोषपोषाय केवलम् ।
अन्तर्निलीनविषमज्वरानुद्भवसन्निभः ॥ ११ ॥

कुशास्त्रार्थेषु दक्षत्वं शास्त्रार्थेषु विपर्ययः ।
स्वच्छन्दता कुतर्कश्च गुणवत्संस्तवोज्झनम् ॥ १२ ॥

आत्मोत्कर्षः परद्रोहः कलहो दम्भजीवनम् ।
आश्रवाच्छादनं शक्त्युल्लङ्घनेन क्रियादरः ॥ १३ ॥

गुणानुरागवैधुर्यमुपकारस्य विस्मृतिः ।
अनुबन्धाद्यचिन्ता च प्रणिधानस्य विच्युतिः ॥ १४ ॥

श्रद्धामृदुत्वमौद्धत्यमधैर्य्यमविवेकिता ।
वैराग्यस्य द्वितीयस्य स्मृतेयं लक्षणावली ॥ १५ ॥

ज्ञानगर्भं तु वैराग्यं सम्यक्तत्त्वपरिच्छिदः ।
स्याद्वादिनः शिवोपायस्पर्शिनस्तत्त्वदर्शिनः ॥ १६ ॥

मीमांसा मांसला यस्य स्वपरागमगोचरा ।
बुद्धिः स्यात्तस्य वैराग्यं ज्ञानगर्भमुदञ्चति ॥ १७ ॥

न स्वान्यशास्त्रव्यापारे प्राधान्यं यस्य कर्मणि ।
नासौ निश्चयसंशुद्धं सारं प्राप्नोति कर्म्मणः ॥ १८ ॥

सम्यक्त्वमौनयोः सूत्रे गतप्रत्यागते यतः ।
नियमो दर्शितस्तस्मात् सारं सम्यक्त्वमेव हि ॥ १९ ॥

अनाश्रवफलं ज्ञानमव्युत्थानमनाश्रवः ।
सम्यक्त्वं तदभिव्यक्तिरित्येकत्वविनिश्चयः ॥ २० ॥

बहिर्निर्वृत्तिमात्रं स्याच्चारित्राद् व्यावहारिकम् ।
अन्तःप्रवृत्तिसारं तु सम्यक्प्रज्ञानमेव हि ॥ २१ ॥

एकान्तेन हि षट्कायश्रद्धानेऽपि न शुद्धता ।
संपूर्णपर्ययालाभाद् यन्न याथात्म्यनिश्चयः ॥ २२ ॥

यावन्तः पर्यया वाचां यावन्तश्चार्थपर्ययाः ।
साम्प्रतानागतातीतास्तावद्द्रव्यं किलैककम् ॥ २३ ॥

स्यात्सर्वमयमित्येवं युक्तं स्वपरपर्ययैः ।
अनुवृत्तिकृतं स्वत्वं परत्वं व्यतिरेकजम् ॥ २४ ॥

ये नाम परपर्यायाः स्वास्तित्वायोगतो मताः ।
स्वकीया अप्यमी त्यागस्वपर्यायविशेषणात् ॥ २५ ॥

अतादात्म्येपि संबन्धव्यवहारोपयोगतः ।
तेषां स्वत्वं धनस्येव व्यज्यते सूक्ष्मया धिया ॥ २६ ॥

पर्यायाः स्युर्मुनेर्ज्ञानदृष्टिचारित्रगोचराः ।
यथा भिन्ना अपि तथोपयोगाद्वस्तुनो ह्यमी ॥ २७ ॥

नो चेदभावसंबन्धान्वेषणे का गतिर्भवेत् ।
आधारप्रतियोगित्वे द्विष्ठे न हि पृथग् द्वयोः ॥ २८ ॥

स्वान्यपर्यायसंश्लेषात् सूत्रेऽप्येवं निदर्शितम् ।
सर्वमेकं विदन्वेद सर्वं जानँस्तथैककम् ॥ २९ ॥

आसत्तिपाटवाभ्यासस्वकार्यादिभिराश्रयन् ।
पर्यायमेकमप्यर्थं वेत्ति भावाद् बुधोऽखिलम् ॥ ३० ॥

अन्तरा केवलज्ञानं प्रतिव्यक्तिर्न यद्यपि ।
क्वापि ग्रहणमेकांशद्वारं चातिप्रसक्तिमत् ॥ ३१ ॥

अनेकान्तागमश्रद्धा तथाप्यस्खलिता सदा ।
सम्यग्दृशस्तयैव स्यात् संपूर्णार्थविवेचनम् ॥ ३२ ॥

आगमार्थोपनयनाद् ज्ञानं प्राज्ञस्य सर्वगम् ।
कार्य्यादेर्व्यवहारस्तु नियतोल्लेखशेखरः ॥ ३३ ॥

तदेकान्तेन यः कश्चिद्विरक्तस्यापि कुग्रहः ।
शास्त्रार्थबाधनात्सोऽयं जैनाभासस्य पापकृत् ॥ ३४ ॥

उत्सर्गे वापवादे वा व्यवहारेऽथ निश्चये ।
ज्ञाने कर्म्मणि वायं चेन्न तदा ज्ञानगर्भता ॥ ३५ ॥

स्वागमेऽन्यागमार्थानां शतस्येव परार्ध्यके ।
नावतारबुधत्वं चेन्न तदा ज्ञानगर्भता ॥ ३६ ॥

नयेषु स्वार्थसत्येषु मोघेषु परचालने ।
माध्यस्थ्यं यदि नायातं न तदा ज्ञानगर्भता ॥ ३७ ॥

आज्ञयागमिकार्थानां यौक्तिकानां च युक्तितः ।
न स्थाने योजकत्वं चेन्न तदा ज्ञानगर्भता ॥ ३८ ॥

गीतार्थस्यैव वैराग्यं ज्ञानगर्भं ततः स्थितम् ।
उपचारादगीतस्याप्यभीष्टं तस्य निश्रया ॥ ३९ ॥

सूक्ष्मेक्षिका च माध्यस्थ्यं सर्वत्र हितचिन्तनम् ।
क्रियायामादरो भूयान् धर्मे लोकस्य योजनम् ॥ ४० ॥

चेष्टा परस्य वृत्तान्ते मूकान्धबधिरोपमा ।
उत्साहः स्वगुणाभ्यासे दुःस्थस्येव धनार्जने ॥ ४१ ॥

मदनोन्मादवमनं मदसंमर्दमर्दनम् ।
असूयातन्तुविच्छेदः समतामृतमज्जनम् ॥ ४२ ॥

स्वभावान्नैव चलनं चिदानन्दमयात्सदा ।
वैराग्यस्य तृतीयस्य स्मृतेयं लक्षणावली ॥ ४३ ॥

ज्ञानगर्भमिहादेयं द्वयोस्तु स्वोपमर्दतः ।
उपयोगः कदाचित् स्यान्निजाध्यात्मप्रसादतः ॥ ४४ ॥

## वैराग्यविषयाधिकारः ॥ ७ ॥

विषयेषु गुणेषु च द्विधा भुवि वैराग्यमिदं प्रवर्त्तते ।
अपरं प्रथमं प्रकीर्तितं परमध्यात्मबुधैर्द्वितीयकम् ॥ १ ॥

विषया करणैरुपस्थिता अपि चानुश्रविका विकारिणः ।
न भवन्ति विरक्तचेतसां विषधारेव सुधासु मज्जताम् ॥ २ ॥

सुविशालरसालमञ्जरीविचरत्कोकिलकाकलीभरैः ।
किमु माद्यति योगिनां मनो निभृतानाहतनादसादरम् ॥ ३ ॥

रमणीमृदुपाणिकङ्कणक्वणनाकर्णनपूर्णघूर्णनाः ।
अनुभूतिनटीस्फुटीकृतप्रियसंगीतरता न योगिनः ॥ ४ ॥

स्खलनाय न शुद्धचेतसां ललनापञ्चमचारुघोलना ।
यदियं समतापदावलीमधुरालापरतेर्न रोचते ॥ ५ ॥

सततं क्षयि शुक्रशोणितप्रभवं रूपमपि प्रियं न हि ।
अविनाशिनिसर्गनिर्म्मलप्रथमानस्वकरूपदर्शिनाम् ॥ ६ ॥

परदृश्यमपायसंकुलं विषयो यत्खलु चर्मचक्षुषः ।
न हि रूपमिदं मुदे यथा निरपायानुभवैकगोचरः ॥ ७ ॥

गतिविभ्रमहास्यचेष्टितैर्ललनानामिह मोदतेऽबुधः ।
सुकृताद्रिपविष्वमीषु नो विरतानां प्रसरन्ति दृष्टयः ॥ ८ ॥

न मुदे मृगनाभिमल्लिकालवलीचन्दनचन्द्रसौरभम् ।
विदुषां निरुपाधिबाधितस्मरशीलेन सुगन्धिवर्ष्मणाम् ॥ ९ ॥

उपयोगमुपैति यच्चिरं हरते यन्न विभावमारुतः ।
न ततः खलु शीलसौरभादपरस्मिन्निह युज्यते रतिः ॥ १० ॥

मधुरैर्न रसैरधीरता क्वचनाध्यात्मसुधालिहां सताम् ।
अरसैः कुसुमैरिवालिनां प्रसरत्पद्मपरागमोदिनाम् ॥ ११ ॥

विषमायतिभिर्नु किं रसैः स्फुटमापातसुखैर्विकारिभिः ।
नवमेऽनवमे रसे मनो यदि मग्नं सतताविकारिणि ॥ १२ ॥

मधुरं रसमाप्य निष्पतेद्रसनातो रसलोभिनां जलम् ।
परिभाव्य विपाकसाध्वसं विरतानां तु ततो दृशोर्जलम् ॥ १३ ॥

इह ये गुणपुष्पपूरिते धृतिपत्नीमुपगूह्य शेरते ।
विमले सुविकल्पतल्पके क्व बहिःस्पर्शरता भवन्तु ते ॥ १४ ॥

हृदि निर्वृतिमेव बिभ्रतां न मुदे चन्दनलेपनाविधिः ।
विमलत्वमुपेयुषां सदा सलिलस्नानकलापि निष्फला ॥ १५ ॥

गणयन्ति जनुः स्वमर्थवत्सुरतोल्लाससुखेन भोगिनः ।
मदनाहिविषोग्रमूर्छनामयतुल्यं तु तदेव योगिनः ॥ १६ ॥

तदिमे विषयाः किलैहिका न मुदे केऽपि विरक्तचेतसाम् ।
परलोकसुखेऽपि निःस्पृहाः परमानन्दरसालसा अमी ॥ १७ ॥

मदमोहविषादमत्सरज्वरबाधाविधुराः सुरा अपि ।
विषमिश्रितपायसान्नवत् सुखमेतेष्वपि नैति रम्यताम् ॥ १८ ॥

रमणीविरहेण वह्निना बहुबाष्पानिलदीपितेन यत् ।
त्रिदशैर्दिवि दुःखमाप्यते घटते तत्र कथं सुखस्थितिः ॥ १९ ॥

प्रथमानविमानसंपदां च्यवनस्यापि दिवो विचिन्तनात् ।
हृदयं न हि यद्विदीर्यते द्युसदां तत्कुलिशाणुनिर्मितम् ॥ २० ॥

विषयेषु रतिः शिवार्थिनो न गतिष्वस्ति किलाखिलास्वपि ।
घननन्दनचन्दनार्थिनो गिरिभूमिष्वपरद्रुमेष्विव ॥ २१ ॥

इति शुद्धमतिस्थिरीकृताऽपरवैराग्यरसस्य योगिनः ।
स्वगुणेषु वितृष्णतावहं परवैराग्यमपि प्रवर्त्तते ॥ २२ ॥

विपुलर्द्धिपुलाकचारणप्रबलाशीविषमुख्यलब्धय: ।
न मदाय विरक्तचेतसामनुषङ्गोपनता: पलालवत् ॥ २३ ॥

कलितातिशयोऽपि कोऽपि नो विबुधानां मदकृद्गुणव्रज: ।
अधिकं न विदन्त्यमी यतो निजभावे समुदञ्चति स्वत: ॥ २४ ॥

हृदये न शिवेऽपि लुब्धता सदनुष्ठानमसङ्गमङ्गति ।
पुरुषस्य दशेयमिष्यते सहजानन्दतरङ्गसंगता ॥ २५ ॥

इति यस्य महामतेर्भवेदिह वैराग्यविलासभृन्मन: ।
उपयन्ति वरीतुमुच्चकैस्तमुदारप्रकृतिं यश:श्रिय: ॥ २६ ॥

## ममतात्यागाधिकार: ॥ ८ ॥

निर्ममस्यैव वैराग्यं स्थिरत्वमवगाहते ।
परित्यजेत्तत: प्राज्ञो ममतामत्यनर्थदाम् ॥ १ ॥

विषयै: किं परित्यक्तैर्जागर्ति ममता यदि ।
त्यागात्कञ्चुकमात्रस्य भुजङ्गो न हि निर्विष: ॥ २ ॥

कष्टेन हि गुणग्रामं प्रगुणीकुरुते मुनि: ।
ममताराक्षसी सर्वं भक्षयत्येकहेलया ॥ ३ ॥

जन्तुकान्तं पशूकृत्य द्रागविद्यौषधिबलात् ।
उपायैर्बहुभि: पत्नी ममता क्रीडयत्यहो ॥ ४ ॥

एक: परभवे याति जायते चैक एव हि ।
ममतोद्रेकत: सर्वं संबन्धं कल्पयत्यथ ॥ ५ ॥

व्याप्नोति महतीं भूमिं वटबीजाद्यथा वट: ।
तथैकममताबीजात्प्रपञ्चस्यापि कल्पना ॥ ६ ॥

माता पिता मे भ्राता मे भगिनी वल्लभा च मे ।
पुत्रा: सुता मे मित्राणि ज्ञातय: संस्तुताश्च मे ॥ ७ ॥

इत्येवं ममताव्याधिं वर्द्धमानं प्रतिक्षणम् ।
जनः शक्नोति नोच्छेत्तुं विना ज्ञानमहौषधम् ॥ ८ ॥

ममत्वेनैव निःशङ्कमारम्भादौ प्रवर्त्तते ।
कालाकालसमुत्थायी धनलोभेन धावति ॥ ९ ॥

स्वयं येषां च पोषाय खिद्यते ममतावशः ।
इहामुत्र च ते न स्युस्त्राणाय शरणाय वा ॥ १० ॥

ममत्वेन बहून् लोकान् पुष्णात्येकोऽर्जितैर्धनैः ।
सोढा नरकदुःखानां तीव्राणामेक एव तु ॥ ११ ॥

ममतान्धो हि यन्नास्ति तत्पश्यति न पश्यति ।
जात्यन्धस्तु यदस्त्येतद्भेद इत्यनयोर्महान् ॥ १२ ॥

प्राणानभिन्नताध्यानात् प्रेमभूम्ना ततोऽधिकाम् ।
प्राणापहां प्रियां मत्वा मोदते ममतावशः ॥ १३ ॥

कुन्दान्यस्थीनि दशनान् मुखं श्लेष्मगृहं विधुम् ।
मांसग्रन्थी कुचौ कुम्भौ हेम्नो वेत्ति ममत्ववान् ॥ १४ ॥

मनस्यन्यद्वचस्यन्यत् क्रियायामन्यदेव च ।
यस्यास्तामपि लोलाक्षीं साध्वीं वेत्ति ममत्ववान् ॥ १५ ॥

या रोपयत्यकार्येऽपि रागिणं प्राणसंशये ।
दुर्वृत्तां स्त्रीं ममत्वान्धस्तां मुग्धामेव मन्यते ॥ १६ ॥

चर्माच्छादितमांसास्थिविण्मूत्रपिठरीष्वपि ।
वनितासु प्रियत्वं यत्तन्ममत्वविजृम्भितम् ॥ १७ ॥

लालयन् बालकं तातेत्येवं ब्रूते ममत्ववान् ।
वेत्ति च श्लेष्मणा पूर्णामङ्गुलीममृताञ्चिताम् ॥ १८ ॥

पङ्कार्द्रमपि निःशङ्का सुतमङ्कान्न मुञ्चति ।
तदमेध्येऽपि मेध्यत्वं जानात्यम्बा ममत्वतः ॥ १९ ॥

मातापित्रादिसंबन्धोऽनियतोऽपि ममत्वतः ।
दृढभूमीभ्रमवतां नैयत्येनावभासते ॥ २० ॥

भिन्नाः प्रत्येकमात्मानो विभिन्नाः पुद्‌गला अपि ।
शून्यः संसर्ग इत्येवं यः पश्यति स पश्यति ॥ २१ ॥

अहंताममते स्वत्वस्वीयत्वभ्रमहेतुके ।
भेदज्ञानात्पलायेते रज्जुज्ञानादिवाहिभीः ॥ २२ ॥

किमेतदिति जिज्ञासा तत्त्वान्तर्ज्ञानसंमुखी ।
व्यासङ्गमेव नोत्थातुं दत्ते क्व ममतास्थितिः ॥ २३ ॥

प्रियार्थिनः प्रियाप्राप्तिं विना क्वापि यथा रतिः ।
न तथा तत्त्वजिज्ञासोस्तत्त्वप्राप्तिं विना क्वचित् ॥ २४ ॥

अत एव हि जिज्ञासां विष्टम्भति ममत्वधीः ।
विचित्राभिनयाक्रान्तः संभ्रान्त इव लक्ष्यते ॥ २५ ॥

धृतो योगो न ममता हता न समताऽऽदृता ।
न च जिज्ञासितं तत्त्वं गतं जन्म निरर्थकम् ॥ २६ ॥

जिज्ञासा च विवेकश्च ममतानाशकावुभौ ।
अतस्ताभ्यां निगृह्णीयादेनामध्यात्मवैरिणीम् ॥ २७ ॥

## समताधिकारः ॥ ९ ॥

त्यक्तायां ममतायां च समता प्रथते स्वतः ।
स्फटिके गलितोपाधौ यथा निर्मलतागुणः ॥ १ ॥

प्रियाप्रियत्वयोर्यार्थैर्व्यवहारस्य कल्पना ।
निश्चयात्तद्व्युदासेन स्तैमित्यं समतोच्यते ॥ २ ॥

तेष्वेव द्विषतः पुंसस्तेष्वेवार्थेषु रज्यतः ।
निश्चयात्किंचिदिष्टं वाऽनिष्टं वा नैव विद्यते ॥ ३ ॥

एकस्य विषयो यः स्यात्स्वाभिप्रायेण पुष्टिकृत् ।
अन्यस्य द्वेष्यतामेति स एव मतिभेदतः ॥ ४ ॥

विकल्पकल्पितं तस्माद्द्वयमेतन्न तात्त्विकम् ।
विकल्पोपरमे तस्य द्वित्वादिवदुपक्षयः ॥ ५ ॥

स्वप्रयोजनसंसिद्धिः स्वायत्ता भासते यदा ।
बहिरर्थेषु संकल्पसमुत्थानं तदा हतम् ॥ ६ ॥

लब्धे स्वभावे कण्ठस्थस्वर्णन्यायाद् भ्रमक्षये ।
रागद्वेषानुपस्थानात् समता स्यादनाहता ॥ ७ ॥

जगज्जीवेषु नो भाति द्वैविध्यं कर्मनिर्मितम् ।
यदा शुद्धनयस्थित्या तदा साम्यमनाहतम् ॥ ८ ॥

स्वगुणेभ्योपि कौटस्थ्यादेकत्वाध्यवसायतः ।
आत्मारामं मनो यस्य तस्य साम्यमनुत्तरम् ॥ ९ ॥

समतापरिपाके स्याद्विषयग्रहशून्यता ।
यया विशदयोगानां वासीचन्दनतुल्यता ॥ १० ॥

किं स्तुमः समतां साधोर्या स्वार्थं प्रगुणीकृता ।
वैराणि नित्यवैराणामपि हन्त्युपतस्थुषाम् ॥ ११ ॥

किं दानेन तपोभिर्वा यमैश्च नियमैश्च किम् ।
एकैव समता सेव्या तरीः संसारवारिधौ ॥ १२ ॥

दूरे स्वर्गसुखं मुक्तिपदवी सा दवीयसी ।
मनःसंनिहितं दृष्टं स्पष्टं तु समतासुखम् ॥ १३ ॥

दृशोः स्मरविषं शुष्येत् क्रोधतापः क्षयं व्रजेत् ।
औद्धत्यमलनाशः स्यात् समतामृतमज्जनात् ॥ १४ ॥

जरामरणदावाग्निज्वलिते भवकानने ।
सुखाय समतैकैव पीयूषघनवृष्टिवत् ॥ १५ ॥

आश्रित्य समतामेकां निर्वृता भरतादय: ।
न हि कष्टमनुष्ठानमभूत्तेषां तु किञ्चन ॥ १६ ॥

अर्गला नरकद्वारे मोक्षमार्गस्य दीपिका ।
समता गुणरत्नानां संग्रहे रोहणावनि: ॥ १७ ॥

मोहाच्छादितनेत्राणामात्मरूपमपश्यताम् ।
दिव्याञ्जनशलाकेव समता दोषनाशकृत् ॥ १८ ॥

क्षणं चेत: समाकृष्य समता यदि सेव्यते ।
स्यात्तदा सुखमन्यस्य यद्वक्तुं नैव पार्यते ॥ १९ ॥

कुमारी न यथा वेत्ति सुखं दयितभोगजम् ।
न जानाति तथा लोको योगिनां समतासुखम् ॥ २० ॥

नतिस्तुत्यादिकाशंसाशरस्तीव्र: स्वमर्म्मभित् ।
समतावर्मगुप्तानां नार्तिकृत्सोपि जायते ॥ २१ ॥

प्रचितान्यपि कर्म्माणि जन्मनां कोटिकोटिभि: ।
तमांसीव प्रभा भानो: क्षिणोति समता क्षणात् ॥ २२ ॥

अन्यलिङ्गादिसिद्धानामाधार: समतैव हि ।
रत्नत्रयफलप्राप्तेर्यया स्याद्भावजैनता ॥ २३ ॥

ज्ञानस्य फलमेषैव नयस्थानावतारिण: ।
चन्दनं वह्निनेव स्यात् कुग्रहेण तु भस्म तत् ॥ २४ ॥

चारित्रपुरुषप्राणा: समताख्या गता यदि ।
जनानुधावनावेशस्तदा तन्मरणोत्सव: ॥ २५ ॥

संत्यज्य समतामेकां स्याद्यत्कष्टमनुष्ठितम् ।
तदीप्सितकरं नैव बीजमुप्तमिवोषरे ॥ २६ ॥

उपाय: समतैवैका मुक्तेरन्य: क्रियाभर: ।
तत्तत्पुरुषभेदेन तस्या एव प्रसिद्धये ॥ २७ ॥

दिङ्मात्रदर्शने शास्त्रव्यापारः स्यान्न दूरगः ।
अस्याः स्वानुभवः पारं सामर्थ्याख्योऽवगाहते ॥ २८ ॥

परस्मात् परमेषा यन्निगूढं तत्त्वमात्मनः ।
तदध्यात्मप्रसादेन कार्योऽस्यामेव निर्भरः ॥ २९ ॥

## सदनुष्ठानाधिकारः ॥ १० ॥

परिशुद्धमनुष्ठानं जायते समतान्वयात् ।
कतकक्षोदसंक्रान्तेः कलुषं सलिलं यथा ॥ १ ॥

विषं गरोऽननुष्ठानं तद्धेतुरमृतं परम् ।
गुरुसेवाद्यनुष्ठानमिति पञ्चविधं जगुः ॥ २ ॥

आहारोपधिपूजर्द्धिप्रभृत्याशंसया कृतम् ।
शीघ्रं सच्चित्तहन्तृत्वाद्विषानुष्ठानमुच्यते ॥ ३ ॥

स्थावरं जङ्गमं चापि तत्क्षणं भक्षितं विषम् ।
यथा हन्ति तथेदं सच्चित्तमैहिकभोगतः ॥ ४ ॥

दिव्यभोगाभिलाषेण कालान्तरपरिक्षयात् ।
स्वादृष्टफलसंपूर्तेर्गरानुष्ठानमुच्यते ॥ ५ ॥

यथा कुद्रव्यसंयोगजनितं गरसंज्ञितम् ।
विषं कालान्तरे हन्ति तथेदमपि तत्त्वतः ॥ ६ ॥

निषेधायानयोरेव विचित्रानर्थदायिनोः ।
सर्वत्रैवानिदानत्वं जिनेन्द्रैः प्रतिपादितम् ॥ ७ ॥

प्रणिधानाद्यभावेन कर्म्मानध्यवसायिनः ।
संमूर्छिमप्रवृत्त्याभमननुष्ठानमुच्यते ॥ ८ ॥

ओघसंज्ञात्र सामान्यज्ञानरूपा निबन्धनम् ।
लोकसंज्ञा च निर्दोषसूत्रमार्गानुपेक्षिणी ॥ ९ ॥

न लोकं नापि सूत्रं नो गुरुवाचमपेक्षते ।
अनध्यवसितं किञ्चित्कुरुते चौघसंज्ञया ॥ १० ॥

शुद्धस्यान्वेषणे तीर्थोच्छेदः स्यादिति वादिनाम् ।
लोकाचारादरश्रद्धा लोकसंज्ञेति गीयते ॥ ११ ॥

शिक्षितादिपदोपेतमप्यावश्यकमुच्यते ।
द्रव्यतो भावनिर्मुक्तमशुद्धस्य तु का कथा ॥ १२ ॥

तीर्थोच्छेदभिया हन्ताविशुद्धस्यैव चादरे ।
सूत्रक्रियाविलोपः स्याद् गतानुगतिकत्वतः ॥ १३ ॥

धर्म्मोद्यतेन कर्त्तव्यं कृतं बहुभिरेव चेत् ।
तदा मिथ्यादृशां धर्मो न त्याज्यः स्यात्कदाचन ॥ १४ ॥

तस्माद् गतानुगत्या यत् क्रियते सूत्रवर्जितम् ।
ओघतो लोकतो वा तदननुष्ठानमेव हि ॥ १५ ॥

अकामनिर्जराङ्गत्वं कायक्लेशादिहोदितम् ।
सकामनिर्जरा तु स्यात् सोपयोगप्रवृत्तितः ॥ १६ ॥

सदनुष्ठानरागेण तद्धेतुर्मार्गगामिनाम् ।
एतच्च चरमावर्त्तेऽनाभोगादेर्विना भवेत् ॥ १७ ॥

धर्मयौवनकालोऽयं भवबालदशापरा ।
अत्र स्यासत्क्रियारागोऽन्यत्र चासत्क्रियादरः ॥ १८ ॥

भोगरागाद् यथा यूनो बालक्रीडाऽखिला ह्रिये ।
धर्मे यूनस्तथा धर्म्मरागेणासत्क्रिया ह्रिये ॥ १९ ॥

चतुर्थे चरमावर्त्ते तस्माद्धर्म्मानुरागतः ।
अनुष्ठानं विनिर्दिष्टं बीजादिक्रमसंगतम् ॥ २० ॥

बीजं चेह जनान् दृष्ट्वा शुद्धानुष्ठानकारिणः ।
बहुमानप्रशंसाभ्यां चिकीर्षा शुद्धगोचरा ॥ २१ ॥

तस्या एवानुबन्धश्चाकलङ्कः कीर्त्यतेऽङ्कुरः ।
तद्धेत्वन्वेषणा चित्रा स्कन्धकल्पा च वर्णिता ॥ २२ ॥

प्रवृत्तिस्तेषु चित्रा च पत्रादिसदृशी मता ।
पुष्पं च गुरुयोगादिहेतुसंपत्तिलक्षणम् ॥ २३ ॥

भावधर्म्मस्य संपत्तिर्या च सद्देशनादिना ।
फलं तदत्र विज्ञेयं नियमान्मोक्षसाधकम् ॥ २४ ॥

सहजो भावधर्मो हि शुद्धश्चन्दनगन्धवत् ।
एतद्गर्भमनुष्ठानममृतं संप्रचक्षते ॥ २५ ॥

जैनीमाज्ञां पुरस्कृत्य प्रवृत्तं चित्तशुद्धितः ।
संवेगगर्भमत्यन्तममृतं तद्विदो विदुः ॥ २६ ॥

शास्त्रार्थालोचनं सम्यक् प्रणिधानं च कर्म्मणि ।
कालाद्यङ्गाविपर्यासोऽमृतानुष्ठानलक्षणम् ॥ २७ ॥

द्वयं हि सदनुष्ठानं त्रयमत्रासदेव च ।
तत्रापि चरमं श्रेष्ठं मोहोग्रविषनाशनात् ॥ २८ ॥

आदरः करणे प्रीतिरविघ्नः संपदागमः ।
जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥ २९ ॥

भेदैर्भिन्नं भवेदिच्छाप्रवृत्तिस्थिरसिद्धिभिः ।
चतुर्विधमिदं मोक्षयोजनाद्योगसंज्ञितम् ॥ ३० ॥

इच्छा तद्वत्कथा प्रीतियुक्ताऽविपरिणामिनी ।
प्रवृत्तिः पालनं सम्यक् सर्वत्रोपशमान्वितम् ॥ ३१ ॥

सत्क्षयोपशमोत्कर्षादतिचारादिचिन्तया ।
रहितं तु स्थिरं सिद्धिः परेषामर्थसाधकम् ॥ ३२ ॥

भेदा इमे विचित्राः स्युः क्षयोपशमभेदतः ।
श्रद्धाप्रीत्यादियोगेन भव्यानां मार्गगामिनाम् ॥ ३३ ॥

अनुकम्पा च निर्वेदः संवेगः प्रशमस्तथा ।
एतेषामनुभावाः स्युरिच्छादीनां यथाक्रमम् ॥ ३४ ॥

कायोत्सर्गादिसूत्राणां श्रद्धामेधादिभावतः ।
इच्छादियोगे साफल्यं देशसर्वव्रतस्पृशाम् ॥ ३५ ॥

गुडखण्डादिमाधुर्यभेदवत् पुरुषान्तरे ।
भेदेऽपीच्छादिभावानां दोषो नार्थान्वयादिह ॥ ३६ ॥

येषां नेच्छादिलेशोपि तेषां त्वेतत्समर्प्पणे ।
स्फुटो महामृषावाद इत्याचार्याः प्रचक्षते ॥ ३७ ॥

उन्मार्गस्थापनं बाढमसमञ्जसकारणे ।
भावनीयमिदं तत्त्वं जानानैर्योगविंशिकाम् ॥ ३८ ॥

त्रिधा तत्सदनुष्ठानमादेयं शुद्धचेतसा ।
ज्ञात्वा समयसद्भावं लोकसंज्ञां विहाय च ॥ ३९ ॥

## मनःशुद्ध्यधिकारः ॥ ११ ॥

उचितमाचरणं शुभमिच्छतां प्रथमतो मनसः खलु शोधनम् ।
गदवतां ह्यकृते मलशोधने कमुपयोगमुपैतु रसायनम् ॥ १ ॥

परजने प्रसभं किमु रज्यति द्विषति वा स्वमनो यदि निर्मलम् ।
विरहिणामरतेर्जगतो रतेरपि च का विकृतिर्विमले विधौ ॥ २ ॥

रुचितमाकलयन्ननुपस्थितं स्वमनसैव हि शोचति मानवः ।
उपनते स्मयमानमुखः पुनर्भवति तत्र परस्य किमुच्यताम् ॥ ३ ॥

चरणयोगघटान्प्रविलोठयन् शमरसं सकलं विकिरत्यधः ।
चपल एष मनःकपिरुच्चकै रसवणिग् विदधातु मुनिस्तु किम् ॥ ४ ॥

सततकुट्टितसंयमभूतलोत्थितरजोनिकरैः प्रथयंस्तमः ।
अतिदृढैश्च मनस्तुरगो गुणैरपि नियन्त्रित एष न तिष्ठति ॥ ५ ॥

जिनवचोघनसारमलिम्लुचः कुसुमसायकपावकदीपकः ।
अहह कोपि मनःपवनो बली शुभमतिद्रुमसंततिभङ्गकृत् ॥ ६ ॥

चरणगोपुरभङ्गपरः स्फुरत्समयबोधतरूनपि पातयन् ।
भ्रमति यद्यतिमत्तमनोगजः क्व कुशलं शिवराजपथे तदा ॥ ७ ॥

व्रततरून्प्रगुणीकुरुते जनो दहति दुष्टमनोदहनः पुनः ।
ननु परिश्रम एष विशेषवान् क्व भविता सुगुणोपवनोदयः ॥ ८ ॥

अनिगृहीतमना विदधत्परां न वपुषा वचसा च शुभक्रियाम् ।
गुणमुपैति विराधनयाऽनया बत दुरन्तभवभ्रममञ्चति ॥ ९ ॥

अनिगृहीतमनाः कुविकल्पतो नरकमृच्छति तन्दुलमत्स्यवत् ।
इयमभक्षणजा तदजीर्णताऽनुपनतार्थविकल्पकदर्थना ॥ १० ॥

मनसि लोलतरे विपरीततां वचननेत्रकरेङ्गितगोपना ।
व्रजति धूर्त्ततया ह्यनयाखिलं निबिडदम्भपरैर्मुषितं जगत् ॥ ११ ॥

मनस एव ततः परिशोधनं नियमतो विदधीत महामतिः ।
इदमभेषजसंवननं मुनेः परपुमर्थरतस्य शिवश्रियः ॥ १२ ॥

प्रवचनाब्जविलासरविप्रभा प्रशमनीरतरङ्गतरङ्गिणी ।
हृदयशुद्धिरुदीर्णमदज्वरप्रसरनाशविधौ परमौषधम् ॥ १३ ॥

अनुभवामृतकुण्डमनुत्तरव्रतमरालविलासपयोजिनी ।
सकलकर्मकलङ्कविनाशिनी मनस एव हि शुद्धिरुदाहृता ॥ १४ ॥

प्रथमतो व्यवहारनयस्थितोऽशुभविकल्पनिवृत्तिपरो भवेत् ।
शुभविकल्पमयव्रतसेवया हरति कण्टक एव हि कण्टकम् ॥ १५ ॥

विषमधीत्य पदानि शनैः शनैर्हरति मन्त्रपदावधि मान्त्रिकः ।
भवति देशनिवृत्तिरपि स्फुटा गुणकरी प्रथमं मनसस्तथा ॥ १६ ॥

च्युतमसद्विषयव्यवसायतो लगति यत्र मनोऽधिकसौष्ठवात् ।
प्रतिकृतिः पदमात्मवदेव वा तदवलम्बनमत्र शुभं मतम् ॥ १७ ॥

तदनु काचन निश्चयकल्पना विगलितव्यवहारपदावधिः ।
न किमपीति विवेचनसंमुखी भवति सर्वनिवृत्तिसमाधये ॥ १८ ॥

इह हि सर्वबहिर्विषयच्युतं हृदयमात्मनि केवलमागतम् ।
चरणदर्शनबोधपरम्परापरिचितं प्रसरत्यविकल्पकम् ॥ १९ ॥

तदिदमन्यदुपैत्यधुनापि नो नियतवस्तुविलास्यपि निश्चयात् ।
क्षणमसङ्गमुदीतनिसर्गधीहृतबहिर्ग्रहमन्तरुदात्तता ॥ २० ॥

कृतकषायजयः सगभीरिमप्रकृतिशान्तमुदात्तमुदारधीः ।
समनुगृह्य मनोऽनुभवत्यहो गलितमोहतमः परमं महः ॥ २१ ॥

गलितदुष्टविकल्पपरम्परं धृतविशुद्धि मनो भवतीदृशम् ।
धृतिमुपेत्य ततश्च महामतिः समधिगच्छति शुभ्रयशःश्रियम् ॥ २२ ॥

## सम्यक्त्वाधिकारः ॥ १२ ॥

मनःशुद्धिश्च सम्यक्त्वे सत्येव परमार्थतः ।
तद्विना मोहगर्भा सा प्रत्यपायानुबन्धिनी ॥ १ ॥

सम्यक्त्वसहिता एव शुद्धा दानादिकाः क्रियाः ।
तासां मोक्षफले प्रोक्ता यदस्य सहकारिता ॥ २ ॥

कुर्वाणोऽपि क्रियां ज्ञातिधनभोगांस्त्यजन्नपि ।
दुःखस्योरो ददानोऽपि नान्धो जयति वैरिणम् ॥ ३ ॥

कुर्वन्निवृत्तिमप्येवं कामभोगांस्त्यजन्नपि ।
दुःखस्योरो ददानोऽपि मिथ्यादृष्टिर्न सिध्यति ॥ ४ ॥

कनीनिकेव नेत्रस्य कुसुमस्येव सौरभम् ।
सम्यक्त्वमुच्यते सारः सर्वेषां धर्म्मकर्म्मणाम् ॥ ५ ॥

तत्त्वश्रद्धानमेतच्च गदितं जिनशासने ।
सर्वे जीवा न हन्तव्याः सूत्रे तत्त्वमितीष्यते ॥ ६ ॥

शुद्धो धर्मोऽयमित्येतद्धर्म्मरुच्यात्मकं स्थितम् ।
शुद्धानामिदमन्यासां रुचीनामुपलक्षणम् ॥ ७ ॥

अथवेदं यथा तत्त्वमाज्ञयैव तथाऽखिलम् ।
नवानामपि तत्त्वानामिति श्रद्धोदितार्थतः ॥ ८ ॥

इहैव प्रोच्यते शुद्धाऽहिंसा वा तत्त्वमित्यतः ।
सम्यक्त्वं दर्शितं सूत्रप्रामाण्योपगमात्मकम् ॥ ९ ॥

शुद्धाऽहिंसोक्तितः सूत्रप्रामाण्यं तत एव च ।
अहिंसाशुद्धधीरेवमन्योन्याश्रयभीर्ननु ॥ १० ॥

नैवं यस्मादहिंसायां सर्वेषामेकवाक्यता ।
तच्छुद्धतावबोधश्च संभवादिविचारणात् ॥ ११ ॥

यथाऽहिंसादयः पञ्च व्रतधर्मयमादिभिः ।
पदैः कुशलधर्माद्यैः कथ्यन्ते स्वस्वदर्शने ॥ १२ ॥

प्राहुर्भागवतास्तत्र व्रतोपव्रतपञ्चकम् ।
यमांश्च नियमान् पाशुपता धर्मान् दशाभ्यधुः ॥ १३ ॥

अहिंसा सत्यवचनमस्तैन्यं चाप्यकल्पना ।
ब्रह्मचर्यं तथाक्रोधो ह्यार्जवं शौचमेव च ॥ १४ ॥

संतोषो गुरुशुश्रूषा इत्येते दश कीर्तिताः ।
निगद्यन्ते यमाः- सांख्यैरपि व्यासानुसारिभिः ॥ १५ ॥

अहिंसा सत्यमस्तैन्यं ब्रह्मचर्यं तुरीयकम् ।
पञ्चमो व्यवहारश्चेत्येते पञ्च यमाः स्मृताः ॥ १६ ॥

अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवम् ।
अप्रमादश्च पञ्चैते नियमाः परिकीर्तिताः ॥ १७ ॥

बौद्धैः कुशलधर्माश्च दशेष्यन्ते यदुच्यते ।
हिंसास्तेयान्यथाकामं पैशुन्यं परुषानृतम् ॥ १८ ॥

संभिन्नालापव्यापादममिथ्यादृग्विपर्ययम् ।
पापकर्मेति दशधा कायवाङ्मानसैस्त्यजेत् ॥ १९ ॥

ब्रह्मादिपदवाच्यानि तान्याहुर्वैदिकादयः ।
अतः सर्वैकवाक्यत्वाद्धर्मशास्त्रमदोऽर्थकम् ॥ २० ॥

क्व चैतत्संभवो युक्त इति चिन्त्यं महात्मना ।
शास्त्रं परीक्षमाणेनाव्याकुलेनान्तरात्मना ॥ २१ ॥

प्रमाणलक्षणादेस्तु नोपयोगोऽत्र कश्चन ।
तन्निश्चयेऽनवस्थानादन्यथार्थस्थितेर्यतः ॥ २२ ॥

प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥ २३ ॥

तत्रात्मा नित्य एवेति येषामेकान्तदर्शनम् ।
हिंसादयः कथं तेषां कथमप्यात्मनोऽव्ययात् ॥ २४ ॥

मनोयोगविशेषस्य ध्वंसो मरणमात्मनः ।
हिंसा तच्चेन्न तत्त्वस्य सिद्धेरर्थसमाजतः ॥ २५ ॥

नैति बुद्धिगता दुःखोत्पादरूपेयमौचितीम् ।
पुंसि भेदाग्रहात्तस्याः परमार्थाऽव्यवस्थितेः ॥ २६ ॥

न च हिंसापदं नाशपर्यायं कथमप्यहो ।
जीवस्यैकान्तनित्यत्वेऽनुभवाबाधकं भवेत् ॥ २७ ॥

शरीरेणापि संबन्धो नित्यत्वेऽस्य न संभवी ।
विभुत्वे न च संसारः कल्पितः स्यादसंशयम् ॥ २८ ॥

आत्मक्रियां विना च स्यान्मिताणुग्रहणं कथम् ।
कथं संयोगभेदादिकल्पना चापि युज्यते ॥ २९ ॥

अदृष्टाद्देहसंयोगः स्यादन्यतरकर्म्मजः ।
इत्थं जन्मोपपत्तिश्चेन्न तद्योगाविवेचनात् ॥ ३० ॥

कथंचिन्मूर्त्ततापत्तिं विना वपुरसंक्रमात् ।
व्यापारायोगतश्चैव यत्किंचित्तदिदं जगुः ॥ ३१ ॥

निष्क्रियोऽसौ ततो हन्ति हन्यते वा न जातुचित् ।
कंचित्केनचिदित्येवं न हिंसाऽस्योपपद्यते ॥ ३२ ॥

अनित्यैकान्तपक्षेऽपि हिंसादीनामसंभवः ।
नाशहेतोरयोगेन क्षणिकत्वस्य साधनात् ॥ ३३ ॥

न च सन्तानभेदस्य जनको हिंसको भवेत् ।
सांवृतत्वादजन्यत्वात् भावत्वनियतं हि तत् ॥ ३४ ॥

नरादिक्षणहेतुश्च सूकरादेर्न हिंसकः ।
सूकरान्त्यक्षणेनैव व्यभिचारप्रसङ्गतः ॥ ३५ ॥

अनन्तरक्षणोत्पादे बुद्धलुब्धकयोस्तुला ।
नैवं तद्विरतिः क्वापि ततः शास्त्राद्यसंगतिः ॥ ३६ ॥

घटन्ते न विनाऽहिंसां सत्यादीन्यपि तत्त्वतः ।
एतस्या वृत्तिभूतानि तानि यद्भगवान् जगौ ॥ ३७ ॥

मौनीन्द्रे च प्रवचने युज्यते सर्वमेव हि ।
नित्यानित्ये स्फुटं देहाद्भिन्नाभिन्ने तथात्मनि ॥ ३८ ॥

आत्मा द्रव्यार्थतो नित्यः पर्यायार्थाद्विनश्वरः ।
हिनस्ति हन्यते तत्तत्फलान्यप्यधिगच्छति ॥ ३९ ॥

इह चानुभवः साक्षी व्यावृत्त्यन्वयगोचरः ।
एकान्तपक्षपातिन्यो युक्तयस्तु मिथो हताः ॥ ४० ॥

पीडाकर्तृत्वतो देहव्यापत्त्या दुष्टभावतः ।
त्रिधा हिंसागमप्रोक्ता नहीत्थमपहेतुका ॥ ४१ ॥

हन्तुर्जाग्रति को दोषो हिंसनीयस्य कर्म्मणि ।
प्रसक्तिस्तदभावे चान्यत्रापीति मुधा वचः ॥ ४२ ॥

हिंस्यकर्म्मविपाके यद्दुष्टाशयनिमित्तता ।
हिंसकत्वं न तेनेदं वैद्यस्य स्याद्रिपोरिव ॥ ४३ ॥

इत्थं सदुपदेशादेस्तन्निवृत्तिरपि स्फुटा ।
सोपक्रमस्य पापस्य नाशात्स्वाशयवृद्धितः ॥ ४४ ॥

अपवर्गतरोर्बीजं मुख्याऽहिंसेयमुच्यते ।
सत्यादीनि व्रतान्यत्र जायन्ते पल्लवा नवाः ॥ ४५ ॥

अहिंसासंभवश्चेत्थं दृश्यतेऽत्रैव शासने ।
अनुबन्धादिसंशुद्धिरप्यत्रैवास्ति वास्तवी ॥ ४६ ॥

हिंसाया ज्ञानयोगेन सम्यग्दृष्टेर्महात्मनः ।
तप्तलोहपदन्यासतुल्याया नानुबन्धनम् ॥ ४७ ॥

सतामस्याश्च कस्याश्चिद् यतनाभक्तिशालिनाम् ।
अनुबन्धो ह्यहिंसाया जिनपूजादिकर्म्मणि ॥ ४८ ॥

हिंसानुबन्धिनी हिंसा मिथ्यादृष्टेस्तु दुर्मतेः ।
अज्ञानशक्तियोगेन तस्याहिंसापि तादृशी ॥ ४९ ॥

येन स्यान्निह्नवादीनां दिविषद्दुर्गतिक्रमात् ।
हिंसैव महती तिर्यङ्नरकादिभवान्तरे ॥ ५० ॥

साधूनामप्रमत्तानां सा चाहिंसानुबन्धिनी ।
हिंसानुबन्धिविच्छेदाद् गुणोत्कर्षो यतस्ततः ॥ ५१ ॥

मुग्धानामियमज्ञत्वात् सानुबन्धा न कर्हिचित् ।
ज्ञानोद्रेकाप्रमादाभ्यामस्या यदनुबन्धनम् ॥ ५२ ॥

एकस्यामपि हिंसायामुक्तं सुमहदन्तरम् ।
भाववीर्यादिवैचित्र्यादहिंसायां च तत्तथा ॥ ५३ ॥

सद्यः कालान्तरे चैतद्विपाकेनापि भिन्नता ।
प्रतिपक्षान्तरालेन तथाशक्तिनियोगतः ॥ ५४ ॥

हिंसाप्युत्तरकालीनविशिष्टगुणसंक्रमात् ।
त्यक्ताविध्यनुबन्धत्वादहिंसैवातिभक्तितः ॥ ५५ ॥

ईदृग्भङ्गशतोपेताऽहिंसा यत्रोपवर्ण्यते ।
सर्वांशपरिशुद्धं तत्प्रमाणं जिनशासनम् ॥ ५६ ॥

अर्थोऽयमपरोऽनर्थ इति निर्द्धारणं हृदि ।
आस्तिक्यं परमं चिह्नं सम्यक्त्वस्य जगुर्जिनाः ॥ ५७ ॥

शमसंवेगनिर्वेदानुकम्पाभिः परिष्कृतम् ।
दधतामेतदच्छिन्नं सम्यक्त्वं स्थिरतां व्रजेत् ॥ ५८ ॥

## मिथ्यात्वत्यागाधिकारः ॥ १३ ॥

मिथ्यात्वत्यागतः शुद्धं सम्यक्त्वं जायतेऽङ्गिनाम् ।
अतस्तत्परिहाराय यतितव्यं महात्मना ॥ १ ॥

नास्ति नित्यो न कर्त्ता च न भोक्तात्मा न निर्वृतिः ।
तदुपायश्च नेत्याहुर्मिथ्यात्वस्य पदानि षट् ॥ २ ॥

एतैर्यस्माद्भवेच्छुद्धव्यवहारविलङ्घनम् ।
अयमेव च मिथ्यात्वध्वंसी सदुपदेशतः ॥ ३ ॥

नास्तित्वादिग्रहे नैवोपदेशो नोपदेशकः ।
ततः कस्योपकारः स्यात्संदेहादिव्युदासतः ॥ ४ ॥

येषां निश्चय एवेष्टो व्यवहारस्तु संगतः ।
विप्राणां म्लेच्छभाषेव स्वार्थमात्रोपदेशनात् ॥ ५ ॥

यथा केवलमात्मानं जानानः श्रुतकेवली ।
श्रुतेन निश्चयात् सर्वं श्रुतं च व्यवहारतः ॥ ६ ॥

निश्चयार्थोऽत्र नो साक्षाद्वक्तुं केनापि पार्यते ।
व्यवहारो गुणद्वारा तदर्थावगमक्षमः ॥ ७ ॥

प्राधान्यं व्यवहारे चेत्तत्तेषां निश्चये कथम् ।
परार्थस्वार्थते तुल्ये शब्दज्ञानात्मनोर्द्वयोः ॥ ८ ॥

प्राधान्याद् व्यवहारस्य ततस्तच्छेदकारिणाम् ।
मिथ्यात्वरूपतैतेषां पदानां परिकीर्त्तिता ॥ ९ ॥

नास्त्येवात्मेति चार्वाकः प्रत्यक्षानुपलम्भतः ।
अहन्ताव्यपदेशस्य शरीरेणोपपत्तितः ॥ १० ॥

मद्याङ्गेभ्यो मदव्यक्तिः प्रत्येकमसती यथा ।
मिलितेभ्यो हि भूतेभ्यो ज्ञानव्यक्तिस्तथा मता ॥ ११ ॥

राजरङ्कादिवैचित्र्यमपि नात्मबलाहितम् ।
स्वाभाविकस्य भेदस्य ग्रावादिष्वपि दर्शनात् ॥ १२ ॥

वाक्यैर्न गम्यते चात्मा परस्परविरोधिभिः ।
दृष्टवान्न च कोऽप्येनं प्रमाणं यद्वचो भवेत् ॥ १३ ॥

आत्मानं परलोकं च क्रियां च विविधां वदन् ।
भोगेभ्यो भ्रंशयत्युच्चैर्लोकचित्तं प्रतारकः ॥ १४ ॥

त्याज्यास्तन्नैहिकाः कामाः कार्या नानागतस्पृहा ।
भस्मीभूतेषु भूतेषु वृथा प्रत्यागतिस्पृहा ॥ १५ ॥

तदेतद्दर्शनं मिथ्या जीवः प्रत्यक्ष एव यत् ।
गुणानां संशयादीनां प्रत्यक्षाणामभेदतः ॥ १६ ॥

न चाहंप्रत्ययादीनां शरीरस्यैव धर्म्मता ।
नेत्रादिग्राह्यतापत्तेर्नियतं गौरवादिवत् ॥ १७ ॥

शरीरस्यैव चात्मत्वे नानुभूतस्मृतिर्भवेत् ।
बालत्वादिदशाभेदात्तस्यैकस्यानवस्थितेः ॥ १८ ॥

नात्माङ्गं विगमेप्यस्य तल्लब्धानुस्मृतिर्यतः ।
व्यये गृहगवाक्षस्य तल्लब्धार्थाधिगन्तृवत् ॥ १९ ॥

न दोषः कारणात्कार्ये वासनासंभ्रमाच्च न ।
भ्रूणस्य स्मरणापत्तेरम्बानुभवसंक्रमात् ॥ २० ॥

नोपादानादुपादेयवासनास्थैर्यदर्शने ।
करादेरतथात्वेनायोग्यत्वाप्तेरणुस्थितौ ॥ २१ ॥

मद्याङ्गेभ्यो मदव्यक्तिरपि नो मेलकं विना ।
ज्ञानव्यक्तिस्तथा भाव्याऽन्यथा सा सर्वदा भवेत् ॥ २२ ॥

राजरङ्कादिवैचित्र्यमप्यात्मकृतकर्मजम् ।
सुखदुःखादिसंवित्तिविशेषो नान्यथा भवेत् ॥ २३ ॥

आगमाद् गम्यते चात्मा दृष्टेष्टार्थाविरोधिनः ।
तद्वक्ता सर्वविच्चैनं दृष्टवान्वीतकश्मलः ॥ २४ ॥

अभ्रान्तानां च विफला नामुष्मिक्यः प्रवृत्तयः ।
परवञ्चनहेतोः कः स्वात्मानमवसादयेत् ॥ २५ ॥

सिद्धिः स्थाण्वादिवद्व्यक्ता संशयादेव चात्मनः ।
असौ खरविषाणादौ व्यस्तार्थविषयः पुनः ॥ २६ ॥

अजीव इति शब्दश्च जीवसत्तानियन्त्रितः ।
असतो न निषेधो यत्संयोगादिनिषेधनात् ॥ २७ ॥

संयोगः समवायश्च सामान्यं च विशिष्टता ।
निषिध्यते पदार्थानां त एव न तु सर्वथा ॥ २८ ॥

शुद्धं व्युत्पत्तिमज्जीवपदं सार्थं घटादिवत् ।
तदर्थश्च शरीरं नो पर्यायपदभेदतः ॥ २९ ॥

आत्मव्यवस्थितेस्त्याज्यं ततश्चार्वाकदर्शनम् ।
पापाः किलैतदालापाः सद्व्यापारविरोधिनः ॥ ३० ॥

ज्ञानक्षणावलीरूपो नित्यो नात्मेति सौगताः ।
क्रमाक्रमाभ्यां नित्यत्वे युज्यतेऽर्थक्रिया न हि ॥ ३१ ॥

स्वभावहानितो ध्रौव्यं क्रमेणार्थक्रियाकृतौ ।
अक्रमेण च तद्भावे युगपत्सर्वसंभवः ॥ ३२ ॥

क्षणिके तु न दोषोऽस्मिन् कुर्वद्रूपविशेषिते ।
ध्रुवेक्षणोत्थतृष्णाया निवृत्तेश्च गुणो महान् ॥ ३३ ॥

मिथ्यात्ववृद्धिकृन्नूनं तदेतदपि दर्शनम् ।
क्षणिके कृतहानिर्यत्तथात्मन्यकृतागमः ॥ ३४ ॥

एकद्रव्यान्वयाभावाद्वासनासंक्रमश्च न ।
पौर्वापर्य्यं हि भावानां सर्वत्रातिप्रसक्तिमत् ॥ ३५ ॥

कुर्वद्रूपविशेषे च न प्रवृत्तिर्न वाऽनुमा ।
अनिश्चयान्न वाध्यक्षं तथा चोदयनो जगौ ॥ ३६ ॥

न वैजात्यं विना तत् स्यान्न तस्मिन्ननुमा भवेत् ।
विना तेन न तत्सिद्धिर्नाध्यक्षं निश्चयं विना ॥ ३७ ॥

एकताप्रत्यभिज्ञानं क्षणिकत्वं च बाधते ।
योऽहमन्वभवं सोऽहं स्मरामीत्यवधारणात् ॥ ३८ ॥

नास्मिन्विषयबाधो यत् क्षणिकेऽपि यथैकता ।
नानाज्ञानान्वये तद्वत् स्थिरे नानाक्षणान्वये ॥ ३९ ॥

नानाकार्यैक्यकरणस्वाभाव्ये च विरुध्यते ।
स्याद्वादसन्निवेशेन नित्यत्वेऽर्थक्रिया न हि ॥ ४० ॥

नीलादावप्यतद्भेदशक्तयः सुवचाः कथम् ।
परेणापि हि नानैकस्वभावोपगमं विना ॥ ४१ ॥

ध्रुवेक्षणेऽपि न प्रेम निवृत्तमनुपप्लवात् ।
ग्राह्याकार इव ज्ञाने गुणस्तन्नात्र दर्शने ॥ ४२ ॥

प्रत्युतानित्यभावे हि स्वतः क्षणजनुर्धिया ।
हेत्वनादरतः सर्वक्रियाविफलता भवेत् ॥ ४३ ॥

तस्मादिदमपि त्याज्यमनित्यत्वस्य दर्शनम् ।
नित्यसत्यचिदानन्दपदसंसर्गमिच्छता ॥ ४४ ॥

न कर्त्ता नापि भोक्तात्मा कापिलानां तु दर्शने ।
जन्यधर्माश्रयो नायं प्रकृतिः परिणामिनी ॥ ४५ ॥

प्रथमः परिणामोऽस्या बुद्धिर्धर्माष्टकाऽन्विता ।
ततोऽहंकारतन्मात्रेन्द्रियभूतोदयः क्रमात् ॥ ४६ ॥

चिद्रूपपुरुषो बुद्धेः सिद्ध्येच्चैतन्यमानतः ।
सिद्धिस्तस्याश्चाविषयाऽवच्छेदनियमाश्रितः ॥ ४७ ॥

हेतुत्वे पुंस्प्रकृत्यर्थेन्द्रियाणामत्र निर्वृत्तिः ।
दृष्टादृष्टविभागश्च व्यासङ्गश्च न युज्यते ॥ ४८ ॥

स्वप्ने व्याघ्रादिसंकल्पान्नरत्वानभिमानतः ।
अहंकारश्च नियतव्यापारः परिकल्प्यते ॥ ४९ ॥

तन्मात्रादिक्रमस्तस्मात्प्रपञ्चोत्पत्तिहेतवे ।
इत्थं बुद्धिर्जगत्कर्त्री पुरुषो न विकारभाक् ॥ ५० ॥

पुरुषार्थोपरागौ द्वौ व्यापारावेश एव च ।
अत्रांशा वेद्म्यहं वस्तु करोमीति च धीस्ततः ॥ ५१ ॥

चेतनोऽहं करोमीति बुद्धेर्भेदाऽग्रहात्स्मयः ।
एतन्नाशेऽनवच्छिन्नं चैतन्यं मोक्ष इष्यते ॥ ५२ ॥

कर्तृबुद्धिगते दुःखसुखे पुंस्युपचारतः ।
नरनाथे यथा भृत्यगतौ जयपराजयौ ॥ ५३ ॥

कर्त्ता भोक्ता च नो तस्मादात्मा नित्यो निरञ्जनः ।
अध्यासादन्यथाबुद्धिस्तथा चोक्तं महात्मना ॥ ५४ ॥

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वथा ।
अहंकारविमूढात्मा कर्त्ताहमिति मन्यते ॥ ५५ ॥

विचार्यमाणं नो चारु तदेतदपि दर्शनम् ।
कृतिचैतन्ययोर्व्यक्तं सामानाधिकरण्यतः ॥ ५६ ॥

बुद्धिः कर्त्री च भोक्त्री च नित्या चेन्नास्ति निर्वृतिः ।
अनित्या चेन्न संसारः प्राग्धर्मादिरयोगतः ॥ ५७ ॥

प्रकृतावेव धर्मादिस्वीकारे बुद्धिरेव का ।
सुवचश्च घटादौ स्यादीदृग्धर्म्मान्वयस्तथा ॥ ५८ ॥

कृतिभोगौ च बुद्धेश्चेद्बन्धो मोक्षश्च नात्मनः ।
ततश्चात्मानमुद्दिश्य कूटमेतद्यदुच्यते ॥ ५९ ॥

पञ्चविंशतितत्त्वज्ञो यत्र यत्राश्रमे रतः ।
जटी मुण्डी शिखी चापि मुच्यते नात्र संशयः ॥ ६० ॥

एतस्य चोपचारत्वे मोक्षशास्त्रं वृथाखिलम् ।
अन्यस्य हि विमोक्षार्थे न कोऽप्यन्यः प्रवर्तते ॥ ६१ ॥

कापिलानां मते तस्मादस्मिन्नैवोचिता रतिः ।
यत्रानुभवसंसिद्धः कर्त्ता भोक्ता च लुप्यते ॥ ६२ ॥

नास्ति निर्वाणमित्याहुरात्मनः केऽप्यबन्धतः ।
प्राक्पश्चाद्युगपद्वापि कर्म्मबन्धाव्यवस्थितेः ॥ ६३ ॥

अनादिर्यदि संबन्ध इष्यते जीवकर्मणोः ।
तदानन्त्यान्न मोक्षः स्यात्तदात्माकाशयोगवत् ॥ ६४ ॥

तदेतदत्यसंबद्धं यन्मिथो हेतुकार्ययोः ।
संतानानादिता बीजाङ्कुरवत् देहकर्मणोः ॥ ६५ ॥

कर्त्ता कर्मान्वितो देहे जीवः कर्मणि देहयुक् ।
क्रियाफलोपभक्कुम्भे दण्डान्वितकुलालवत् ॥ ६६ ॥

अनादिसंततेर्नाशः स्याद्बीजाङ्कुरयोरिव ।
कुकुट्यण्डकयोः स्वर्णमलयोरिव चानयोः ॥ ६७ ॥

भव्येषु च व्यवस्थेयं संबन्धो जीवकर्मणोः ।
अनाद्यनन्तोऽभव्यानां स्यादात्माकाशयोगवत् ॥ ६८ ॥

द्रव्यभावे समानेऽपि जीवाजीवत्वभेदवत् ।
जीवभावे समानेऽपि भव्याभव्यत्वयोर्भिदा ॥ ६९ ॥

स्वाभाविकं च भव्यत्वं कलशप्रागभाववत् ।
नाशकारणसाम्राज्याद्विनश्यन्न विरुद्ध्यते ॥ ७० ॥

भव्योच्छेदो न चैवं स्याद्गुर्वानन्त्यान्नभोंशवत् ।
प्रतिमादलवत् क्वापि फलाभावेपि योग्यता ॥ ७१ ॥

नैतद्वयं वदामो यद्भव्यः सर्वोऽपि सिध्यति ।
यस्तु सिध्यति सोऽवश्यं भव्य एवेति नो मतम् ॥ ७२ ॥

ननु मोक्षेऽपि जन्यत्वाद्विनाशिनी भवस्थितिः ।
नैवं प्रध्वंसवत्तस्यानिधनत्वव्यवस्थितेः ॥ ७३ ॥

आकाशस्येव वैविकृत्यान्मुद्गरादेर्घटक्षये ।
ज्ञानादेः कर्मणो नाशे नात्मनो जायतेऽधिकम् ॥ ७४ ॥

न च कर्माणुसंबन्धान्मुक्तस्यापि न मुक्तता ।
योगानां बन्धहेतूनामपुनर्भवसंभवात् ॥ ७५ ॥

सुखस्य तारतम्येन प्रकर्षस्यापि संभवात् ।
अनन्तसुखसंवित्तिर्मोक्षः सिध्यति निर्भयः ॥ ७६ ॥

वचनं नास्तिकाभानां मोक्षसत्तानिषेधकम् ।
भ्रान्तानां तेन नादेयं परमार्थगवेषिणा ॥ ७७ ॥

न मोक्षोपाय इत्याहुरपरे नास्तिकोपमाः ।
कार्यमस्ति न हेतुश्चेत्येषा तेषां कदर्थना ॥ ७८ ॥

अकस्मादेव भवतीत्यलीकं नियतावधेः ।
कादाचित्कस्य दृष्टत्वाद् बभाषे तार्किकोऽप्यदः ॥ ७९ ॥

हेतुभूतिनिषेधो न स्वानुपाख्याविधिर्न च ।
स्वभाववर्णना नैवमवधेर्नियतत्वतः ॥ ८० ॥

न च सार्वदिको मोक्षः संसारस्यापि दर्शनात् ।
न चेदानीं न तद्व्यक्तिव्यञ्जको हेतुरेव यत् ॥ ८१ ॥

मोक्षोपायोऽस्तु किंत्वस्य निश्चयो नेति चेन्मतम् ।
तन्न रत्नत्रयस्यैव तथा भावविनिश्चयात् ॥ ८२ ॥

भवकारणरागादिप्रतिपक्षमदः खलु ।
तद्विपक्षस्य मोक्षस्य कारणं घटतेतराम् ॥ ८३ ॥

अथ रत्नत्रयप्राप्तेः प्राक्कर्मलघुता यथा ।
परतोऽपि तथैव स्यादिति किं तदपेक्षया ॥ ८४ ॥

नैवं यत्पूर्वसेवेव मृद्वी नो साधनक्रिया ।
सम्यक्त्वादिक्रिया तस्माद् दृढैव शिवसाधनम् ॥ ८५ ॥

गुणाः प्रादुर्भवन्त्युच्चैरथवा कर्मलाघवात् ।
तथाभव्यतया तेषां कुतोऽपेक्षानिवारणम् ॥ ८६ ॥

तथाभव्यतयाक्षेपाद् गुणा न च न हेतवः ।
अन्योन्यसहकारित्वाद् दण्डचक्रभ्रमादिवत् ॥ ८७ ॥

ज्ञानदर्शनचारित्राण्युपायास्तद्भवक्षये ।
एतन्निषेधकं वाक्यं त्याज्यं मिथ्यात्ववृद्धिकृत् ॥ ८८ ॥

मिथ्यात्वस्य पदान्येतान्युत्सृज्योत्तमधीधनः ।
*भावयेत्प्रातिलोम्येन सम्यक्त्वस्य* पदानि षट् ॥ ८९ ॥

# असद्ग्रहत्यागाधिकारः ॥ १४ ॥

मिथ्यात्वदावानलनीरवाहमसद्ग्रहत्यागमुदाहरन्ति ।
अतो रतिस्तत्र बुधैर्विधेया विशुद्धभावैः श्रुतसारवद्भिः ॥ १ ॥

असद्ग्रहाग्निज्वलितं यदन्तः क्व तत्र तत्त्वव्यवसायवल्लिः ।
प्रशान्तिपुष्पाणि हितोपदेशफलानि चान्यत्र गवेषयन्तु ॥ २ ॥

अधीत्य किंचिच्च निशम्य किंचिदसद्ग्रहात्पण्डितमानिनो ये ।
मुखं सुखं चुम्बितमस्तु वाचो लीलारहस्यं तु न तैर्जगाहे ॥ ३ ॥

असद्ग्रहोत्सर्पदतुच्छदर्पैर्बोधांशतोन्धीकृतमुग्धलोकैः ।
विडम्बिता हन्त जडैर्वितण्डापाण्डित्यकण्डूलतया त्रिलोकी ॥ ४ ॥

विधोर्विवेकस्य न यत्र दृष्टिस्तमोघनं तत्त्वरविर्विलीनः ।
अशुक्लपक्षस्थितिरेष नूनमसद्ग्रहः कोऽपि कुहूविलासः ॥ ५ ॥

कुतर्कदात्रेण लुनाति तत्त्ववल्लीं रसात्सिञ्चति दोषवृक्षम् ।
क्षिपत्यधः स्वादुफलं शमाख्यमसद्ग्रहच्छन्नमतिर्मनुष्यः ॥ ६ ॥

असद्ग्रहग्रावमये हि चित्ते न क्वापि सद्भावरसप्रवेशः ।
इहाङ्कुरश्चित्त विशुद्धबोधः सिद्धान्तवाचां बत कोऽपराधः॥ ७ ॥

व्रतानि चीर्णानि तपोऽपि तप्तं कृता प्रयत्नेन च पिण्डशुद्धिः ।
अभूत्फलं यत्तु न निह्नवानामसद्ग्रहस्यैव हि सोऽपराधः॥ ८ ॥

स्थालं स्वबुद्धिः सुगुरोश्च दातुरुपस्थिता काचन मोदकाली ।
असद्ग्रहः कोऽपि गलेग्रहीता तथापि भोक्तुं न ददाति दुष्टः ॥ ९ ॥

गुरुप्रसादीक्रियमाणमर्थं गृह्णाति नासद्ग्रहवांस्ततः किम् ।
द्राक्षा हि साक्षादुपनीयमानाः क्रमेलकः कण्टकभुङ् न भुङ्क्ते ॥ १० ॥

असद्ग्रहात्पामरसंगतिं ये कुर्वन्ति तेषां न रतिर्बुधेषु ।
विष्ठासु पुष्टाः किल वायसा नो मिष्टान्ननिष्ठाः प्रसभं भवन्ति॥ ११ ॥

नियोजयत्येव मतिं न युक्तौ युक्तिं मतौ यः प्रसभं नियुङ्क्ते ।
असद्ग्रहादेव न कस्य हास्योऽजले घटारोपणमादधानः ॥ १२ ॥

असद्ग्रहो यस्य गतो न नाशं न दीयमानं श्रुतमस्य शस्यम् ।
न नाम वैकल्यकलङ्कितस्य प्रौढा प्रदातुं घटते नृपश्रीः॥ १३ ॥

आमे घटे वारि धृतं यथा सद्विनाशयेत्स्वं च घटं च सद्यः ।
असद्ग्रहग्रस्तमतेस्तथैव श्रुतात्प्रदत्तादुभयोर्विनाशः ॥ १४ ॥

असद्ग्रहग्रस्तमतेः प्रदत्ते हितोपदेशं खलु यो विमूढः ।
शुनीशरीरे स महोपकारी कस्तूरिकालेपनमादधाति ॥ १५ ॥

कष्टेन लब्धं विशदागमार्थं ददाति योऽसद्ग्रहदूषिताय ।
स खिद्यते यत्नशतोपनीतं बीजं वपन्नूषरभूमिदेशे ॥ १६ ॥

शृणोति शास्त्राणि गुरोस्तदाज्ञां करोति नासद्ग्रहवान् कदाचित् ।
विवेचकत्वं मनुते त्वसारग्राही भुवि स्वस्य च चालनीवत् ॥ १७ ॥

दम्भाय चातुर्यमघाय शास्त्रं प्रतारणाय प्रतिभापटुत्वम् ।
गर्वाय धीरत्वमहो गुणानामसद्ग्रहस्थे विपरीतसृष्टिः ॥ १८ ॥

असद्ग्रहस्थेन समं समन्तात्सौहार्दभृद्दुःखमवैति तादृग् ।
उपैति यादृक्कदली कुवृक्षस्फुटत्त्रुटत्कण्टककोटिकीर्णा ॥ १९ ॥

विद्या विवेको विनयो विशुद्धिः सिद्धान्तवाल्लभ्यमुदारता च ।
असद्ग्रहाद्यान्ति विनाशमेते गुणास्तृणानीव कणाद्दवाग्नेः॥ २० ॥

स्वार्थः प्रियो नो गुणवांस्तु कश्चिन्मूढेषु मैत्री न तु तत्त्ववित्सु ।
असद्ग्रहापादितविभ्रमाणां स्थितिः किलासावधमाधमानाम्॥ २१ ॥

इदं विदंस्तत्त्वमुदारबुद्धिरसद्ग्रहं यस्तृणवज्जहाति ।
जहाति नैनं कुलजेव योषिद् गुणानुरक्ता दयितं यशःश्रीः ॥ २२ ॥

# योगाधिकारः ॥ १५ ॥

असद्ग्रहव्ययाद् वान्तमिथ्यात्वविषविप्रुषः ।
सम्यक्त्वशालिनोऽध्यात्मशुद्धेर्योगः प्रसिध्यति ॥ १ ॥

कर्मज्ञानविभेदेन स द्विधा तत्र चादिमः ।
आवश्यकादिविहितक्रियारूपः प्रकीर्त्तितः ॥ २ ॥

शारीरस्पन्दकर्मात्मा यदयं पुण्यलक्षणः ।
कर्मातनोति सद्रागात्कर्मयोगस्ततः स्मृतः ॥ ३ ॥

आवश्यकादिरागेण वात्सल्याद्भगवद्गिराम् ।
प्राप्नोति स्वर्गसौख्यानि न याति परमं पदम् ॥ ४ ॥

ज्ञानयोगस्तपः शुद्धमात्मरत्येकलक्षणम् ।
इन्द्रियार्थोन्मनीभावात् स मोक्षसुखसाधकः ॥ ५ ॥

न परप्रतिबन्धोऽस्मिन्नल्पोऽप्येकात्मवेदनात् ।
शुभं कर्मापि नैवात्र व्याक्षेपायोपजायते ॥ ६ ॥

न ह्यप्रमत्तसाधूनां क्रियाप्यावश्यकादिका ।
नियता ध्यानशुद्धत्वाद्यदन्यैरप्यदः स्मृतम् ॥ ७ ॥

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः ।
आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यते ॥ ८ ॥

नैवं तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रयः ॥ ९ ॥

अवकाशो निषिद्धोऽस्मिन्नरत्यानन्दयोरपि ।
ध्यानावष्टम्भतः क्वास्तु तत्क्रियाणां विकल्पनम् ॥ १० ॥

देहनिर्वाहमात्रार्था यापि भिक्षाटनादिका ।
क्रिया सा ज्ञानिनोऽसङ्गान्नैव ध्यानविघातिनी ॥ ११ ॥

रत्नशिक्षादृगन्या हि तन्नियोजनदृग् यथा ।
फलभेदात्तथाचारक्रियाप्यस्य विभिद्यते ॥ १२ ॥

ध्यानार्था हि क्रिया सेयं प्रत्याहृत्य निजं मनः ।
प्रारब्धजन्मसंकल्पादात्मज्ञानाय कल्पते ॥ १३ ॥

स्थिरीभूतमपि स्वान्तं रजसा चलतां व्रजेत् ।
प्रत्याहृत्य निगृह्णाति ज्ञानी यदिदमुच्यते ॥ १४ ॥

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् ॥ १५ ॥

यतो यतो निःसरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ॥ १६ ॥

अत एवादृढस्वान्तः कुर्याच्छास्त्रोदितां क्रियाम् ।
सकलां विषयप्रत्याहरणाय महामतिः ॥ १७ ॥

श्रुत्वा पैशाचिकीं वार्तां कुलवध्वाश्च रक्षणम् ।
नित्यं संयमयोगेषु व्यापृतात्मा भवेद्यतिः ॥ १८ ॥

या निश्चयैकलीनानां क्रिया नातिप्रयोजनाः ।
व्यवहारदशास्थानां ता एवातिगुणावहाः ॥ १९ ॥

कर्मणोऽपि हि शुद्धस्य श्रद्धामेधादियोगतः ।
अक्षतं मुक्तिहेतुत्वं ज्ञानयोगानतिक्रमात् ॥ २० ॥

अभ्यासे सत्क्रियापेक्षा योगिनां चित्तशुद्धये ।
ज्ञानपाके शमस्यैव यत्परैरप्यदः स्मृतं ॥ २१ ॥

आरुरुक्षोर्मुनेर्योगं कर्मकारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ २२ ॥

यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्यते ।
सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ २३ ॥

ज्ञानं क्रियाविहीनं न क्रिया वा ज्ञानवर्जिता ।
गुणप्रधानभावेन दशाभेदः किलैनयोः ॥ २४ ॥

ज्ञानिनां कर्मयोगेन चित्तशुद्धिमुपेयुषाम् ।
निरवद्यप्रवृत्तीनां ज्ञानयोगौचिती ततः ॥ २५ ॥

अत एव हि सुश्राद्धाचरणस्पर्शनोत्तरम् ।
दुष्पालश्रमणाचारग्रहणं विहितं जिनैः ॥ २६ ॥

एकोद्देशेन संवृत्तं कर्म यत्पौर्वभूमिकम् ।
दोषोच्छेदकरं तत्स्याद् ज्ञानयोगप्रवृद्धये ॥ २७ ॥

अज्ञानिनां तु यत्कर्म न ततश्चित्तशोधनम् ।
यागादेरतथाभावान् म्लेच्छादिकृतकर्मवत् ॥ २८ ॥

न च तत्कर्मयोगेऽपि फलसंकल्पवर्जनात् ।
संन्यासो ब्रह्मबोधाद्वा सावद्यत्वात्स्वरूपतः ॥ २९ ॥

नो चेदित्थं भवेच्छुद्धिर्गोहिंसादेरपि स्फुटा ।
श्येनाद्वा वेदविहिताद्विशेषानुपलक्षणात् ॥ ३० ॥

सावद्यकर्म नो तस्मादादेयं बुद्धिविप्लवात् ।
कर्मोदयागते त्वस्मिन्नसंकल्पादबन्धनम् ॥ ३१ ॥

कर्माप्याचरतो ज्ञातुर्मुक्तो भावो न हीयते ।
तत्र संकल्पजो बन्धो गीयते यत्परैरपि ॥ ३२ ॥

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्म्मकृत् ॥ ३३ ॥

कर्मण्यकर्म वाऽकर्म कर्म्मण्यस्मिन्नुभे अपि ।
नोभे वा भङ्गवैचित्र्यादकर्मण्यपि नो मते ॥ ३४ ॥

कर्म नैष्कर्म्य वैषम्यमुदासीनो विभावयन् ।
ज्ञानी न लिप्यते भोगैः पद्मपत्रमिवाम्भसा ॥ ३५ ॥

पापाकरणमात्राद्धि न मौनं विचिकित्सया ।
अनन्यपरमात्साम्यात् ज्ञानयोगी भवेन्मुनिः ॥ ३६ ॥

विषयेषु न रागी वा द्वेषी वा मौनमश्नुते ।
समं रूपं विदंस्तेषु ज्ञानयोगी न लिप्यते ॥ ३७ ॥

सतत्त्वचिन्तया यस्याभिसमन्वागता इमे ।
आत्मवान् ज्ञानवान्वेद धर्मब्रह्ममयो हि सः ॥ ३८ ॥

वैषम्यबीजमज्ञानं निघ्नन्ति ज्ञानयोगिनः ।
विषयांस्ते परिज्ञाय लोकं जानन्ति तत्त्वतः ॥ ३९ ॥

इतश्चापूर्वविज्ञानाच्चिदानन्दविनोदिनः ।
ज्योतिष्मन्तो भवन्त्येते ज्ञाननिर्धूतकल्मषाः ॥ ४० ॥

तेजोलेश्याविवृद्धिर्या पर्यायक्रमवृद्धितः ।
भाषिता भगवत्यादौ सेत्थम्भूतस्य युज्यते ॥ ४१ ॥

विषमेऽपि समेक्षी यः स ज्ञानी स च पण्डितः ।
जीवन्मुक्तः स्थिरं ब्रह्म तथा चोक्तं परैरपि ॥ ४२ ॥

*विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि ।*
शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ ४३ ॥

*इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।*
निर्दोषं हि समं ब्रह्म तस्माद् ब्रह्मणि ते स्थिताः ॥ ४४ ॥

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसंमूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥ ४५ ॥

अर्वाग्दशायां दोषाय वैषम्ये साम्यदर्शनम् ।
निरपेक्षमुनीनां तु रागद्वेषक्षयाय तत् ॥ ४६ ॥

रागद्वेषक्षयादेति ज्ञानी विषयशून्यताम् ।
छिद्यते भिद्यते वाऽयं हन्यते वा न जातुचित् ॥ ४७ ॥

अनुस्मरति नातीतं नैव काङ्क्षत्यनागतम् ।
शीतोष्णसुखदुःखेषु समो मानापमानयोः ॥ ४८ ॥

जितेन्द्रियो जितक्रोधो मानमायानुपद्रुतः ।
लोभसंस्पर्शरहितो वेदखेदविवर्जितः ॥ ४९ ॥

संनिरुध्यात्मनात्मानं स्थितः स्वकृतकर्मवित् ।
हठप्रयत्नोपरतः सहजाचारसेवनात् ॥ ५० ॥

लोकसंज्ञाविनिर्मुक्तो मिथ्याचारप्रपञ्चहृत् ।
उल्लसत्कण्डकस्थानः परेण परमाश्रितः ॥ ५१ ॥

श्रद्धावानाज्ञया युक्तः शस्त्रातीतो ह्यशस्त्रवान् ।
गतो दृष्टेषु निर्वेदमनिह्नुतपराक्रमः ॥ ५२ ॥

निक्षिप्तदण्डो ध्यानाग्निदग्धपापेन्धनव्रजः ।
प्रतिस्त्रोतोऽनुगत्वेन लोकोत्तरचरित्रभृत् ॥ ५३ ॥

लब्धान् कामान्बहिष्कुर्वन्नकुर्वन्बहुरूपताम् ।
स्फारीकुर्वन् परं चक्षुरपरं च निमीलयन् ॥ ५४ ॥

पश्यन्नन्तर्गतान् भावान् पूर्णभावमुपागतः ।
भुञ्जानोऽध्यात्मसाम्राज्यमवशिष्टं न पश्यति ॥ ५५ ॥

श्रेष्ठो हि ज्ञानयोगोऽयमध्यात्मन्येव यज्जगौ ।
बन्धप्रमोक्षं भगवान् लोकसारे सुनिश्चितम् ॥ ५६ ॥

उपयोगैकसारत्वादाश्वसंमोहबोधतः ।
मोक्षाप्तेर्युज्यते चैतत्तथाचोक्तं परैरपि ॥ ५७ ॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽप्यधिको मतः ।
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ५८ ॥

समापत्तिरिह व्यक्तमात्मनः परमात्मनि ।
अभेदोपासनारूपस्ततः श्रेष्ठतरो ह्ययम् ॥ ५९ ॥

उपासना भागवती सर्वेभ्योऽपि गरीयसी ।
महापापक्षयकरी तथा चोक्तं परैरपि ॥ ६० ॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मां स मे युक्ततमो मतः ॥ ६१ ॥

उपास्ते ज्ञानवान् देवं यो निरञ्जनमव्ययम् ।
स तु तन्मयतां याति ध्याननिर्धूतकल्मषः ॥ ६२ ॥

विशेषमप्यजानानो यः कुग्रहविवर्जितः ।
सर्वज्ञं सेवते सोऽपि सामान्ययोगमास्थितः ॥ ६३ ॥

सर्वज्ञो मुख्य एकस्तत्प्रतिपत्तिश्च यावताम् ।
सर्वेपि ते तमापन्ना मुख्यं सामान्यतो बुधाः ॥ ६४ ॥

न ज्ञायते विशेषस्तु सर्वथा सर्वदर्शिभिः ।
अतो न ते तमापन्ना विशिष्य भुवि केचन ॥ ६५ ॥

सर्वज्ञप्रतिपत्त्यंशात्तुल्यता सर्वयोगिनाम् ।
दूरासन्नादिभेदस्तु तद्भृत्यत्वं निहन्ति न ॥ ६६ ॥

माध्यस्थ्यमवलम्ब्यैव देवतातिशयस्य हि ।
सेवा सर्वैर्बुधैरिष्टा कालातीतोऽपि यज्जगौ ॥ ६७ ॥

अन्येषामप्ययं मार्गो मुक्ताविद्यादिवादिनाम् ।
अभिधानादिभेदेन तत्त्वनीत्या व्यवस्थितः ॥ ६८ ॥

मुक्तो बुद्धोऽर्हन्वापि यदैश्वर्येण समन्वितः ।
तदीश्वरः स एव स्यात् संज्ञाभेदोऽत्र केवलम् ॥ ६९ ॥

अनादिशुद्ध इत्यादिर्यो भेदो यस्य कल्प्यते ।
तत्तन्त्रानुसारेण मन्ये सोऽपि निरर्थकः ॥ ७० ॥

विशेषस्यापरिज्ञानाद् युक्तीनां जातिवादतः ।
प्रायो विरोधतश्चैव फलाभेदाच्च भावतः ॥ ७१ ॥

अविद्याक्लेशकर्मादि यतश्च भवकारणम् ।
ततः प्रधानमेवैतत्संज्ञाभेदमुपागतम् ॥ ७२ ॥

अस्यापि योऽपरो भेदश्चित्रोपाधिस्तथा तथा ।
गीयतेऽतीतहेतुभ्यो धीमतां सोऽप्यपार्थकः ॥ ७३ ॥

ततोऽस्थानप्रयासोऽयं यत्तद्भेदनिरूपणम् ।
सामान्यमनुमानस्य यतश्च विषयो मतः ॥ ७४ ॥

संक्षिप्तरुचिजिज्ञासोर्विशेषानवलम्बनम् ।
चारिसंजीवनीचारज्ञातादत्रोपयुज्यते ॥ ७५ ॥

जिज्ञासापि सतां न्याय्या यत्परेऽपि वदन्त्यदः ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते ॥ ७६ ॥

आर्तो जिज्ञासुरर्थार्थी ज्ञानी चेति चतुर्विधाः ।
उपासकास्त्रयस्तत्र धन्या वस्तुविशेषतः ॥ ७७ ॥

ज्ञानी तु शान्तविक्षेपो नित्यभक्तिर्विशिष्यते ।
अत्यासन्नो ह्यसौ भर्तुरन्तरात्मा सदाशयः ॥ ७८ ॥

कर्मयोगविशुद्धस्तज्ज्ञाने युञ्जीत मानसम् ।
अज्ञश्चाश्रद्दधानश्च संशयानो विनश्यति ॥ ७९ ॥

निर्भयः स्थिरनासाग्रदत्तदृष्टिर्व्रते स्थितः ।
सुखासनः प्रसन्नास्यो दिशश्चानवलोकयन् ॥ ८० ॥

देहमध्यशिरोग्रीवमवक्रं धारयन्बुधः ।
दन्तैरसंस्पृशन् दन्तान् सुश्लिष्टाधरपल्लवः ॥ ८१ ॥

आर्त्तरौद्रे परित्यज्य धर्म्ये शुक्ले च दत्तधीः ।
अप्रमत्तो रतो ध्याने ज्ञानयोगी भवेन्मुनिः ॥ ८२ ॥

कर्मयोगं समभ्यस्य ज्ञानयोगसमाहितः ।
ध्यानयोगं समारुह्य मुक्तियोगं प्रपद्यते ॥ ८३ ॥

# ध्यानाधिकारः ॥ १६ ॥

स्थिरमध्यवसानं यत्तद्ध्यानं चित्तमस्थिरम् ।
भावना वाप्यनुप्रेक्षा चिन्ता वा तत्त्रिधा मतम् ॥ १ ॥

मुहूर्त्तान्तर्भवेद्ध्यानमेकार्थे मनसः स्थितिः ।
बह्वर्थसंक्रमे दीर्घाप्यच्छिन्ना ध्यानसंततिः ॥ २ ॥

आर्त्तं रौद्रं च धर्म्यं च शुक्लं चेति चतुर्विधम् ।
तत् स्याद्भेदाविह द्वौ द्वौ कारणं भवमोक्षयोः ॥ ३ ॥

शब्दादीनामनिष्टानां वियोगासंप्रयोगयोः ।
चिन्तनं वेदनायाश्च व्याकुलत्वमुपेयुषः ॥ ४ ॥

इष्टानां प्रणिधानं च संप्रयोगावियोगयोः ।
निदानचिन्तनं पापमार्त्तमित्थं चतुर्विधम् ॥ ५ ॥

कापोतनीलकृष्णानां लेश्यानामत्र संभवः ।
अनतिक्लिष्टभावानां कर्म्मणां परिणामतः ॥ ६ ॥

क्रन्दनं रुदनं प्रोच्चैः शोचनं परिदेवनम् ।
ताडनं लुञ्चनं चेति लिङ्गान्यस्य विदुर्बुधाः ॥ ७ ॥

मोघं निन्दन्निजं कृत्यं प्रशंसन् परसंपदः ।
विस्मितः प्रार्थयन्नेताः प्रसक्तश्चैतदर्जने ॥ ८ ॥

प्रमत्तश्चेन्द्रियार्थेषु गृद्धो धर्म्मपराङ्मुखः ।
जिनोक्तमपुरस्कुर्वन्नार्त्तध्याने प्रवर्त्तते ॥ ९ ॥

प्रमत्तान्तगुणस्थानानुगतं तन्महात्मनाम् ।
सर्वप्रमादमूलत्वात्त्याज्यं तिर्य्यग्गतिप्रदम् ॥ १० ॥

निर्दयं वधबन्धादिचिन्तनं निबिडक्रुधा ।
पिशुनासभ्यमिथ्यावाक् प्रणिधानं च मायया ॥ ११ ॥

चौर्य्यधीर्निरपेक्षस्य तीव्रक्रोधाकुलस्य च ।
सर्वाभिशङ्काकलुषं चित्तं च धनरक्षणे ॥ १२ ॥

एतत्सदोषकरणकारणानुमतिस्थिति ।
देशविरतिपर्यन्तं रौद्रध्यानं चतुर्विधम् ॥ १३ ॥

कापोतनीलकृष्णानां लेश्यानामत्र संभवः ।
अतिसंक्लिष्टरूपाणां कर्मणां परिणामतः ॥ १४ ॥

उत्सन्नबहुदोषत्वं नानामारणदोषता ।
हिंसादिषु प्रवृत्तिश्च कृत्वाघं स्मयमानता ॥ १५ ॥

निर्दयत्वाननुशयौ बहुमानः परापदि ।
लिङ्गान्यत्रेत्यदो धीरैस्त्याज्यं नरकदुःखदम् ॥ १६ ॥

अप्रशस्ते इमे ध्याने दुरन्ते चिरसंस्तुते ।
प्रशस्तं तु कृताभ्यासो ध्यानमारोढुमर्हति ॥ १७ ॥

भावना देशकालौ च स्वासनालम्बनक्रमान् ।
ध्यातव्यध्यात्रनुप्रेक्षालेश्यालिङ्गफलानि च ॥ १८ ॥

ज्ञात्वा धर्म्यं ततो ध्यायेच्चतस्रस्तत्र भावनाः ।
ज्ञानदर्शनचारित्रवैराग्याख्याः प्रकीर्तिताः ॥ १९ ॥

निश्चलत्वमसंमोहो निर्जरा पूर्वकर्मणाम् ।
सङ्गाशंसाभयोच्छेदः फलान्यासां यथाक्रमम् ॥ २० ॥

स्थिरचित्तः किलैताभिर्याति ध्यानस्य योग्यताम् ।
योग्यतैव हि नान्यस्य तथाचोक्तं परैरपि ॥ २१ ॥

चञ्चलं हि मनः कृष्ण ! प्रमाथि बलवत् दृढम् ।
तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम् ॥ २२ ॥

असंशयं महाबाहो मनो दुर्निग्रहं चलम् ।
अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते ॥ २३ ॥

असंयतात्मनो योगो दुष्प्राप्य इति मे मतिः ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ॥ २४ ॥

सदृशप्रत्ययावृत्त्या वैतृष्ण्याद् बहिरर्थतः ।
एतच्च युज्यते सर्वं भावनाभावितात्मनि ॥ २५ ॥

स्त्रीपशुक्लीबदुःशीलवर्जितं स्थानमागमे ।
सदा यतीनामाज्ञप्तं ध्यानकाले विशेषतः ॥ २६ ॥

स्थिरयोगस्य तु ग्रामेऽविशेषः कानने च न ।
तेन यत्र समाधानं स देशो ध्यायतो मतः ॥ २७ ॥

यत्र योगसमाधानं कालोऽपीष्टः स एव हि ।
दिनरात्रिक्षणादीनां ध्यानिनो नियमस्तु न ॥ २८ ॥

यैवावस्था जिता जातु न स्याद् ध्यानोपघातिनी ।
तया ध्यायेन्निषण्णो वा स्थितो वा शयितोऽथवा ॥ २९ ॥

सर्वासु मुनयो देशकालावस्थासु केवलम् ।
प्राप्तास्तन्नियमो नासां नियता योगसुस्थता ॥ ३० ॥

वाचना चैव पृच्छा च परावृत्यनुचिन्तने ।
क्रिया चालम्बनानीह सद्धर्मावश्यकानि च ॥ ३१ ॥

आरोहति दृढद्रव्यालम्बनो विषमं पदम् ।
तथारोहति सद्ध्यानं सूत्राद्यालम्बनाश्रितः ॥ ३२ ॥

आलम्बनादरोद्भूतप्रत्यूहक्षययोगतः ।
ध्यानाद्यारोहणभ्रंशो योगिनां नोपजायते ॥ ३३ ॥

मनोरोधादिको ध्यानप्रतिपत्तिक्रमो जिने ।
शेषेषु तु यथायोगं समाधानं प्रकीर्तितम् ॥ ३४ ॥

आज्ञापायविपाकानां संस्थानस्य च चिन्तनात् ।
धर्मध्यानोपयुक्तानां ध्यातव्यं स्याच्चतुर्विधम् ॥ ३५ ॥

नयभङ्गप्रमाणाढ्यां हेतूदाहरणान्विताम् ।
आज्ञां ध्यायेज्जिनेन्द्राणामप्रामाण्याकलङ्किताम् ॥ ३६ ॥

रागद्वेषकषायादिपीडितानां जनुष्मताम् ।
ऐहिकामुष्मिकांस्तांस्तान्नानापायान्विचिन्तयेत् ॥ ३७ ॥

ध्यायेत्कर्मविपाकं च तं तं योगानुभावजम् ।
प्रकृत्यादिचतुर्भेदं शुभाशुभविभागतः ॥ ३८ ॥

उत्पादस्थितिभङ्गादिपर्यायैर्लक्षणैः पृथक् ।
भेदैर्नामादिभिर्लोकसंस्थानं चिन्तयेद् भृतम् ॥ ३९ ॥

चिन्तयेत्तत्र कर्त्तारं भोक्तारं निजकर्मणाम् ।
अरूपमव्ययं जीवमुपयोगस्वलक्षणम् ॥ ४० ॥

तत्कर्मजनितं जन्मजरामरणवारिणा ।
पूर्णं मोहमहावर्त्तकामौर्वानलभीषणम् ॥ ४१ ॥

आशामहानिलापूर्णकषायकलशोच्छलत् ।
असद्विकल्पकल्लोलचक्रं दधतमुद्धतम् ॥ ४२ ॥

हृदि स्रोतसिकावेलासंपातदुरतिक्रमम् ।
प्रार्थनावल्लिसंतानं दुष्पूरविषयोदरम् ॥ ४३ ॥

अज्ञानदुर्दिनं व्यापद्विद्युत्पातोद्भवद्भयम् ।
कदाग्रहकुवातेन हृदयोत्कम्पकारिणम् ॥ ४४ ॥

विविधव्याधिसंबन्धमत्स्यकच्छपसंकुलम् ।
चिन्तयेच्च भवाम्भोधिं चलद्दोषाद्रिदुर्गमम् ॥ ४५ ॥

तस्य संतरणोपायं सम्यक्त्वदृढबन्धनम् ।
बहुशीलाङ्गफलकं ज्ञाननिर्यामकान्वितम् ॥ ४६ ॥

संवरास्ताश्रवच्छिद्रं गुप्तिगुप्तं समन्ततः ।
आचारमण्डपोद्दीप्तापवादोत्सर्गभूद्वयम् ॥ ४७ ॥

असंख्यैर्दुर्धरैर्योधैर्दुष्प्रधृष्यं सदाशयैः ।
सद्योगकूपस्तम्भाग्रन्यस्ताध्यात्मसितांशुकम् ॥ ४८ ॥

तपोऽनुकूलपवनोद्भूतसंवेगवेगतः ।
वैराग्यमार्गपतितं चारित्रवहनं श्रिताः ॥ ४९ ॥

सद्भावनाख्यमञ्जूषान्यस्तसच्चित्तरत्नतः ।
यथाऽविघ्नेन गच्छन्ति निर्वाणनगरं बुधाः ॥ ५० ॥

यथा च मोहपल्लीशे लब्धव्यतिकरे सति ।
संसारनाटकोच्छेदाशङ्कापङ्काविले मुहुः ॥ ५१ ॥

सज्जीकृतस्वीयभटे नावं दुर्बुद्धिनामिकाम् ।
श्रिते दुर्नीतिनौवृन्दारूढशेषभटान्विते ॥ ५२ ॥

आगच्छत्यथ धर्मेशभटौघे रणमण्डपम् ।
तत्त्वचिन्तादिनाराचसज्जीभूते समाश्रिते ॥ ५३ ॥

मिथो लग्ने रणावेशे सम्यग्दर्शनमन्त्रिणा ।
मिथ्यात्वमन्त्री विषमां प्राप्यते चरमां दशाम् ॥ ५४ ॥

लीलयैव निरुध्यन्ते कषायचरटा अपि ।
प्रशमादिमहायोधैः शीलेन स्मरतस्करः ॥ ५५ ॥

हास्यादिषट्कलुण्टाकवृन्दं वैराग्यसेनया ।
निद्रादयश्च ताड्यन्ते श्रुतोद्योगादिभिर्भटैः ॥ ५६ ॥

भटाभ्यां धर्म्यशुक्लाभ्यामार्तरौद्राभिधौ भटौ ।
निग्रहेणेन्द्रियाणां च जीयते द्रागसंयमः ॥ ५७ ॥

क्षयोपशमतश्चक्षुर्दर्शनावरणादयः ।
नश्यत्यसातसैन्यं च पुण्योदयपराक्रमात् ॥ ५८ ॥

सह द्वेषगजेन्द्रेण रागकेसरिणा तथा ।
सुतेन मोहभूपोऽपि धर्मभूपेन हन्यते ॥ ५९ ॥

ततः प्राप्तमहानन्दा धर्म्मभूपप्रसादतः ।
यथा कृतार्था जायन्ते साधवो व्यवहारिणः ॥ ६० ॥

विचिन्तयेत्तथा सर्वं धर्मध्याननिविष्टधीः ।
ईदृगन्यदपि न्यस्तमर्थजातं यदागमे ॥ ६१ ॥

मनसश्चेन्द्रियाणां च जयाद्यो निर्विकारधीः ।
धर्मध्यानस्य स ध्याता शान्तोदात्तः प्रकीर्तितः ॥ ६२ ॥

परैरपि यदिष्टं च स्थितप्रज्ञस्य लक्षणम् ।
घटते ह्यत्र तत्सर्वं तथा चेदं व्यवस्थितम् ॥ ६३ ॥

प्रजहाति यदा कामान् सर्वान् पार्थ ! मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥ ६४ ॥

दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥ ६५ ॥

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६६ ॥

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ६७ ॥

शान्तो दान्तो भवेदीदृगात्मारामतया स्थितः ।
सिद्धस्य हि स्वभावो यः सैव साधकयोग्यता ॥ ६८ ॥

ध्यातायमेव शुक्लस्याप्रमत्तः पादयोर्द्वयोः ।
पूर्वविद् योग्ययोगी च केवली परयोस्तयोः ॥ ६९ ॥

अनित्यत्वाद्यनुप्रेक्षा ध्यानस्योपरमेऽपि हि ।
भावयेन्नित्यमभ्रान्तः प्राणा ध्यानस्य ताः खलु ॥ ७० ॥

तीव्रादिभेदभाजः स्युर्लेश्यास्तिस्र इहोत्तराः ।
लिङ्गान्यत्रागमश्रद्धा विनयः सद्गुणस्तुतिः ॥ ७१ ॥

शीलसंयमयुक्तस्य ध्यायतो धर्म्यमुत्तमम् ।
स्वर्गप्राप्तिं फलं प्राहुः प्रौढपुण्यानुबन्धिनीम् ॥ ७२ ॥

ध्यायेच्छुक्लमथ क्षान्तिमृदुत्वार्जवमुक्तिभिः ।
छद्मस्थोऽणौ मनो धृत्वा व्यपनीय मनो जिनः ॥ ७३ ॥

सवितर्कं सविचारं सपृथक्त्वं तदादिमम् ।
नानानयाश्रितं तत्र वितर्कः पूर्वगं श्रुतम् ॥ ७४ ॥

अर्थव्यञ्जनयोगानां विचारोऽन्योन्यसंक्रमः ।
पृथक्त्वं द्रव्यपर्यायगुणान्तरगतिः पुनः ॥ ७५ ॥

त्रियोगयोगिनः साधोर्वितर्काद्यन्वितं ह्यदः ।
ईषच्चलत्तरङ्गाऽब्धेः क्षोभाभावदशानिभम् ॥ ७६ ॥

एकत्वेन वितर्केण विचारेण च संयुतम् ।
निर्वातस्थप्रदीपाभं द्वितीयं त्वेकपर्ययम् ॥ ७७ ॥

सूक्ष्मक्रियानिवृत्त्याख्यं तृतीयं तु जिनस्य तत् ।
अर्धरुद्धाङ्गयोगस्य रुद्धयोगद्वयस्य च ॥ ७८ ॥

तुरीयं तु समुच्छिन्नक्रियमप्रतिपाति तत् ।
शैलवन्निष्प्रकम्पस्य शैलेश्यां विश्ववेदिनः ॥ ७९ ॥

एतच्चतुर्विधं शुक्लध्यानमत्र द्वयोः फलम् ।
आद्ययोः सुरलोकाप्तिरन्त्ययोस्तु महोदयः ॥ ८० ॥

आश्रवापायसंसारानुभावभवसंततीः ।
अर्थे विपरिणामं वानुपश्येच्छुक्लविश्रमे ॥ ८१ ॥

द्वयोः शुक्ला तृतीये च लेश्या सा परमा मता ।
चतुर्थशुक्लभेदस्तु लेश्यातीतः प्रकीर्तितः ॥ ८२ ॥

लिङ्गं निर्मलयोगस्य शुक्लध्यानवतोऽवधः ।
असंमोहो विवेकश्च व्युत्सर्गश्चाभिधीयते ॥ ८३ ॥

अवधादुपसर्गेभ्यः कम्पते न बिभेति च ।
असंमोहान्न सूक्ष्मार्थे मायास्वपि च मुह्यति ॥ ८४ ॥

विवेकात्सर्वसंयोगाद्भिन्नमात्मानमीक्षते ।
देहोपकरणासङ्गो व्युत्सर्गाज्जायते मुनिः ॥ ८५ ॥

एतद्ध्यानक्रमं शुद्धं मत्वा भगवदाज्ञया ।
यः कुर्यादेतदभ्यासं संपूर्णाध्यात्मविद्भवेत् ॥ ८६ ॥

## ध्यानस्तुत्यधिकारः ॥ १७ ॥

यत्र गच्छति परं परिपाकं पाकशासनपदं तृणकल्पम् ।
स्वप्रकाशसुखबोधमयं तद्ध्यानमेव भवनाशि भजध्वम् ॥ १ ॥

आतुरैरपि जडैरपि साक्षात् सुत्यजा हि विषया न तु रागः ।
ध्यानवांस्तु परमद्युतिदर्शी तृप्तिमाप्य न तमृच्छति भूयः ॥ २ ॥

या निशा सकलभूतगणानां ध्यानिनो दिनमहोत्सव एषः ।
यत्र जाग्रति च तेऽभिनिविष्टा ध्यानिनो भवति तत्र सुषुप्तिः ॥ ३॥

संप्लुतोदकमिवान्धुजलानां सर्वतः सकलकर्म्मफलानाम् ।
सिद्धिरस्ति खलु यत्र तदुच्चैर्ध्यानमेव परमार्थनिदानम् ॥ ४ ॥

बाध्यते न हि कषायसमुत्थैर्मानसैर्न ततभूपनमद्भिः ।
अत्यनिष्टविषयैरपि दुःखैर्ध्यानवान्निभृतमात्मनि लीनः ॥ ५ ॥

स्पष्टदृष्टसुखसंभृतमिष्टं ध्यानमस्तु शिवशर्मगरिष्ठम् ।
नास्तिकस्तु निहतो यदि न स्यादेवमादिमयवाङ्मयदण्डात् ॥ ६ ॥

यत्र नार्कविधुतारकदीपज्योतिषां प्रसरतामवकाशः ।
ध्यानभिन्नतमसां मुदितात्मज्योतिषां तदपि भाति रहस्यम् ॥ ७ ॥

योजयत्यमितकालवियुक्तां प्रेयसीं शमरतिं त्वरितं यत् ।
ध्यानमित्रमिदमेव मतं नः किं परैर्जगति कृत्रिममित्रैः ॥ ८ ॥

वारितस्मरबलातपचारे शीलशीतलसुगन्धिनिवेशे ।
उच्छ्रिते प्रशमतल्पनिविष्टो ध्यानधाम्नि लभते सुखमात्मा ॥ ९ ॥

शीलविष्टरदमोदकपाद्यप्रातिभार्घ्यसमतामधुपर्कैः ।
ध्यानधाम्नि भवति स्फुटमात्माहूतपूतपरमातिथिपूजा ॥ १० ॥

आत्मनो हि परमात्मनि योऽभूद्भेदबुद्धिकृत एव विवादः ।
ध्यानसन्धिकृदमुं व्यपनीय द्रागभेदमनयोर्वितनोति ॥ ११ ॥

क्वामृतं विषभृते फणिलोके क्व क्षयिण्यपि विधौ त्रिदिवे वा ।
क्वाप्सरोरतिमतां त्रिदशानां ध्यान एव तदिदं बुधपेयम् ॥ १२ ॥

गोस्तनीषु न सितासु सुधायां नापि नापि वनिताधरबिम्बे ।
तं रसं कमपि वेत्ति मनस्वी ध्यानसंभवधृतौ प्रथते यः ॥ १३ ॥

इत्यवेत्य मनसा परिपक्वध्यानसंभवफले गरिमाणम् ।
तत्र यस्य रतिरेनमुपैति प्रौढधामभृतमाशु यशःश्रीः ॥ १४ ॥

## आत्मनिश्चयाधिकारः ॥ १८ ॥

आत्मज्ञानफलं ध्यानमात्मज्ञानं च मुक्तिदम् ।
आत्मज्ञानाय तन्नित्यं यत्नः कार्यो महात्मना ॥ १ ॥

ज्ञाते ह्यात्मनि नो भूयो ज्ञातव्यमवशिष्यते ।
अज्ञाते पुनरेतस्मिन् ज्ञानमन्यन्निरर्थकम् ॥ २ ॥

नवानामपि तत्त्वानां ज्ञानमात्मप्रसिद्धये ।
येनाजीवादयो भावाः स्वभेदप्रतियोगिनः ॥ ३ ॥

श्रुतो ह्यात्मपराभेदोऽनुभूतः संस्तुतोऽपि वा ।
निसर्गादुपदेशाद्वा वेत्ति भेदं तु कश्चन ॥ ४ ॥

तदेकत्वपृथक्त्वाभ्यामात्मज्ञानं हितावहम् ।
वृथैवाभिनिविष्टानामन्यथा धीर्विडम्बना ॥ ५ ॥

एक एव हि तत्रात्मा स्वभावसमवस्थितः ।
ज्ञानदर्शनचारित्रलक्षणः प्रतिपादितः ॥ ६ ॥

प्रभानैर्मल्यशक्तीनां यथा रत्नान्न भिन्नता ।
ज्ञानदर्शनचारित्रलक्षणानां तथात्मनः ॥ ७ ॥

आत्मनो लक्षणानां च व्यवहारो हि भिन्नताम् ।
षष्ठ्यादिव्यपदेशेन मन्यते न तु निश्चयः ॥ ८ ॥

घटस्य रूपमित्यत्र यथा भेदो विकल्पजः ।
आत्मनश्च गुणानां च तथा भेदो न तात्त्विकः ॥ ९ ॥

शुद्धं यदात्मनो रूपं निश्चयेनानुभूयते ।
व्यवहारो भिदाद्वारानुभावयति तत्परम् ॥ १० ॥

वस्तुतस्तु गुणानां तद्रूपं न स्वात्मनः पृथक् ।
आत्मा स्यादन्यथाऽनात्मा ज्ञानाद्यपि जडं भवेत् ॥ ११ ॥

चैतन्यपरसामान्यात् सर्वेषामेकतात्मनाम् ।
निश्चिता कर्मजनितो भेदः पुनरुपप्लवः ॥ १२ ॥

मन्यते व्यवहारस्तु भूतग्रामादिभेदतः ।
जन्मादेश्च व्यवस्थातो मिथो नानात्वमात्मनाम् ॥ १३ ॥

न चैतन्निश्चये युक्तं भूतग्रामो यतोऽखिलः ।
नामकर्मप्रकृतिजः स्वभावो नात्मनः पुनः ॥ १४ ॥

जन्मादिकोऽपि नियतः परिणामो हि कर्मणाम् ।
न च कर्मकृतो भेदः स्यादात्मन्यविकारिणि ॥ १५ ॥

आरोप्य केवलं कर्म कृतां विकृतिमात्मनि ।
भ्रमन्ति भ्रष्टविज्ञाना भीमे संसारसागरे ॥ १६ ॥

उपाधिभेदजं भेदं वेत्त्यज्ञः स्फटिके यथा ।
तथा कर्मकृतं भेदमात्मन्येवाभिमन्यते ॥ १७ ॥

उपाधिकर्मजो नास्ति व्यवहारस्त्वकर्मणः ।
इत्यागमवचो लुप्तमात्मवैरूप्यवादिना ॥ १८ ॥

एकक्षेत्रस्थितोऽप्येति नात्मा कर्मगुणान्वयम् ।
तथाभव्यस्वभावत्वाच्छुद्धो धर्मास्तिकायवत् ॥ १९ ॥

यथा तैमिरिकश्चन्द्रमप्येकं मन्यते द्विधा ।
अनिश्चयकृतोन्मादस्तथात्मानमनेकधा ॥ २० ॥

यथानुभूयते ह्येकं स्वरूपास्तित्वमन्वयात् ।
सादृश्यास्तित्वमप्येकमविरुद्धं तथात्मनाम् ॥ २१ ॥

सदसद्वादपिशुनात् संगोप्य व्यवहारतः ।
दर्शयत्येकतारत्नं सतां शुद्धनयः सुहृत् ॥ २२ ॥

नृनारकादिपर्यायैरप्युत्पन्नविनश्वरैः ।
भिन्नैर्जहाति नैकत्वमात्मद्रव्यं सदान्वयि ॥ २३ ॥

यथैकं हेम केयूरकुण्डलादिषु वर्त्तते ।
नृनारकादिभावेषु तथात्मैको निरञ्जनः ॥ २४ ॥

कर्मणस्ते हि पर्याया नात्मनः शुद्धसाक्षिणः ।
कर्म क्रियास्वभावं यदात्मात्वज स्वभाववान् ॥ २५ ॥

नाणूनां कर्मणो वासौ भवसर्गः स्वभावजः ।
एकैकविरहेऽभावान्न च तत्त्वान्तरं स्थितम् ॥ २६ ॥

श्वेतद्रव्यकृतं श्वैत्यं भित्तिभागे यथा द्वयोः ।
भात्यनन्तर्भवच्छून्यं प्रपञ्चोऽपि तथेक्ष्यताम् ॥ २७ ॥

यथा स्वप्नावबुद्धोऽर्थो विबुद्धेन न दृश्यते ।
व्यवहारमतः सर्गो ज्ञानिना न तथेक्ष्यते ॥ २८ ॥

मध्याह्ने मृगतृष्णायां पयःपूरो यथेक्ष्यते ।
तथा संयोगजः सर्गो विवेकाख्यातिविप्लवे ॥ २९ ॥

गन्धर्वनगरादीनामम्बरे डम्बरो यथा ।
तथा संयोगजः सर्वो विलासो वितथाकृतिः ॥ ३० ॥

इति शुद्धनयायत्तमेकत्वं प्राप्तमात्मनि ।
अंशादिकल्पनाप्यस्य नेष्टा यत्पूर्णवादिनः ॥ ३१ ॥

एक आत्मेति सूत्रस्याप्ययमेवाशयो मतः ।
प्रत्यग्ज्योतिषमात्मानमाहुः शुद्धनयाः खलु ॥ ३२ ॥

प्रपञ्चसंचयक्लिष्टान्मायारूपाद्बिभेमि ते ।
प्रसीद भगवन्नात्मन् शुद्धरूपं प्रकाशय ॥ ३३ ॥

देहेन सममेकत्वं मन्यते व्यवहारवित् ।
कथंचिन्मूर्ततापत्तेर्वेदनादिसमुद्भवात् ॥ ३४ ॥

तन्निश्चयो न सहते यदमूर्त्तो न मूर्त्तताम् ।
अंशेनाप्यवगाहेत पावकः शीततामिव ॥ ३५ ॥

उष्णस्याग्नेर्यथा योगाद् घृतमुष्णमिति भ्रमः ।
तथा मूर्त्ताङ्गसंबन्धादात्मा मूर्त्त इति भ्रमः ॥ ३६ ॥

न रूपं न रसो गन्धो न न स्पर्शो न चाकृतिः ।
यस्य धर्मो न शब्दो वा तस्य का नाम मूर्त्तता ॥ ३७ ॥

दृशादृश्यं हृदाग्राह्यं वाचामपि न गोचरः ।
स्वप्रकाशं हि यद्रूपं तस्य का नाम मूर्त्तता ॥ ३८ ॥

आत्मा सत्यचिदानन्दः सूक्ष्मात्सूक्ष्मः परात्परः ।
स्पृशत्यपि न मूर्त्तत्वं तथा चोक्तं परैरपि ॥ ३९ ॥

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसोऽपि परा बुद्धिर्यो बुद्धेः परतस्तु सः ॥ ४० ॥

विकले हन्त लोकेऽस्मिन्नमूर्त्ते मूर्त्तताभ्रमात् ।
पश्यत्याश्चर्यवद् ज्ञानी वदत्याश्चर्यवद्वचः ॥ ४१ ॥

वेदनापि न मूर्त्तत्वनिमित्ता स्फुटमात्मनः ।
पुद्गलानां तदापत्तेः किं त्वशुद्धस्वशक्तिजा ॥ ४२ ॥

अक्षद्वारा यथा ज्ञानं स्वयं परिणमत्ययम् ।
तथेष्टानिष्टविषयस्पर्शद्वारेण वेदनाम् ॥ ४३ ॥

विपाककालं प्राप्यासौ वेदनापरिणामभाक् ।
मूर्त्तं निमित्तमात्रं नो घटे दण्डवदन्वयि ॥ ४४ ॥

ज्ञानाख्या चेतना बोधः कर्म्माख्या द्विष्टरक्तता ।
जन्तोः कर्मफलाख्या सा वेदना व्यपदिश्यते ॥ ४५ ॥

नात्मा तस्मादमूर्त्तत्वं चैतन्यं चातिवर्तते ।
अतो देहेन नैकत्वं तस्य मूर्त्तेन कर्हिचित् ॥ ४६ ॥

सन्निकृष्टान्मनोवाणीकर्मादेरपि पुद्गलात् ।
विप्रकृष्टाद्धनादेश्च भाव्यैवं भिन्नतात्मनः ॥ ४७ ॥

पुद्गलानां गुणो मूर्त्तिरात्मा ज्ञानगुणः पुनः ।
पुद्गलेभ्यस्ततो भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ४८ ॥

धर्मस्य गतिहेतुत्वं गुणो ज्ञानं तथात्मनः ।
धर्मास्तिकायात्तद्भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ४९ ॥

अधर्मे स्थितिहेतुत्वं गुणो ज्ञानगुणोऽसुमान् ।
ततोऽधर्मास्तिकायान्यदात्मद्रव्यं जगुर्जिनाः ॥ ५० ॥

अवगाहो गुणो व्योम्नो ज्ञानं खल्वात्मनो गुणः ।
व्योमास्तिकायात्तद्भिन्नमात्मद्रव्यं जगुर्जिनाः ॥ ५१ ॥

आत्मा ज्ञानगुणः सिद्धः समयो वर्त्तनागुणः ।
तद्भिन्नं समयद्रव्यादात्मद्रव्यं जगुर्जिनाः ॥ ५२ ॥

आत्मनस्तदजीवेभ्यो विभिन्नत्वं व्यवस्थितम् ।
व्यक्तिभेदनयादेशादजीवत्वमपीष्यते ॥ ५३ ॥

अजीवा जन्मिनः शुद्धभावप्राणव्यपेक्षया ।
सिद्धाश्च निर्मलज्ञाना द्रव्यप्राणव्यपेक्षया ॥ ५४ ॥

इन्द्रियाणि बलं श्वसोच्छ्वासो ह्यायुस्तथा परम् ।
द्रव्यप्राणाश्चतुर्भेदाः पर्यायाः पुद्गलाश्रिताः ॥ ५५ ॥

भिन्नास्ते ह्यात्मनोऽत्यन्तं तदेतैर्नास्ति जीवनम् ।
ज्ञानवीर्यसदाश्वासनित्यस्थितिविकारिभिः ॥ ५६ ॥

एतत्प्रकृतिभूताभिः शाश्वतीभिस्तु शक्तिभिः ।
जीवत्यात्मा सदेत्येषा शुद्धद्रव्यनयस्थितिः ॥ ५७ ॥

जीवो जीवति न प्राणैर्विना तैरेव जीवति ।
इदं चित्रं चरित्रं के हन्त पर्यनुयुञ्जताम् ॥ ५८ ॥

नात्मा पुण्यं न वा पापमेते यत्पुद्गलात्मके ।
आद्यबालशरीरस्योपादानत्वेन कल्पिते ॥ ५९ ॥

पुण्यं कर्म शुभं प्रोक्तमशुभं पापमुच्यते ।
तत्कथं तु शुभं जन्तून् यत् पातयति जन्मनि ॥ ६० ॥

न ह्यायसस्य बन्धस्य तपनीयमयस्य च ।
पारतन्त्र्याविशेषेण फलभेदोऽस्ति कश्चन ॥ ६१ ॥

फलाभ्यां सुखदुःखाभ्यां न भेदः पुण्यपापयोः ।
दुःखान्न भिद्यते हन्त यतः पुण्यफलं सुखम् ॥ ६२ ॥

सर्वपुण्यफलं दुःखं कर्मोदयकृतत्वतः ।
तत्र दुःखप्रतीकारे विमूढानां सुखत्वधीः ॥ ६३ ॥

परिणामाच्च तापाच्च संस्काराच्च बुधैर्मतम् ।
गुणवृत्तिविरोधाच्च दुःखं पुण्यभवं सुखम् ॥ ६४ ॥

देहपुष्टेर्नरामर्त्यनारकानामपि स्फुटम् ।
महाजपोषणस्येव परिणामोऽतिदारुणः ॥ ६५ ॥

जलूकाः सुखमानिन्यः पिबन्त्यो रुधिरं यथा ।
भुञ्जाना विषयान् यान्ति दशामन्तेऽतिदारुणाम् ॥ ६६ ॥

तीव्राग्निसङ्गसंशुष्यत्पयसामयसामिव ।
यत्रौत्सुक्यात्सदाऽक्षाणां तप्तता तत्र किं सुखम् ॥ ६७ ॥

प्राक्पश्चाच्चारतिस्पर्शात्पुटपाकमुपेयुषि ।
इन्द्रियाणां गणे तापव्याप एव न निर्वृतिः ॥ ६८ ॥

सदा यत्र स्थितो द्वेषोल्लेखः स्वप्रतिपन्थिषु ।
सुखानुभवकालेऽपि तत्र तापहतं मनः ॥ ६९ ॥

स्कन्धात् स्कन्धान्तरारोपे भारस्येव न तत्त्वतः ।
अक्षाह्लादेऽपि दुःखस्य संस्कारो विनिवर्त्तते ॥ ७० ॥

सुखं दुःखं च मोहश्च तिस्रोऽपि गुणवृत्तयः ।
विरुद्धा अपि वर्त्तन्ते दुःखजात्यनतिक्रमात् ॥ ७१ ॥

क्रुद्धनागफणाभोगोपमो भोगोद्भवोऽखिलः ।
विलासश्चित्ररूपोऽपि भयहेतुर्विवेकिनाम् ॥ ७२ ॥

इत्थमेकत्वमापन्नं फलतः पुण्यपापयोः ।
मन्यते यो न मूढात्मा नान्तस्तस्य भवोदधेः ॥ ७३ ॥

दुःखैकरूपयोर्भिन्नस्तेनात्मा पुण्यपापयोः ।
शुद्धनिश्चयतः सत्यचिदानन्दमयः सदा ॥ ७४ ॥

तत् तुरीयदशाव्यङ्ग्यरूपमावरणक्षयात् ।
भात्युष्णोद्योतशीलस्य घननाशाद्रवेरिव ॥ ७५ ॥

जायन्ते जाग्रतोऽक्षेभ्यश्चित्रा धीसुखवृत्तयः ।
सामान्यं तु चिदानन्दरूपं सर्वदशान्वयि ॥ ७६ ॥

स्फुलिङ्गैर्न यथा वह्निर्दीप्यते ताप्यतेऽथवा ।
नानुभूतिपराभूती तथैताभिः किलात्मनः ॥ ७७ ॥

साक्षिणः सुखरूपस्य सुषुप्तौ निरहंकृतेः ।
यथा भानं तथा शुद्धविवेके तददतिस्फुटम् ॥ ७८ ॥

तच्चिदानन्दभावस्य भोक्तात्मा शुद्धनिश्चयात् ।
अशुद्धनिश्चयात्कर्म्मकृतयोः सुखदुःखयोः ॥ ७९ ॥

कर्मणोऽपि च भोगस्य स्रगादेर्व्यवहारतः ।
नैगमादिव्यवस्थापि भावनीयाऽनया दिशा ॥ ८० ॥

कर्त्तापि शुद्धभावानामात्मा शुद्धनयाद्विभुः ।
प्रतीत्य वृत्तिं यच्छुद्धक्षणानामेष मन्यते ॥ ८१ ॥

अनुपप्लवसाम्राज्ये विसभागपरिक्षये ।
आत्मा शुद्धस्वभावानां जननाय प्रवर्त्तते ॥ ८२ ॥

चित्तमेव हि संसारो रागादिक्लेशवासितम् ।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते ॥ ८३ ॥

यश्च चित्तक्षणः क्लिष्टो नासावात्मा विरोधतः ।
अनन्यविकृतं रूपमित्यन्वर्थं ह्यदः पदम् ॥ ८४ ॥

श्रुतं चानुपयोगश्चेत्येतन्मिथ्या यथा वचः ।
तथात्मा शुद्धरूपश्चेत्येवं शब्दनया जगुः ॥ ८५ ॥

शुद्धपर्यायरूपस्तदात्मा शुद्धः स्वभावकृत् ।
प्रथमाप्रथमत्वादिभेदोऽप्येवं हि तात्त्विकः ॥ ८६ ॥

ये तु दिक्पटदेशीयाः शुद्धद्रव्यतयात्मनः ।
शुद्धस्वभावकर्तृत्वं जगुस्तेऽपूर्वबुद्धयः ॥ ८७ ॥

द्रव्यास्तिकस्य प्रकृतिः शुद्धा संग्रहगोचरा ।
येनोक्ता संमतौ श्रीमत्सिद्धसेनदिवाकरैः ॥ ८८ ॥

तन्मते च न कर्तृत्वं भावानां सर्वदान्वयात् ।
कूटस्थः केवलं तिष्ठत्यात्मा साक्षित्वमाश्रितः ॥ ८९ ॥

कर्त्तुं व्याप्रियते नायमुदासीन इव स्थितः ।
आकाशमिव पङ्केन लिप्यते न च कर्मणा ॥ ९० ॥

स्वरूपं तु न कर्त्तव्यं ज्ञातव्यं केवलं स्वतः ।
दीपेन दीप्यते ज्योतिर्न त्वपूर्वं विधीयते ॥ ९१ ॥

अन्यथा प्रागनात्मा स्यात्स्वरूपाननुवृत्तितः ।
न च हेतुसहस्रेणाप्यात्मता स्यादनात्मनः ॥ ९२ ॥

नये तेनेह नो कर्त्ता किं त्वात्मा शुद्धभावभृत् ।
उपचारात्तु लोकेषु तत्कर्तृत्वमपीष्यताम् ॥ ९३ ॥

उत्पत्तिमात्मधर्माणां विशेषग्राहिणो जगुः ।
अव्यक्तिरावृतेस्तेषां नाभावादिति का प्रमा ॥ ९४ ॥

सत्त्वं च परसंताने नोपयुक्तं कथंचन ।
संतानिनामनित्यत्वात्संतानोऽपि न च ध्रुवः ॥ ९५ ॥

व्योमाप्युत्पत्तिमत्तत्तदवगाहात्मना ततः ।
नित्यता नात्मधर्माणां तद्दृष्टान्तबलादपि ॥ ९६ ॥

ऋजुसूत्रनयस्तत्र कर्तृतां तस्य मन्यते ।
स्वयं परिणमत्यात्मा यं यं भावं यदा यदा ॥ ९७ ॥

कर्तृत्वं परभावानामसौ नाभ्युपगच्छति ।
क्रियाद्वयं हि नैकस्य द्रव्यस्याभिमतं जिनैः ॥ ९८ ॥

भूतिर्या हि क्रिया सैव स्यादेकद्रव्यसंततौ ।
न साजात्यं विना च स्यात् परद्रव्यगुणेषु सा ॥ ९९ ॥

नन्वेवमन्यभावानां न चेत्कर्त्ता परो जनः ।
तदा हिंसादयादानहरणाद्यव्यवस्थितिः ॥ १०० ॥

सत्यं पराश्रयं न स्यात् फलं कस्यापि यद्यपि ।
तथापि स्वगतं कर्म स्वफलं नातिवर्त्तते ॥ १०१ ॥

हिनस्ति न परं कोपि निश्चयान्न च रक्षति ।
तदायुःकर्मणो नाशे मृतिर्जीवनमन्यथा || १०२ ||

हिंसादयाविकल्पाभ्यां स्वगताभ्यां तु केवलम् ।
फलं विचित्रमाप्नोति परापेक्षां विना पुमान् || १०३ ||

शरीरी म्रियतां मा वा ध्रुवं हिंसा प्रमादिनः ।
दयैव यतमानस्य वधेऽपि प्राणिनां क्वचित् || १०४ ||

परस्य युज्यते दानं हरणं वा न कस्यचित् ।
न धर्मसुखयोर्यत्ते कृतनाशादिदोषतः || १०५ ||

भिन्नाभ्यां भक्तवित्तादिपुद्गलाभ्यां च ते कुतः ।
स्वत्वापत्तिर्यतो दानं हरणं स्वत्वनाशनम् || १०६ ||

कर्मोदयाच्च तद्दानं हरणं वा शरीरिणाम् ।
पुरुषाणां प्रयासः कस्तत्रोपनमति स्वतः || १०७ ||

स्वगताभ्यां तु भावाभ्यां केवलं दानचौर्ययोः ।
अनुग्रहोपघातौ स्तः परापेक्षा परस्य न || १०८ ||

पराश्रितानां भावानां कर्तृत्वाद्यभिमानतः ।
कर्मणा बध्यतेऽज्ञानी ज्ञानवांस्तु न लिप्यते || १०९ ||

कर्त्तैवमात्मा नो पुण्यपापयोरपि कर्मणोः ।
रागद्वेषाशयानां तु कर्त्तेष्टानिष्टवस्तुषु || ११० ||

रज्यते द्वेष्टि वार्थेषु तत्तत्कार्यविकल्पतः ।
आत्मा यदा तदा कर्म भ्रमादात्मनि युज्यते || १११ ||

स्नेहाभ्यक्ततनोरङ्गं रेणुनाश्लिष्यते यथा ।
रागद्वेषानुविद्धस्य कर्मबन्धस्तथा मतः || ११२ ||

लोहं स्वक्रिययाभ्येति भ्रामकोपलसंनिधौ ।
यथा कर्म तथा चित्रं रक्तद्विष्टात्मसंनिधौ || ११३ ||

आत्मा न व्यापृतस्तत्र रागद्वेषाशयं सृजन् ।
तन्निमित्तोपनम्रेषु कर्मोपादानकर्मसु ॥ ११४ ॥

वारि वर्षन् यथाम्भोदो धान्यवर्षी निगद्यते ।
भावकर्म सृजन्नात्मा तथा पुद्गलकर्मकृत् ॥ ११५ ॥

नैगमव्यवहारौ तु ब्रूतः कर्मादिकर्तृताम् ।
व्यापारः फलपर्यन्तः परिदृष्टो यदात्मनः ॥ ११६ ॥

अन्योन्यानुगतानां का तदेतदिति वा भिदा ।
यावच्चरमपर्यायं यथा पानीयदुग्धयोः ॥ ११७ ॥

नात्मनो विकृतिं दत्ते तदेषा नयकल्पना ।
शुद्धस्य रजतस्येव शुक्तिधर्मप्रकल्पना ॥ ११८ ॥

मुषितत्वं यथा पान्थगतं पथ्युपचर्यते ।
तथा पुद्गलकर्मस्था विक्रियात्मनि बालिशैः ॥ ११९ ॥

कृष्णः शोणोऽपि वोपाधेर्नाशुद्धः स्फटिको यथा ।
रक्तो द्विष्टस्तथैवात्मा संसर्गात्पुण्यपापयोः ॥ १२० ॥

सेयं नटकला तावद् यावद्विविधकल्पना ।
यद्रूपं कल्पनातीतं तत्तु पश्यत्यकल्पकः ॥ १२१ ॥

कल्पनामोहितो जन्तुः शुक्लं कृष्णं च पश्यति ।
तस्यां पुनर्विलीनायामशुक्लाकृष्णमीक्षते ॥ १२२ ॥

तद्ध्यानं सा स्तुतिर्भक्तिः सैवोक्ता परमात्मनः ।
पुण्यपापविहीनस्य यद्रूपस्यानुचिन्तनम् ॥ १२३ ॥

शरीररूपलावण्यवप्रच्छत्रध्वजादिभिः ।
वर्णितैर्वीतरागस्य वास्तवी नोपवर्णना ॥ १२४ ॥

व्यवहारस्तुतिः सेयं वीतरागात्मवर्त्तिनाम् ।
ज्ञानादीनां गुणानां तु वर्णना निश्चयस्तुतिः ॥ १२५ ॥

पुरादिवर्णनाद्राजा स्तुतः स्यादुपचारतः ।
तत्त्वतः शौर्यगाम्भीर्यधैर्यादिगुणवर्णनात् ॥ १२६ ॥

मुख्योपचारधर्माणामविभागेन या स्तुतिः ।
न सा चित्तप्रसादाय कवित्वं कुकवेरिव ॥ १२७ ॥

अन्यथाभिनिवेशेन प्रत्युतानर्थकारिणी ।
सुतीक्ष्णखड्गधारेव प्रमादेन करे धृता ॥ १२८ ॥

मणिप्रभामणिज्ञानन्यायेन शुभकल्पना ।
वस्तुस्पर्शितया न्याय्या यावन्नानञ्जनप्रथा ॥ १२९ ॥

पुण्यपापविनिर्मुक्तं तत्त्वतस्त्वविकल्पकम् ।
नित्यं ब्रह्म सदा ध्येयमेषा शुद्धनयस्थितिः ॥ १३० ॥

आश्रवः संवरश्चापि नात्मा विज्ञानलक्षणः ।
यत्कर्मपुद्गलादानरोधावाश्रवसंवरौ ॥ १३१ ॥

आत्मादत्ते तु यैर्भावैः स्वतन्त्रः कर्मपुद्गलान् ।
मिथ्यात्वाविरती योगाः कषायास्तेऽन्तराश्रवाः ॥ १३२ ॥

भावनाधर्मचारित्रपरीषहजयादयः ।
आश्रवोच्छेदिनो धर्मा आत्मनो भावसंवराः ॥ १३३ ॥

आश्रवः संवरो न स्यात्संवरश्चाश्रवः क्वचित् ।
भवमोक्षफलाभेदोऽन्यथा स्याद्धेतुसंकरात् ॥ १३४ ॥

कर्माश्रवं च संवृण्वन्नात्मा भिन्नैर्निजाशयैः ।
करोति न परापेक्षामलम्भूष्णुः स्वतः सदा ॥ १३५ ॥

निमित्तमात्रभूतास्तु हिंसाऽहिंसादयोऽखिलाः ।
ये परप्राणिपर्याया न ते स्वफलहेतवः ॥ १३६ ॥

व्यवहारविमूढस्तु हेतूंस्तानेव मन्यते ।
बाह्यक्रियारतस्वान्तस्तत्त्वं गूढं न पश्यति ॥ १३७ ॥

हेतुत्वं प्रतिपद्यन्ते नैवैतेऽनियमस्पृशः ।
यावन्त आश्रवाः प्रोक्तास्तावन्तो हि परिश्रवाः ॥ १३८ ॥

तस्मादनियतं रूपं बाह्यहेतुषु सर्वथा ।
नियतौ भाववैचित्र्यादात्मैवाश्रवसंवरौ ॥ १३९ ॥

अज्ञानाद्विषयासक्तो बध्यते विषयैस्तु न ।
ज्ञानाद्विमुच्यते चात्मा न तु शास्त्रादिपुद्गलात् ॥ १४० ॥

शास्त्रं गुरोश्च विनयं क्रियामावश्यकानि च ।
संवराङ्गतया प्राहुर्व्यवहारविशारदाः ॥ १४१ ॥

विशिष्टा वाक्तनुस्वान्तपुद्गलास्तेऽफलावहाः ।
ये तु ज्ञानादयो भावाः संवरत्वं प्रयान्ति ते ॥ १४२ ॥

ज्ञानादिभावयुक्तेषु शुभयोगेषु तद्गतम् ।
संवरत्वं समारोप्य स्मयन्ते व्यवहारिणः ॥ १४३ ॥

प्रशस्तरागयुक्तेषु चारित्रादिगुणेष्वपि ।
शुभाश्रवत्वमारोप्य फ़लभेदं वदंन्ति ते ॥ १४४ ॥

भवनिर्वाणहेतूनां वस्तुतो न विपर्ययः ।
अज्ञानादेव तद्भानं ज्ञानी तत्र न मुह्यति ॥ १४५ ॥

तीर्थकृन्नामहेतुत्वं यत्सम्यक्त्वस्य वर्ण्यते ।
यच्चाहारकहेतुत्वं संयमस्यातिशायिनः ॥ १४६ ॥

तपःसंयमयोः स्वर्गहेतुत्वं यच्च पूर्वयोः ।
उपचारेण तद्युक्तं स्याद् घृतं दहतीतिवत् ॥ १४७ ॥

येनांशेनात्मनो योगस्तेनांशेनाश्रवो मतः ।
येनांशेनोपयोगस्तु तेनांशेनास्य संवरः ॥ १४८ ॥

तेनासावंशविश्रान्तौ बिभ्रदाश्रवसंवरौ ।
भात्यादर्श इव स्वच्छास्वच्छभागद्वयः सदा ॥ १४९ ॥

शुद्धैव ज्ञानधारा स्यात्सम्यक्त्वप्राप्त्यनन्तरम् ।
हेतुभेदाद्विचित्रा तु योगधारा प्रवर्त्तते ॥ १५० ॥

सम्यग्दृशो विशुद्धत्वं सर्वास्वपि दशास्वतः ।
मृदुमध्यादिभावस्तु क्रियावैचित्र्यतो भवेत् ॥ १५१ ॥

यदा तु सर्वतः शुद्धिर्जायते धारयोर्द्वयोः ।
शैलेशीसंज्ञितः स्थैर्यात्तदा स्यात्सर्वसंवरः ॥ १५२ ॥

ततोऽर्वाग् यच्च यावच्च स्थिरत्वं तावदात्मनः ।
संवरो योगचाञ्चल्यं यावत्तावत्किलाश्रवः ॥ १५३ ॥

अशुद्धनयतश्चैवं संवराश्रवसंकथा ।
संसारिणां च सिद्धानां न शुद्धनयतो भिदा ॥ १५४ ॥

निर्जरा कर्मणां शाटो नात्माऽसौ कर्म्मपर्ययः ।
येन निर्जीर्यते कर्म स भावस्त्वात्मलक्षणम् ॥ १५५ ॥

सत्तपो द्वादशविधं शुद्धज्ञानसमन्वितम् ।
आत्मशक्तिसमुत्थानं चित्तवृत्तिनिरोधकृत् ॥ १५६ ॥

यत्र रोधः कषायाणां ब्रह्मध्यानं जिनस्य च ।
ज्ञातव्यं तत्तपः शुद्धमवशिष्टं तु लङ्घनम् ॥ १५७ ॥

बुभुक्षा देहकार्श्यं वा तपसो नास्ति लक्षणम् ।
तितिक्षाब्रह्मगुप्त्यादिस्थानं ज्ञानं तु तद्वपुः ॥ १५८ ॥

ज्ञानेन निपुणेनैक्यं प्राप्तं चन्दनगन्धवत् ।
निर्जरामात्मनो दत्ते तपो नान्यादृशं क्वचित् ॥ १५९ ॥

तपस्वी जिनभक्त्या च शासनोद्भासनेच्छया ।
पुण्यं बध्नाति बहुलं मुच्यते तु गतस्पृहः ॥ १६० ॥

कर्मतापकरं ज्ञानं तपस्तन्नैव वेत्ति यः ।
प्राप्नोतु स हतस्वान्तो विपुलां निर्जरां कथम् ॥ १६१ ॥

अज्ञानी तपसा जन्मकोटिभिः कर्म यन्नयेत् ।
अन्तं ज्ञानतपोयुक्तस्तत् क्षणेनैव संहरेत् ॥ १६२ ॥

ज्ञानयोगस्तपःशुद्धमित्याहुर्मुनिपुङ्गवाः ।
तस्मान्निकाचितस्यापि कर्मणो युज्यते क्षयः ॥ १६३ ॥

यदिहापूर्वकरणं श्रेणिः शुद्धा च जायते ।
ध्रुवः स्थितिक्षयस्तत्र स्थितानां प्राच्यकर्मणाम् ॥ १६४ ॥

तस्माद् ज्ञानमयः शुद्धस्तपस्वी भावनिर्जरा ।
शुद्धनिश्चयतस्त्वेषा सदा शुद्धस्य कापि न ॥ १६५ ॥

बन्धः कर्मात्मसंश्लेषो द्रव्यतः स चतुर्विधः ।
तद्धेत्वध्यवसायात्मा भावतस्तु प्रकीर्त्तितः ॥ १६६ ॥

वेष्टयत्यात्मनात्मानं यथा सर्पस्तथासुमान् ।
तत्तद्भावैः परिणतो बध्नात्यात्मानमात्मना ॥ १६७ ॥

बध्नाति स्वं यथा कोशकारकीटः स्वतन्तुभिः ।
आत्मनः स्वगतैर्भावैर्बन्धने सोपमा स्मृता ॥ १६८ ॥

जन्तूनां सापराधानां बन्धकारी न हीश्वरः ।
तद्बन्धकानवस्थानादबन्धस्याप्रवृत्तितः ॥ १६९ ॥

न त्वज्ञानप्रवृत्त्यर्थे ज्ञानवन्नोदना ध्रुवा ।
अबुद्धिपूर्वकार्येषु स्वप्नादौ तददर्शनात् ॥ १७० ॥

तथाभव्यतया जन्तुर्नोदितश्च प्रवर्त्तते ।
बध्नन् पुण्यं च पापं च परिणामानुसारतः ॥ १७१ ॥

शुद्धनिश्चयतस्त्वात्मा न बद्धो बन्धशङ्कया ।
भयकम्पादिकं किंतु रज्जावहिमतेरिव ॥ १७२ ॥

रोगस्थित्यनुसारेण प्रवृत्ती रोगिणो यथा ।
भवस्थित्यनुसारेण तथा बन्धेऽपि वर्ण्यते ॥ १७३ ॥

दृढाज्ञानमयीं शङ्कामेनामपनिनीषवः ।
अध्यात्मशास्त्रमिच्छन्ति श्रोतुं वैराग्यकाङ्क्षिणः ॥ १७४ ॥

दिशः प्रदर्शकं शाखाचन्द्रन्यायेन तत्पुनः ।
प्रत्यक्षविषयां शङ्कां न हि हन्ति परोक्षधीः ॥ १७५ ॥

शङ्खे श्वैत्यानुमानेऽपि दोषात्पीतत्वधीर्यथा ।
शास्त्रज्ञानेऽपि मिथ्याधीसंस्काराद्बन्धधीस्तथा ॥ १७६ ॥

श्रुत्वा मत्वा मुहुः स्मृत्वा साक्षादनुभवन्ति ये ।
तत्त्वं न बन्धधीस्तेषामात्माबद्धः प्रकाशते ॥ १७७ ॥

द्रव्यमोक्षः क्षयः कर्मद्रव्याणां नात्मलक्षणम् ।
भावमोक्षस्तु तद्धेतुरात्मा रत्नत्रयान्वयी ॥ १७८ ॥

ज्ञानदर्शनचारित्रैरात्मैक्यं लभते यदा ।
कर्माणि कुपितानीव भवन्त्याशु तदा पृथक् ॥ १७९ ॥

अतो रत्नत्रयं मोक्षस्तदभावे कृतार्थता ।
पाखण्डिगणलिङ्गैश्च गृहिलिङ्गैश्च कापि न ॥ १८० ॥

पाखण्डिगणलिङ्गेषु गृहिलिङ्गेषु ये रताः ।
न ते समयसारस्य ज्ञातारो बालबुद्धयः ॥ १८१ ॥

भावलिङ्गरता ये स्युः सर्वसारविदो हि ते ।
लिङ्गस्था वा गृहस्था वा सिध्यन्ति धूतकल्मषाः ॥ १८२ ॥

भावलिङ्गं हि मोक्षाङ्गं द्रव्यलिङ्गमकारणम् ।
द्रव्यं नात्यन्तिकं यस्मान्नाप्येकान्तिकमिष्यते ॥ १८३ ॥

यथाजातदशालिङ्गमर्थादव्यभिचारि चेत् ।
विपक्षबाधकाभावात् तद्धेतुत्वे तु का प्रमा ॥ १८४ ॥

वस्त्रादिधारणेच्छा चेद्बाधिका तस्य तां विना ।
धृतस्य किमवस्थाने करादेरिव बाधकम् ॥ १८५ ॥

स्वरूपेण च वस्त्रं चेत्केवलज्ञानबाधकम् ।
तदा दिक्पटनीत्यैव तत्तदावरणं भवेत् ॥ १८६ ॥

इत्थं केवलिनस्तेन मूर्ध्नि क्षिप्तेन केनचित् ।
केवलित्वं पलायेतेत्यहो किमसमञ्जसम् ॥ १८७ ॥

भावलिङ्गात्ततो मोक्षो भिन्नलिङ्गेष्वपि ध्रुवः ।
कदाग्रहं विमुच्यैतद्भावनीयं मनस्विना ॥ १८८ ॥

अशुद्धनयतो ह्यात्मा बद्धो मुक्त इति स्थितिः ।
न शुद्धनयतस्त्वेष बध्यते नापि मुच्यते ॥ १८९ ॥

अन्वयव्यतिरेकाभ्यामात्मतत्त्वविनिश्चयम् ।
नवभ्योऽपि हि तत्त्वेभ्यः कुर्यादेवं विचक्षणः ॥ १९० ॥

इदं हि परमध्यात्मममृतं ह्यद एव च ।
इदं हि परमं ज्ञानं योगोऽयं परमः स्मृतः ॥ १९१ ॥

गुह्याद्गुह्यतरं तत्त्वमेतत्सूक्ष्मनयाश्रितम् ।
न देयं स्वल्पबुद्धीनां ते ह्येतस्य विडम्बकाः ॥ १९२ ॥

जनानामल्पबुद्धीनां नैतत्तत्त्वं हितावहम् ।
निर्बलानां क्षुधार्त्तानां भोजनं चक्रिणो यथा ॥ १९३ ॥

ज्ञानांशदुर्विदग्धस्य तत्त्वमेतदनर्थकृत् ।
अशुद्धमन्त्रपाठस्य फणिरत्नग्रहो यथा ॥ १९४ ॥

व्यवहाराविनिष्णातो यो ज्ञीप्सति विनिश्चयम् ।
कासारतरणाशक्तः सागरं स तितीर्षति ॥ १९५ ॥

व्यवहारं विनिश्चित्य ततः शुद्धनयाश्रितः ।
आत्मज्ञानरतो भूत्वा परमं साम्यमाश्रयेत् ॥ १९६ ॥

# जिनमतस्तुत्यधिकारः ॥ १९ ॥

उत्सर्प्पद्व्यवहारनिश्चयकथाकल्लोलकोलाहल-
त्रस्यद्दुर्नयवादिकच्छपकुलभ्रश्यत्कुपक्षाचलम् ।
उद्यद्युक्तिनदीप्रवेशसुभगं स्याद्वादमर्यादया
युक्तं श्रीजिनशासनं जलनिधिं मुक्त्वा परं नाश्रये ॥ १ ॥

पूर्णः पुण्यनयप्रमाणरचनापुष्पैः सदास्थारसै
स्तत्त्वज्ञानफलः सदा विजयते स्याद्वादकल्पद्रुमः ।
एतस्मात् पतितैः प्रवादकुसुमैः षट्दर्शनारामभू-
र्भूयःसौरभमुद्वमत्यभिमतैरध्यात्मवार्तालवैः ॥ २ ॥

चित्रोत्सर्गशुभापवादरचनासानुश्रियालङ्कृतः
श्रद्धानन्दनचन्दनद्रुमनिभप्रज्ञोल्लसत्सौरभः ।
भ्राम्यद्भिः परदर्शनग्रहगणैरासेव्यमानः सदा
तर्कस्वर्णशिलोच्छ्रितो विजयते जैनागमो मन्दरः ॥ ३ ॥

स्याद्दोषापगमस्तमांसि जगति क्षीयन्त एव क्षणा-
दध्वानो विशदीभवन्ति निबिडा निद्रा दृशोर्गच्छति ।
यस्मिन्नभ्युदिते प्रमाणदिवसप्रारम्भकल्याणिनी
प्रौढत्वं नयगीर्दधाति स रविर्जैनागमो नन्दतात् ॥ ४ ॥

अध्यात्मामृतवर्षिभिः कुवलयोल्लासं विलासैर्गवां
तापव्यापविनाशिभिर्वितनुते लब्धोदयो यः सदा ।
तर्कस्थाणुशिरःस्थितः परिवृतः स्फारैर्नयैस्तारकैः
सोऽयं श्रीजिनशासनामृतरुचिः कस्यैति नो रुच्यताम् ॥ ५ ॥

बौद्धानामृजुसूत्रतो मतमभूद्वेदान्तिनां संग्रहात्
सांख्यानां तत एव नैगमनयाद् योगश्च वैशेषिकः ।

शब्दब्रह्मविदोऽपि शब्दनयतः सर्वैर्नयैर्गुम्फिता
जैनी दृष्टिरितीह सारतरता प्रत्यक्षमुद्वीक्ष्यते ॥ ६ ॥

ऊष्मा नार्कमपाकरोति दहनं नैव स्फुलिङ्गावली
नाब्धिं सिन्धुजलप्लवः सुरगिरिं ग्रावा न चाभ्यापतन् ।
एवं सर्वनयैकभावगरिमस्थानं जिनेन्द्रागमं
तत्तद्दर्शनसंकथांशरचनारूपा न हन्तुं क्षमा ॥ ७ ॥

दुःसाध्यं परवादिनां परमतक्षेपं विना स्वं मतं
तत्क्षेपे च कषायपङ्ककलुषं चेतः समापद्यते ।
सोऽयं निःस्वनिधिग्रहव्यवसितो वेतालकोपक्रमो
नायं सर्वहितावहे जिनमते तत्त्वप्रसिद्ध्यर्थिनाम् ॥ ८ ॥

वार्त्ताः सन्ति सहस्रशः प्रतिमतं ज्ञानांशबद्धक्रमा
श्चेतस्तासु न नः प्रयाति नितमां लीनं जिनेन्द्रागमे ।
नोत्सर्पन्ति लताः कति प्रतिदिशं पुष्पैः पवित्रा मधौ
ताभ्यो नैति रतिं रसालकलिकारक्तस्तु पुंस्कोकिलः ॥ ९ ॥

शब्दो वा मतिरर्थ एव किमु वा जातिः क्रिया वा गुणः
शब्दार्थः किमिति स्थिता प्रतिमतं संदेहशङ्कुव्यथा ।
जैनेन्द्रे तु मते न सा प्रतिपदं जात्यन्तरार्थस्थितेः
सामान्यं च विशेषमेव च यथा तात्पर्यमन्विच्छति ॥ १० ॥

यत्रानर्पितमादधाति गुणतां मुख्यं तु वस्त्वर्पितं
तात्पर्यानवलम्बनेन तु भवेद् बोधः स्फुटं लौकिकः ।
संपूर्णं त्ववभासते कृतधियां कृत्स्नाद्विवक्षाक्रमात्
तां लोकोत्तरभङ्गपद्धतिमयीं स्याद्वादमुद्रां स्तुमः ॥ ११ ॥

आत्मीयानुभवाश्रयार्थविषयोऽप्युच्चैर्यदीयक्रमो
म्लेच्छानामिव संस्कृतं तनुधियामाश्चर्यमोहावहः ।

व्युत्पत्तिप्रतिपत्तिहेतुविततस्याद्वादवाग्गुम्फितं
तं जैनागममाकलय्य न वयं व्याक्षेपभाजः क्वचित् ॥ १२ ॥

मूलं सर्ववचोगतस्य विदितं जैनेश्वरं शासनं
तस्मादेव समुत्थितैर्नयमतैस्तस्यैव यत्खण्डनम् ।
एतत्किञ्चन कौशलं कलिमलच्छन्नात्मनः स्वाश्रितां
शाखां छेत्तुमिवोद्यतस्य कटुकोदर्काय तर्कार्थिनः ॥ १३ ॥

त्यक्त्वोन्मादविभज्यवादरचनामाकर्ण्य कर्णामृतं
सिद्धान्तार्थरहस्यवित् क्व लभतामन्यत्र शास्त्रे रतिम् ।
यस्यां सर्वनया विशन्ति न पुनर्व्यस्तेषु तेष्वेव या
मालायां मणयो लुठन्ति न पुनर्व्यस्तेषु रत्नेषु सा ॥ १४ ॥

अन्योन्यप्रतिपक्षभाववितथान् स्वस्वार्थसत्यान्नया-
न्नापेक्षाविषयग्रहैर्विभजते माध्यस्थ्यमास्थाय यः ।
स्याद्वादे सुपथे निवेश्य हरते तेषां तु दिङ्मूढतां
कुन्देन्दुप्रतिमं यशो विजयिनस्तस्यैव संवर्द्धते ॥ १५ ॥

## अनुभवाधिकारः ॥ २० ॥

शास्त्रोपदर्शितदिशा गलितासद्ग्रहकषायकलुषाणाम् ।
प्रियमनुभवैकवेद्यं रहस्यमाविर्भवति किमपि ॥ १ ॥

प्रथमाभ्यासविलासादाविर्भूयैव यत्क्षणाल्लीनम् ।
चञ्चलतरुणीविभ्रमसममुत्तरलं मनः कुरुते ॥ २ ॥

सुविदितयोगैरिष्टं क्षिप्तं मूढं तथैव विक्षिप्तं ।
एकाग्रं च निरुद्धं चेतः पञ्चप्रकारमिति ॥ ३ ॥

विषयेषु कल्पितेषु च पुरःस्थितेषु च निवेशितं रजसा ।
सुखदुःखयुग्बहिर्मुखमाम्नातं क्षिप्तमिह चित्तम् ॥ ४ ॥

क्रोधादिभिर्नियमितं विरुद्धकृत्येषु यत्तमोभूम्ना ।
कृत्याकृत्यविभागासंगतमेतन्मनो मूढम् ॥ ५ ॥

सत्वोद्रेकात्परिहृतदुःखनिदानेषु सुखनिदानेषु ।
शब्दादिषु प्रवृत्तं सदैव चित्तं तु विक्षिप्तम् ॥ ६ ॥

अद्वेषादिगुणवतां नित्यं खेदादिदोषपरिहारात् ।
सदृशप्रत्ययसंगतमेकाग्रं चित्तमाम्नातम् ॥ ७ ॥

उपरतविकल्पवृत्तिकमवग्रहादिक्रमच्युतं शुद्धम् ।
आत्मारामपुनीनां भवति निरुद्धं सदा चेतः ॥ ८ ॥

न समाधावुपयोगं तिस्रश्चेतोदशा इह लभन्ते ।
सत्वोत्कर्षात् स्थैर्यादुभे समाधिसुखातिशयात् ॥ ९ ॥

योगारम्भस्तु भवेद्विक्षिप्ते मनसि जातु सानन्दे ।
क्षिप्ते मूढे चास्मिन् व्युत्थानं भवति नियमेन ॥ १० ॥

विषयकषायनिवृत्तं योगेषु च संचरिष्णु विविधेषु ।
गृहखेलद्बालोपममपि चलमिष्टं मनोऽभ्यासे ॥ ११ ॥

वचनानुष्ठानगतं यातायातं च सातिचारमपि ।
चेतोऽभ्यासदशायां गजाङ्कुशन्यायतोऽदुष्टम् ॥ १२ ॥

ज्ञानविचाराभिमुखं यथा यथा भवति किमपि सानन्दम् ।
अर्थैः प्रलोभ्य बाह्यैरनुगृह्णीयात्तथा चेतः ॥ १३ ॥

अभिरूपजिनप्रतिमां विशिष्टपदवाक्यवर्णरचनां च ।
पुरुषविशेषादिकमप्यत एवालम्बनं ब्रुवते ॥ १४ ॥

आलम्बनैः प्रशस्तैः प्रायो भावः प्रशस्त एव यतः ।
इति सालम्बनयोगी मनः शुभालम्बनं दध्यात् ॥ १५ ॥

सालम्बनं क्षणमपि क्षणमपि कुर्यान्मनो निरालम्बम् ।
इत्यनुभवपरिपाकादाकालं स्यान्निरालम्बम् ॥ १६ ॥

आलम्ब्यैकपदार्थं यदा न किञ्चिद्विचिन्तयेदन्यत् ।
अनुपनतेन्धनवह्निवदुपशान्तं स्यात्तदा चेतः ॥ १७ ॥

शोकमदमदनमत्सरकलहकदाग्रहविषादवैराणि ।
क्षीयन्ते शान्तहृदामनुभव एवात्र साक्षी नः ॥ १८ ॥

शान्ते मनसि ज्योतिः प्रकाशते शान्तमात्मनः सहजम् ।
भस्मीभवत्यविद्या मोहध्वान्तं विलयमेति ॥ १९ ॥

बाह्यात्मनोऽधिकारः शान्तहृदामन्तरात्मनां न स्यात् ।
परमात्मानुध्येयः सन्निहितो ध्यानतो भवति ॥ २० ॥

कायादिर्बहिरात्मा तदधिष्ठातान्तरात्मतामेति ।
गतनिःशेषोपाधिः परमात्मा कीर्त्तितस्तज्ज्ञैः ॥ २१ ॥

विषयकषायावेशः तत्त्वाश्रद्धा गुणेषु च द्वेषः ।
आत्माज्ञानं च यदा बाह्यात्मा स्यात्तदा व्यक्तः ॥ २२ ॥

तत्त्वश्रद्धा ज्ञानं महाव्रतान्यप्रमादपरता च ।
मोहजयश्च यदा स्यात् तदान्तरात्मा भवेद्व्यक्तः ॥ २३ ॥

ज्ञानं केवलसंज्ञं योगनिरोधः समग्रकर्म्महतिः ।
सिद्धिनिवासश्च यदा परमात्मा स्यात्तदा व्यक्तः ॥ २४ ॥

आत्ममनोगुणवृत्ती विविच्य यः प्रतिपदं विजानाति ।
कुशलानुबन्धयुक्तः प्राप्नोति ब्रह्मभूयमसौ ॥ २५ ॥

ब्रह्मस्थो ब्रह्मज्ञो ब्रह्म प्राप्नोति तत्र किं चित्रम् ।
ब्रह्मविदां बचसापि ब्रह्मविलासाननुभवामः ॥ २६ ॥

ब्रह्माध्ययनेषु मतं ब्रह्माष्टादशसहस्रपदभावैः ।
येनाप्तं तत् पूर्णं योगी स ब्रह्मणः परमः ॥ २७ ॥

ध्येयोऽयं सेव्योऽयं कार्या भक्तिः सुकृतधियाऽस्यैव ।
अस्मिन्गुरुत्वबुद्ध्या सुतरः संसारसिन्धुरपि ॥ २८ ॥

अवलम्ब्येच्छायोगं पूर्णाचारासहिष्णवश्च वयम् ।
भक्त्या परममुनीनां तदीयपदवीमनुसराम: ॥ २९ ॥

अल्पापि यात्र यतना निर्दम्भा सा शुभानुबन्धकरी ।
अज्ञानविषयव्ययकृद्विवेचनं चात्मभावानां ॥ ३० ॥

सिद्धान्ततदङ्गानां शास्त्राणामस्तु परिचय: शक्त्या ।
परमालम्बनभूतो दर्शनपक्षोऽयमस्माकम् ॥ ३१ ॥

विधिकथनं विधिरागो विधिमार्गस्थापनं विधीच्छूनाम् ।
अविधिनिषेधश्चेति प्रवचनभक्ति: प्रसिद्धा न: ॥ ३२ ॥

अध्यात्मभावनोज्ज्वलचेतोवृत्त्योचितं हि न: कृत्यम् ।
पूर्णक्रियाभिलाषश्चेति द्वयमात्मशुद्धिकरम् ॥ ३३ ॥

द्वयमिह शुभानुबन्ध: शक्यारम्भश्च शुद्धपक्षश्च ।
अहितो विपर्यय: पुनरित्यनुभवसंगत: पन्था: ॥ ३४ ॥

ये त्वनुभवाविनिश्चितमार्गाश्चारित्रपरिणतिभ्रष्टा: ।
बाह्यक्रिययाचरणाभिमानिनो ज्ञानिनोऽपि न ते ॥ ३५ ॥

लोकेषु बहिर्बुद्धिषु विगोपकानां बहिष्क्रियासु रति: ।
श्रद्धां विना न चैता: सतां प्रमाणं यतोऽभिहितम् ॥ ३६ ॥

बाल: पश्यति लिङ्गं मध्यमबुद्धिर्विचारयति वृत्तम् ।
आगमतत्त्वं तु बुध: परीक्षते सर्वयत्नेन ॥ ३७ ॥

निन्द्यो न कोपि लोके पापिष्ठेष्वपि भवस्थितिश्चिन्त्या ।
पूज्या गुणगरिमाढ्या धार्यो रागो गुणलवेऽपि ॥ ३८ ॥

निश्चित्यागमतत्त्वं तस्मादुत्सृज्य लोकसंज्ञां च ।
श्रद्धाविवेकसारं यतितव्यं योगिना नित्यम् ॥ ३९ ॥

ग्राह्यं हितमपि बालादालापैर्दुर्जनस्य न द्वेष्यम् ।
त्यक्तव्या च पराशा पाशा इव संगमा ज्ञेया: ॥ ४० ॥

स्तुत्या स्मयो न कार्यः कोपोऽपि च निन्दया जनैः कृतया ।
सेव्या धर्माचार्यास्तत्त्वं जिज्ञासनीयं च ॥ ४१ ॥

शौचं स्थैर्यमदम्भो वैराग्यं चात्मनिग्रहः कार्यः ।
दृश्या भवगतदोषाश्चिन्त्यं देहादिवैरूप्यम् ॥ ४२ ॥

भक्तिर्भगवति धार्या सेव्यो देशः सदा विविक्तश्च ।
स्थातव्यं सम्यक्त्वे विश्वास्यो न प्रमादरिपुः ॥ ४३ ॥

ध्येयात्मबोधनिष्ठा सर्वत्रैवागमः पुरस्कार्यः ।
त्यक्तव्याः कुविकल्पाः स्थेयं वृद्धानुवृत्त्या च ॥ ४४ ॥

साक्षात्कार्यं तत्त्वं चिद्रूपानन्दमेदुरैर्भाव्यम् ।
हितकारी ज्ञानवतामनुभववेद्यः प्रकारोऽयम् ॥ ४५ ॥

## सज्जस्तुत्यधिकारः ॥ २१ ॥

येषां कैरवकुन्दवृन्दशशभृत्कर्पूरशुभ्रा गुणा
मालिन्यं व्यपनीय चेतसि नृणां वैशद्यमातन्वते ।
सन्तः सन्तु मयि प्रसन्नमनसस्ते केऽपि गौणीकृत-
स्वार्था मुख्यपरोपकारविधयोऽत्युच्छृङ्खलैः किं खलैः ॥ १ ॥

ग्रन्थार्थान् प्रगुणीकरोति सुकविर्यत्नेन तेषां प्रथा-
मातन्वन्ति कृपाकटाक्षलहरीलावण्यतः सज्जनाः ।
माकन्दद्रुममञ्जरीं वितनुते चित्रा मधुश्रीस्ततः
सौभाग्यं प्रथयन्ति पञ्चमचमत्कारेण पुंस्कोकिलाः ॥ २ ॥

दोषोल्लेखविषः खलाननबिलादुत्थाय कोपाज्ज्वलन्
जिह्वाहिर्ननु कं गुणं न गुणिनां बालं क्षयं प्रापयेत् ।
न स्याच्चेत्प्रबलप्रभावभवनं दिव्यौषधीसन्निधौ
शास्त्रार्थोपनिषद्विदां शुभहृदां कारुण्यपुण्यप्रथा ॥ ३ ॥

उत्तानार्थगिरां स्वतोऽप्यवगमान्निःसारतां मेनिरे
गम्भीरार्थसमर्थने बत खलाः काठिन्यदोषं ददुः ।
तत्को नाम गुणोऽस्तु कश्च सुकविः किं काव्यमित्यादिकां
स्थित्युच्छेदमतिं हरन्ति नियतादृष्ट्या व्यवस्थाः सताम् ॥ ४ ॥

अध्यात्मामृतवर्षिणीमपि कथामापीय सन्तः सुखं
गाहन्ते विषमुद्गिरन्ति तु खला वैषम्यमेतत्कुतः ।
नेदं चाद्भुतमिन्दुदीधितिपिबाः प्रीताश्चकोरा भृशं
किं न स्युर्बत चक्रवाकतरुणास्त्वत्यन्तखेदातुराः ॥ ५ ॥

किंचित्साम्यमवेक्ष्य ये विदधते काचेन्द्रनीलाभिदां
तेषां न प्रमदावहा तनुधियां गूढा कवीनां कृतिः ।
ये जानन्ति विशेषमप्यविषमे रेखोपरेखांशतो
वस्तुन्यस्तु सतामितः कृतधियां तेषां महानुत्सवः ॥ ६ ॥

पूर्णाध्यात्मपदार्थसार्थघटना चेतश्चमत्कारिणी
मोहच्छन्नदृशां भवेत्तनुधियां नो पण्डितानामिव ।
काकुव्याकुलकामगर्वगहनप्रोद्दामवाक्चातुरी
कामिन्याः प्रसभं प्रमादयति न ग्राम्यान् विदग्धानिव ॥ ७ ॥

स्नात्वा सिद्धान्तकुण्डे विधुकरविशदाध्यात्मपानीयपूरै
स्तापं संसारदुःखं कलिकलुषमलं लोभतृष्णां च हित्वा ।
जाता ये शुद्धरूपाः शमदमशुचिताचन्दनालिप्तगात्राः
शीलालङ्कारसाराः सकलगुणनिधीन्सज्जानांस्तान्नमामः ॥ ८ ॥

पाथोदः पद्यबन्धैर्विपुलरसभरं वर्षति ग्रन्थकर्त्ता
प्रेम्णां पूरैस्तु चेतःसर इह सुहृदां प्लाव्यते वेगवद्भिः ।
त्रुट्यन्ति स्वान्तबन्धाः पुनरसमगुणद्वेषिणां दुर्जनानां
चित्रं भावज्ञनेत्रात् प्रणयरसवशान्निःसरत्यश्रुनीरम् ॥ ९ ॥

उद्दामग्रन्थभावप्रथनभवयशः संचयः सत्कवीनां
क्षीराब्धिर्मथ्यते यः सहृदयविबुधैर्मेरुणा वर्णनेन ।
एतड्डिण्डीरपिण्डीभवति विधुरुचेर्मण्डलं विप्रुषस्ता-
स्ताराःकैलासशैलादय इह दधते वीचिविक्षोभलीलाम् ॥ १० ॥

काव्यं दृष्ट्वा कवीनां हृतममृतमिति स्वःसदां पानशङ्की
खेदं धत्ते तु मूर्ध्ना मृदुतरहृदयः सज्जनो व्याधुतेन ।
ज्ञात्वा सर्वोपभोग्यं प्रसृमरमथ तत्कीर्त्तिपीयूषपूरं
नित्यं रक्षापिधानानियतमतितरां मोदते च स्मितेन ॥ ११ ॥

निष्पाद्य श्लोककुम्भं निपुणनयमृदा कुम्भकाराः कवीन्द्रा
दार्ढ्यं चारोप्य तस्मिन् किमपि परिचयात्सत्परीक्षार्कभासाम् ।
पक्वं कुर्वन्ति बाढं गुणहरणमतिप्रज्वलद्दोषदृष्टि-
ज्वालामालाकराले खलजनवचनज्वालजिह्वे निवेश्य ॥ १२ ॥

इक्षुद्राक्षारसौघः कविजनवचनं दुर्जनस्याग्नियन्त्रा-
न्नानार्थद्रव्ययोगात्समुपचितगुणो मद्यतां याति सद्यः ।
सन्तः पीत्वा यदुच्चैर्दधति हृदि मुदं घूर्णयन्त्यक्षियुग्मं
स्वैरं हर्षप्रकर्षादपि च विदधते नृत्यगानप्रबन्धम् ॥ १३ ॥

नव्योऽस्माकं प्रबन्धोऽप्यनणुगुणभृतां सज्जनानां प्रभावा
द्विख्यातः स्यादिती मे हितकरणविधौ प्रार्थनीया न किं नः ।
निष्णाता वा स्वतस्ते रविरुचय इवाम्भोरुहाणां गुणाना-
मुल्लासेऽपेक्षणीयो न खलु पररुचेः क्वापि तेषां स्वभावः ॥ १४ ॥

## प्रशस्तिः

यत्कीर्त्तिस्फूर्त्तिगानावहितसुरवधूवृन्दकोलाहलेन
प्रक्षुब्धस्वर्गसिन्धोः पतितजलभरैः क्षालितः शैत्यमेति ।

अश्रान्तभ्रान्तकान्तग्रहगणकिरणैस्तापवान् स्वर्णशैलो
भ्राजन्ते ते मुनीन्द्रा नयविजयबुधाः सज्जनव्रातधुर्याः ॥ १५ ॥

चक्रे प्रकरणमेतत्तत्पदसेवापरो यशोविजयः
अध्यात्मधृतरुचीनामिदमानन्दावहं भवतु ॥ १६ ॥

# ॥ द्वात्रिंशद्द्वात्रिंशका ॥

## दानद्वात्रिंशिका ॥ १ ॥

ऐन्द्रशर्मप्रदं दानमनुकम्पासमन्वितम् ।
भक्त्या सुपात्रदानं तु मोक्षदं देशितं जिनैः ॥ १ ॥

अनुकम्पाऽनुकम्प्ये स्याद्भक्तिः पात्रे तु संगता ।
अन्यथाधीस्तु दातृणामतिचारप्रसञ्जिका ॥ २ ॥

तत्राद्या दुःखिनां दुःखोद्दिधीर्षाल्पासुखश्रमात् ।
पृथिव्यादौ जिनार्चादौ यथा तदनुकम्पिनाम् ॥ ३ ॥

स्तोकानामुपकारः स्यादारम्भाद्यत्र भूयसाम् ।
तत्रानुकम्पा न मता यथेष्टापूर्त्तकर्मसु ॥ ४ ॥

पुष्टालम्बनमाश्रित्य दानशालादिकर्म यत् ।
तत्तु प्रवचनोन्नत्या बीजाधानादिभावतः ॥ ५ ॥

बहूनामुपकारेण नानुकम्पानिमित्तताम् ।
अतिक्रामति तेनात्र मुख्यो हेतुः शुभाशयः ॥ ६ ॥

क्षेत्रादिव्यवहारेण दृश्यते फलसाधनम् ।
निश्चयेन पुनर्भावः केवलः फलभेदकृत् ॥ ७ ॥

कालेऽल्पमपि लाभाय नाकाले कर्म बह्वपि ।
वृष्टौ वृद्धिः कणस्यापि कणकोटिर्वृथाऽन्यथा ॥ ८ ॥

धर्माङ्गत्वं स्फुटीकर्तुं दानस्य भगवानपि ।
अत एव व्रतं गृह्णन् ददौ संवत्सरं वसु ॥ ९ ॥

साधुनापि दशाभेदं प्राप्यैतदनुकम्पया ।
दत्तं ज्ञाताद्भगवतो रङ्कस्येव सुहस्तिना ॥ १० ॥

न चाधिकरणं ह्येतद्विशुद्धाशयतो मतम् ।
अपि त्वन्यद्गुणस्थानं गुणान्तरनिबन्धनम् ॥ ११ ॥

वैयावृत्त्ये गृहस्थानां निषेधः श्रूयते तु यः ।
स औत्सर्गिकतां बिभ्रन्नैतस्यार्थस्य बाधकः ॥ १२ ॥

ये तु दानं प्रशंसन्तीत्यादिसूत्रेऽपि संगतः ।
विहाय विषयो मृग्यो दशाभेदं विपश्चिता ॥ १३ ॥

नन्वेवं पुण्यबन्धः स्यात्साधोर्न च स इष्यते ।
पुण्यबन्धान्यपीडाभ्यां छन्नं भुङ्क्ते यतो यतिः ॥ १४ ॥

दीनादिदाने पुण्यं स्यात्तददाने च पीडनम् ।
शक्तौ पीडाप्रतीकारे शास्त्रार्थस्य च बाधनम् ॥ १५ ॥

किं च दानेन भोगाप्तिस्ततो भवपरम्परा ।
धर्माधर्मक्षयान्मुक्तिर्मुमुक्षोर्नेष्टमित्यदः ॥ १६ ॥

नैवं यत्पुण्यबन्धोऽपि धर्महेतुः शुभोदयः ।
वह्नेर्दाह्यं विनाश्येव नश्वरत्वात्स्वतो मतः ॥ १७ ॥

भोगाप्तिरपि नैतस्मादभोगपरिणामतः ।
मन्त्रितं श्रद्धया पुंसां जलमप्यमृतायते ॥ १८ ॥

न च स्वदानपोषार्थमुक्तमेतदपेशलम् ।
हरिभद्रो ह्यदोऽभाणीद्यतः संविग्नपाक्षिकः ॥ १९ ॥

भक्तिस्तु भवनिस्तारवाञ्छा स्वस्य सुपात्रतः ।
तया दत्तं सुपात्राय बहुकर्मक्षयक्षमम् ॥ २० ॥

पात्रदानचतुर्भङ्ग्यामाद्यः संशुद्ध इष्यते ।
द्वितीये भजना शेषावनिष्टफलदौ मतौ ॥ २१ ॥

शुद्धं दत्त्वा सुपात्राय सानुबन्धशुभार्जनात् ।
सानुबन्धं न बध्नाति पापं बद्धं च मुञ्चति ॥ २२ ॥

भवेत्पात्रविशेषे वा कारणे वा तथाविधे ।
अशुद्धस्यापि दानं हि द्वयोर्लाभाय नान्यथा ॥ २३ ॥

अथवा यो गृही मुग्धो लुब्धकज्ञातभावितः ।
तस्य तत्स्वल्पबन्धाय बहुनिर्जरणाय च ॥ २४ ॥

इत्थमाशयवैचित्र्यादत्राल्पायुष्कहेतुता ।
युक्ता चाशुभदीर्घायुर्हेतुता सूत्रदर्शिता ॥ २५ ॥

यस्तूत्तरगुणाशुद्धं प्रज्ञप्तिविषयं वदेत् ।
तेनात्र भजनासूत्रं दृष्टं सूत्रकृते कथम् ॥ २६ ॥

शुद्धं वा यदशुद्धं वाऽसंयताय प्रदीयते ।
गुरुत्वबुद्ध्या तत्कर्मबन्धकृन्नानुकम्पया ॥ २७ ॥

दोषपोषकतां ज्ञात्वा तामुपेक्ष्य ददज्जनः ।
प्रज्वाल्य चन्दनं कुर्यात्कष्टामङ्गारजीविकाम् ॥ २८ ॥

अतः पात्रं परीक्षेत दानशौण्डः स्वयं धिया ।
तत्त्रिधा स्यान्मुनिः श्राद्धः सम्यग्दृष्टिस्तथापरः ॥ २९ ॥

एतेषां दानमेतत्स्थगुणानामनुमोदनात् ।
औचित्यानतिवृत्त्या च सर्वसंपत्करं मतम् ॥ ३० ॥

शुभयोगेऽपि यो दोषो द्रव्यतः कोऽपि जायते ।
कूपज्ञातेन स पुनर्नानिष्टो यतनावतः ॥ ३१ ॥

इत्थं दानविधिज्ञाता धीरः पुण्यप्रभावकः ।
यथाशक्ति ददद्दानं परमानन्दभाग् भवेत् ॥ ३२ ॥

## देशनाद्वात्रिंशिका ॥ २ ॥

यथास्थानं गुणोत्पत्तेः सुवैद्येनेव भेषजम् ।
बालाद्यपेक्षया देया देशना क्लेशनाशिनी ॥ १ ॥

उन्मार्गनयनात् पुंसामन्यथा वा कुशीलता ।
सन्मार्गद्रुमदाहाय वह्निज्वाला प्रसज्यते ॥ २ ॥

अनुग्रहधिया वक्तुर्धर्मित्वं नियमेन यत् ।
भणितं तत्तु देशादिपुरुषादिविदं प्रति ॥ ३ ॥

कोऽयं पुरुष इत्यादिवचनादत एव च ।
पर्षदादिविवेकाच्च व्यक्तो मन्दस्य निग्रहः ॥ ४ ॥

अज्ञातवाग्विवेकानां पण्डितत्वाभिमानिनाम् ।
विषं यद्वर्तते वाचि मुखे नाशीविषस्य तत् ॥ ५ ॥

तत्र बालो रतो लिङ्गे वृत्तान्वेषी तु मध्यमः ।
पण्डितः सर्वयत्नेन शास्त्रतत्त्वं परीक्षते ॥ ६ ॥

गृहत्यागादिकं लिङ्गं बाह्यं शुद्धिं विना वृथा ।
न भेषजं विनारोग्यं वैद्यवेषेण रोगिणः ॥ ७ ॥

गुरुदोषकृतां वृत्तमपि त्याज्यं लघुत्यजाम् ।
जाड्यत्यागाय पतनं ज्वलति ज्वलने यथा ॥ ८ ॥

शास्त्रतत्त्वं बुधज्ञेयमुत्सर्गादिसमन्वितम् ।
तद्दृष्टेष्टाविरुद्धार्थमैदम्पर्यविशुद्धिमत् ॥ ९ ॥

श्रुतचिन्तोत्तरोत्पन्नभावनाभाव्यमस्त्यदः ।
श्रुतं सर्वानुगाद्वाक्यात्प्रमाणनयवर्जितात् ॥ १० ॥

उत्पन्नमविनष्टं च बीजं कोष्ठगतं यथा ।
परस्परविभिन्नोक्तपदार्थविषयं तु न ॥ ११ ॥

महावाक्यार्थजं सूक्ष्मयुक्त्या स्याद्वादसंगतम् ।
चिन्तामयं विसर्पि स्यात्तैलबिन्दुरिवाम्भसि ॥ १२ ॥

सर्वत्राज्ञापुरस्कारि ज्ञानं स्याद्भावनामयम् ।
अशुद्धजात्यरत्नाभासमं तात्पर्यवृत्तितः ॥ १३ ॥

आद्येऽविरुद्धार्थतया मनाक् स्याद्दर्शनग्रहः ।
द्वितीये बुद्धिमाध्यस्थ्यचिन्तायोगात्कदापि न ॥ १४ ॥

सर्वत्रैव हिता वृत्तिः समापत्त्यानुरूपया ।
ज्ञाने संजीविनीचारज्ञातेन चरमे स्मृता ॥ १५ ॥

एतेनैवोपवासादेर्वैयावृत्त्यादिघातिनः ।
नित्यत्वमेकभक्तादेर्जानन्ति बलवत्तया ॥ १६ ॥

विनैतन्नूनमज्ञेषु धर्मधीरपि न श्रिये ।
गृहीतग्लानभैषज्यप्रदानाभिग्रहेष्विव ॥ १७ ॥

तेषां तथाविधाप्राप्तौ स्वाधन्यत्वविभाविनाम् ।
चित्तं हि तत्त्वतः साधुग्लानभावाभिसन्धिमत् ॥ १८ ॥

तस्माद्भावनया भाव्यं शास्त्रतत्त्वं विना परम् ।
परलोकविधौ मानं बलवन्नात्र दृश्यते ॥ १९ ॥

बाह्यक्रियाप्रधानैव देया बालस्य देशना ।
सेवनीयस्तदाचारो यथाऽसौ स्वास्थ्यमश्नुते ॥ २० ॥

सम्यग्लोचो धरा शय्या तपश्चित्रं परीषहाः ।
अल्पोपधित्वमित्यादि बाह्यं बालस्य कथ्यते ॥ २१ ॥

मध्यमस्य पुनर्वाच्यं वृत्तं यत्साधुसंगतम् ।
सम्यगीर्यासमित्यादि त्रिकोटीशुद्धभोजनम् ॥ २२ ॥

वयःक्रमेणाध्ययनश्रवणध्यानसंगतिः ।
सदाशयेनानुगतं पारतन्त्र्यं गुरोरपि ॥ २३ ॥

वचनाराधनाद्धर्मोऽधर्मस्तस्य च बाधनात् ।
धर्मगुह्यमिदं वाच्यं बुधस्य च विपश्चिता ॥ २४ ॥

इत्थमाज्ञादरद्वारा हृदयस्थे जिने सति ।
भवेत्समरसापत्तिः फलं ध्यानस्य या परम् ॥ २५ ॥

देशनैकनयाक्रान्ता कथं बालाद्यपेक्षया ।
इति चेदित्थमेव स्यात्तद्बुद्धिपरिकर्मणा ॥ २६ ॥

प्रमाणदेशनैवेयं ततो योग्यतया मता ।
द्रव्यतः सापि नो मानं वैपरीत्यं यया भवेत् ॥ २७ ॥

आदौ यथारुचि श्राव्यं ततो वाच्यं नयान्तरम् ।
ज्ञाते त्वेकनयेऽन्यस्मात् परिशिष्टं प्रदर्शयेत् ॥ २९ ॥

संविग्नभाविता ये स्युर्ये च पार्श्वस्थभाविताः ।
मुक्त्वा द्रव्यादिकं तेषां शुद्धोञ्छं तेन दर्शितम् ॥ २९ ॥

दुर्नयाभिनिवेशे तु तं दृढं दूषयेदपि ।
दुष्टांशच्छेदतो नाङ्घ्री दूषयेद्विषकण्टकः ॥ ३० ॥

जानाति दातुं गीतार्थो य एवं धर्मदेशनाम् ।
कलिकालेऽपि तस्यैव प्रभावाद्धर्म एधते ॥ ३१ ॥

गीतार्थाय जगज्जन्तुपरमानन्ददायिने ।
मुनये भगवद्धर्मदेशकाय नमो नमः ॥ ३२ ॥

# मार्गद्वात्रिंशिका ॥ ३ ॥

मार्गः प्रवर्तकं मानं शब्दो भगवतोदितः ।
संविग्नाशठगीतार्थाचरणं चेति स द्विधा ॥ १ ॥

द्वितीयानादरे हन्त प्रथमस्याप्यनादरः ।
जीतस्यापि प्रधानत्वं साम्प्रतं श्रूयते यतः ॥ २ ॥

अनुमाय सतामुक्ताचारेणागममूलताम् ।
पथि प्रवर्तमानानां शङ्क्या नान्धपरम्परा ॥ ३ ॥

सूत्रे सद्धेतुनोत्सृष्टमपि क्वचिदपोद्यते ।
हितदेऽप्यनिषिद्धेऽर्थे किं पुनर्नास्य मानता ॥ ४ ॥

निषेधः सर्वथा नास्ति विधिर्वा सर्वथागमे ।
आयं व्ययं च तुलयेल्लाभाकाङ्क्षी वणिग्यथा ॥ ५ ॥

प्रवाहधारापतितं निषिद्धं यन्न दृश्यते ।
अत एव न तन्मत्या दूषयन्ति विपश्चितः ॥ ६ ॥

संविग्नाचरणं सम्यक्कल्पप्रावरणादिकम् ।
विपर्यस्तं पुनः श्राद्धममत्वप्रभृति स्मृतम् ॥ ७ ॥

आद्यं ज्ञानात्परं मोहाद्विशेषो विशदोऽनयोः ।
एकत्वं नानयोर्युक्तं काचमाणिक्ययोरिव ॥ ८ ॥

दर्शयद्भिः कुलाचारलोपादामुष्मिकं भयम् ।
वारयद्भिः स्वगच्छीयगृहिणः साधुसंगतिम् ॥ ९ ॥

द्रव्यस्तवं यतीनामप्यनुपश्यद्भिरुत्तमम् ।
विवेकविकलं दानं स्थापयद्भिर्यथा तथा ॥ १० ॥

अपुष्टालम्बनोत्सिक्तैर्मुग्धमीनेषु मैनिकैः ।
इत्थं दोषादसंविग्नैर्हहा विश्वं विडम्बितम् (विशेषकम्) ॥ ११ ॥

अप्येष शिथिलोल्लापो न श्राव्यो गृहमेधिनाम् ।
सूक्ष्मोऽर्थ इत्यदोऽयुक्तं सूत्रे तद्गुणवर्णनात् ॥ १२ ॥

तेषां निन्दाल्पसाधूनां-बह्वाचरणमानिनाम् ।
प्रवृत्ताङ्गीकृतात्यागे मिथ्यादृग्गुणदर्शिनी ॥ १३ ॥

इदं कलिरजः पर्वभस्म भस्मग्रहोदयः ।
खेलनं तदसंविग्नराजस्यैवाधुनोचितम् ॥ १४ ॥

समुदाये मनाग्दोषभीतैः स्वेच्छाविहारिभिः ।
संविग्नैरप्यगीतार्थैः परेभ्यो नातिरिच्यते ॥ १५ ॥

वदन्ति गृहिणां मध्ये पार्श्वस्थानामवन्द्यताम् ।
यथाच्छन्दतयात्मानमवन्द्यं जानते न ते ॥ १६ ॥

गीतार्थपारतन्त्र्येण ज्ञानमज्ञानिनां मतम् ।
विना चक्षुष्मदाधारमन्धः पथि कथं व्रजेत् ॥ १७ ॥

तत्त्यागेनाफलं तेषां शुद्धोञ्छादिकमप्यहो ।
विपरीतं फलं वा स्यान्नौभङ्ग इव वारिधौ ॥ १८ ॥

अभिन्नग्रन्थयः प्रायः कुर्वन्तोऽप्यतिदुष्करम् ।
बाह्या इवाव्रता मूढा ध्वाङ्क्षज्ञातेन दर्शिताः ॥ १९ ॥

वदन्तः प्रत्युदासीनान् परुषं परुषाशयाः ।
विश्वासादाकृतेरेते महापापस्य भाजनम् ॥ २० ॥

ये तु स्वकर्मदोषेण प्रमाद्यन्तोऽपि धार्मिकाः ।
संविग्नपाक्षिकास्तेऽपि मार्गान्वाचयशालिनः ॥ २१ ॥

शुद्धप्ररूपणैतेषां मूलमुत्तरसंपदः ।
सुसाधुग्लानिभैषज्यप्रदानाभ्यर्चनादिकाः ॥ २२ ॥

आत्मार्थं दीक्षणं तेषां निषिद्धं श्रूयते श्रुते ।
ज्ञानाद्यर्थान्यदीक्षा च स्वोपसंपच्च नाहिता ॥ २३ ॥

नावश्यकादिवैयर्थ्यं तेषां शक्यं प्रकुर्वताम् ।
अनुमत्यादिसाम्राज्याद्भावावेशाच्च चेतसः ॥ २४ ॥

द्रव्यत्वेऽपि प्रधानत्वात्तथाकल्पात्तदक्षतम् ।
यतो मार्गप्रवेशाय मतं मिथ्यादृशामपि ॥ २५ ॥

मार्गभेदस्तु यः कश्चिन्निजमत्या विकल्प्यते ।
स तु सुन्दरबुद्ध्यापि क्रियमाणो न सुन्दरः ॥ २६ ॥

निवर्तमाना अप्येके वदन्त्याचारगोचरम् ।
आख्याता मार्गमप्येको नोञ्छजीवीति च श्रुतिः ॥ २७ ॥

असंयते संयतत्वं मन्यमाने च पापता ।
भणिता तेन मार्गोऽयं तृतीयोऽप्यवशिष्यते ॥ २८ ॥

साधुः श्राद्धश्च संविग्नपक्षी शिवपथास्त्रयः ।
शेषा भवपथा गेहिद्रव्यलिङ्गिकुलिङ्गिनः ॥ २९ ॥

गुणी च गुणरागी च गुणद्वेषी च साधुषु ।
श्रूयन्ते व्यक्तमुत्कृष्टमध्यमाधमबुद्धयः ॥ ३० ॥

ते च चारित्रसम्यक्त्वमिथ्यादर्शनभूमयः ।
अतो द्वयोः प्रकृत्यैव वर्तितव्यं यथाबलम् ॥ ३१ ॥

इत्थं मार्गस्थिताचारमनुसृत्य प्रवृत्तया ।
मार्गदृष्ट्यैव लभ्यन्ते परमानन्दसंपदः ॥ ३२ ॥

## जिनमहत्त्वद्वात्रिंशिका ॥ ४ ॥

वप्रत्रयध्वजच्छत्रचक्रचामरसंपदा ।
विभुत्वं न विभोस्तादृङ्मायाविष्वपि संभवात् ॥ १ ॥

स्वामिनो वचनं यत्तु संवादि न्यायसंगतम् ।
कुतर्कध्वान्तसूर्यांशुर्महत्वं तद्वदभ्यधुः ॥ २ ॥

पक्षपातो न मे वीरे न द्वेषः कपिलादिषु ।
युक्तिमद्वचनं यस्य तस्य कार्यः परिग्रहः ॥ ३ ॥

पुण्योदयभवैर्भावैर्मतं क्षायिकसंगतैः ।
महत्त्वं महनीयस्य बाह्यमाभ्यन्तरं तथा ॥ ४ ॥

बहिरभ्युदयादर्शी भवत्यन्तर्गतो गुणः ।
मणेः पटावृतस्यापि बहिर्ज्योतिरुदञ्चति ॥ ५ ॥

भेदः प्रकृत्या रत्नस्य जात्यस्याजात्यतो यथा ।
तथार्वागपि देवस्य भेदोऽन्येभ्यः स्वभावतः ॥ ६ ॥

नित्यनिर्दोषताभावान्महत्त्वं नेति दुर्वचः ।
नित्यनिर्दोषता यस्माद्घटादावपि वर्तते ॥ ७ ॥

सात्मन्येव महत्त्वाङ्गमिति चेत्तत्र का प्रमा ।
पुमन्तरस्य कल्प्यत्वाद्भवस्तदोषो वरं पुमान् ॥ ८ ॥

दोषावरणयोर्हानिर्निःशेषास्त्यतिशायनात् ।
क्वचिद्यथा स्वहेतुभ्यो बहिरन्तर्मलक्षयः ॥ ९ ॥

इत्थं जगदकर्तृत्वेऽप्यमहत्त्वं निराकृतम् ।
कार्ये कर्तृप्रयोज्यस्य विशेषस्यैव दर्शनात् ॥ १० ॥

कर्तृत्वेन च हेतुत्वे ज्ञातृत्वेनापि तद्भवेत् ।
ज्ञानस्यैव च हेतुत्वे सिद्धे नः सिद्धसाधनम् ॥ ११ ॥

धृत्यादेरपि धर्मादिजन्यत्वान्नात्र मानता ।
कृतित्वेनापि जन्यत्वाच्चेत्यन्यत्रैष विस्तरः ॥ १२ ॥

अन्ये त्वाहुर्महत्त्वं हि संख्यावद्दानतोऽस्य न ।
शास्त्रे नो गीयते ह्येतदसंख्यं त्रिजगद्गुरोः ॥ १३ ॥

अत्रोच्यते न संख्यावद्दानमर्थाद्यभावतः ।
सूत्रे वरवरिकायाः श्रुतेः किं त्वर्थ्यभावतः ॥ १४ ॥

स च स्वाम्यनुभावेन सन्तोषसुखयोगतः ।
धर्मेऽप्युग्रोद्यमात्तत्त्वदृष्ट्येत्येतदनाविलम् ॥ १५ ॥

दानादेवाकृतार्थत्वान्महत्त्वं नेति मन्दधीः ।
तस्योत्तरमिदं पुण्यमित्थमेव विपच्यते ॥ १६ ॥

गर्भादारभ्य सत्पुण्याद्भवेत्तस्योचिता क्रिया ।
तत्राप्यभिग्रहो न्याय्यः श्रूयते स्वामिनस्ततः ॥ १७ ॥

न्याय्यता चेष्टसंसिद्धेः पित्रुद्वेगनिरासतः ।
प्रारम्भमङ्गलं ह्येतद्गुरुशुश्रूषणं हि तत् ॥ १८ ॥

तत्खेदरक्षणोपायाप्रवृत्तौ न कृतज्ञता ।
त्यागोऽप्यबोधे न त्यागो यथा ग्लानौषधार्थिनः ॥ १९ ॥

अपरस्त्वाह राज्यादिमहाधिकरणं ददत् ।
शिल्पादि दर्शयंश्चार्हन्महत्त्वं कथमृच्छति ॥ २० ॥

तन्नेत्थमेव प्रकृताधिकदोषनिवारणात् ।
शक्तौ सत्यामुपेक्षाया अयुक्तत्वान्महात्मनाम् ॥ २१ ॥

नागादे रक्षणायेव गर्ताद्याकर्षणेऽत्र न ।
दोषोऽन्यथोपदेशेऽपि स स्यात्परनयोद्भवात् ॥ २२ ॥

कश्चित्तु कुशलं चित्तं मुख्यं नास्येति नो महान् ।
तदयुक्तं यतो मुख्यं नेदं सामायिकादपि ॥ २३ ॥

स्वधर्मादन्यमुक्त्याशा तदधर्मसहिष्णुता ।
यद्द्वयं कुशले चित्ते तदसंभवि तत्त्वतः ॥ २४ ॥

अतो मोहानुगं ह्येतन्निर्मोहानामसुन्दरम् ।
बोध्यादिप्रार्थनाकल्पं सरागत्वे तु साध्वपि ॥ २५ ॥

सत्त्वधीरपि या स्वस्योपकारादपकारिणि ।
सात्मम्भरित्वपिशुना परापायानपेक्षिणी ॥ २६ ॥

पदार्थमात्ररसिकस्ततोऽनुपकृतोपकृत् ।
अगूढलक्षो भगवान् महानित्येष मे मतिः ॥ २७ ॥

अर्हमित्यक्षरं यस्य चित्ते स्फुरति सर्वदा ।
परं ब्रह्म ततः शब्दब्रह्मणः सोऽधिगच्छति ॥ २८ ॥

परःसहस्राः शरदां परे योगमुपासताम् ।
हन्तार्हन्तमनासेव्य गन्तारो न परं पदम् ॥ २९ ॥

आत्मायमर्हतो ध्यानात्परमात्मत्वमश्नुते ।
रसविद्धं यथा ताम्रं स्वर्णत्वमधिगच्छति ॥ ३० ॥

पूज्योऽयं स्मरणीयोऽयं सेवनीयोऽयमादरात् ।
अस्यैव शासने भक्तिः कार्या चेच्चेतनास्ति वः ॥ ३१ ॥

सारमेतन्मया लब्धं श्रुताब्धेरवगाहनात् ।
भक्तिर्भागवती बीजं परमानन्दसंपदाम् ॥ ३२ ॥

## भक्तिद्वात्रिंशिका ॥ ५ ॥

श्रमणानामियं पूर्णा सूत्रोक्ताचारपालनात् ।
द्रव्यस्तवाद्गृहस्थानां देशतस्तद्विधिस्त्वयम् ॥ १ ॥

न्यायार्जितधनो धीरः सदाचारः शुभाशयः ।
भवनं कारयेज्जैनं गृही गुर्वादिसंमतः ॥ २ ॥

तत्र शुद्धां महीमादौ गृह्णीयाच्छास्त्रनीतितः ।
परोपतापरहितां भविष्यद्भद्रसन्ततिम् ॥ ३ ॥

अप्रीतिर्नैव कस्यापि कार्या धर्मोद्यतेन वै ।
इत्थं शुभानुबन्धः स्यादत्रोदाहरणं प्रभुः ॥ ४ ॥

आसन्नोऽपि जनस्तत्र मान्यो दानादिना यतः ।
इत्थं शुभाशयस्फात्या बोधिवृद्धिः शरीरिणाम् ॥ ५ ॥

इष्टकादि दलं चारु दारु वा सारवन्नवम् ।
गवाद्यपीडया ग्राह्यं मूल्यौचित्येन यत्नतः ॥ ६ ॥

भृतका अपि सन्तोष्याः स्वयं प्रकृतिसाधवः ।
धर्मो भावेन न व्याजाद्धर्ममित्रेषु तेषु तु ॥ ७ ॥

स्वाशयश्च विधेयोऽत्रानिदानो जिनरागतः ।
अन्यारम्भपरित्यागाज्जलादियतनावता ॥ ८ ॥

इत्थं चैषोऽधिकत्यागात् सदारम्भः फलान्वितः ।
प्रत्यहं भाववृद्ध्याप्तैर्भावयज्ञः प्रकीर्तितः ॥ ९ ॥

जिनगेहं विधायैवं शुद्धमव्ययनीवि च ।
द्राक् तत्र कारयेद्बिम्बं साधिष्ठानं हि वृद्धिमत् ॥ १० ॥

विभवोचितमूल्येन कर्तुः पूजापुरःसरम् ।
देयं तदनघस्यैव यथा चित्तं न नश्यति ॥ ११ ॥

यावन्तश्चित्तसन्तोषास्तदा बिम्बसमुद्भवाः ।
तत्कारणानि तावन्तीत्युत्साह उचितो महान् ॥ १२ ॥

तत्कर्तरि च याप्रीतिस्तत्त्वतः सा जिने स्मृता ।
पूर्या दौर्हदभेदास्तज्जिनावस्थात्रयाश्रयाः ॥ १३ ॥

स्ववित्तस्थेऽन्यवित्ते तत्पुण्याशंसा विधीयते ।
मन्त्रन्यासोऽर्हतो नाम्ना स्वाहान्तः प्रणवादिकः ॥ १४ ॥

हेमादिना विशेषस्तु न बिम्बे किं तु भावतः ।
चेष्टया स शुभो भक्त्या तन्त्रोक्तस्मृतिमूलया ॥ १५ ॥

लोकोत्तरमिदं ज्ञेयमित्थं यद्बिम्बकारणम् ।
मोक्षदं लौकिकं चान्यत् कुर्यादभ्युदयं फलम् ॥ १६ ॥

इत्थं निष्पन्नबिम्बस्य प्रतिष्ठाप्तैस्त्रिधोदिता ।
दिनेभ्योऽर्वाग्दशभ्यस्तु व्यक्तिक्षेत्रमहाह्वयाः ॥ १७ ॥

देवोद्देशेन मुख्येयमात्मन्येवात्मनो धियः ।
स्थाप्ये समरसापत्तेरुपचाराद्बहिः पुनः ॥ १८ ॥

प्रतिष्ठितत्वज्ञानोत्थसमापत्त्या परेष्वपि ।
फलं स्याद्वीतरागाणां सन्निधानं त्वसंभवि ॥ १९ ॥

संप्रदायागतं चेह मन्त्रन्यासादि युक्तिमत् ।
अष्टौ दिनान्यविच्छित्त्या पूजा दानं च भावतः ॥ २० ॥

पूजा प्रतिष्ठितस्येत्थं बिम्बस्य क्रियतेऽर्हतः ।
भक्त्या विलेपनस्नानपुष्पधूपादिभिः शुभैः ॥ २१ ॥

सा च पञ्चोपचारा स्यात् काचिदष्टोपचारिका ।
अपि सर्वोपचारा च निजसंपद्विशेषतः ॥ २२ ॥

इयं न्यायोत्थवित्तेन कार्या भक्तिमता सता ।
विशुद्धोज्ज्वलवस्त्रेण शुचिना संयतात्मना ॥ २३ ॥

पिण्डक्रियागुणोदारैरेषा स्तोत्रैश्च संगता ।
पापगर्हापरैः सम्यक्प्रणिधानपुरःसरैः ॥ २४ ॥

अन्ये त्वाहुस्त्रिधा योगसारा सा शुद्धिचित्ततः ।
अतिचारोज्झिता विघ्नशमाभ्युदयमोक्षदा ॥ २५ ॥

आद्ययोश्चारुपुष्पाद्यानयनैतन्नियोजने ।
अन्त्यायां मनसा सर्वं संपादयति सुन्दरम् ॥ २६ ॥

न च स्नानादिना कायवधादत्रास्ति दुष्टता ।
दोषादधिकभावस्य तत्रानुभविकत्वतः ॥ २७ ॥

यतिरप्यधिकारी स्यान्न चैवं तस्य सर्वथा ।
भावस्तवाधिरूढत्वादर्थाभावादमूदृशा ॥ २८ ॥

प्रकृत्यारम्भभीरुर्वा यो वा सामायिकादिमान् ।
गृही तस्यापि नात्रार्थेऽधिकारित्वमतः स्मृतम् ॥ २९ ॥

अन्यत्रारम्भवान् यस्तु तस्यात्रारम्भशङ्किनः ।
अबोधिरेव परमा विवेकौदार्यनाशतः ॥ ३० ॥

यच्चं धर्मार्थमित्यादि तदपेक्ष्य दशान्तरम् ।
संकाशादेः किल श्रेयस्युपेत्यापि प्रवृत्तितः ॥ ३१ ॥

पूजया परमानन्दमुपकारं विना कथम् ।
ददाति पूज्य इति चेच्चिन्तामण्यादयो यथा ॥ ३२ ॥

## साधुसामग्र्यद्वात्रिंशिका ॥ ६ ॥

ज्ञानेन ज्ञानिभावः स्याद्भिक्षुभावश्च भिक्षया ।
वैराग्येण विरक्तत्वं संयतस्य महात्मनः ॥ १ ॥

विषयप्रतिभासाख्यं तथात्मपरिणामवत् ।
तत्त्वसंवेदनं चेति त्रिधा ज्ञानं प्रकीर्तितम् ॥ २ ॥

आद्यं मिथ्यादृशां मुग्धरत्नादिप्रतिभासवत् ।
अज्ञानावरणापायाद्ग्राह्यत्वाद्यविनिश्चयम् ॥ ३ ॥

भिन्नग्रन्थेर्द्वितीयं तु ज्ञानावरणभेदजम् ।
श्रद्धावत्प्रतिबन्धेऽपि कर्मणा सुखदुःखयुक् ॥ ४ ॥

स्वस्थवृत्तेस्तृतीयं तु सज्ज्ञानावरणव्ययात् ।
साधोर्विरत्यवच्छिन्नमविघ्नेन फलप्रदम् ॥ ५ ॥

निष्कम्पा च सकम्पा च प्रवृत्तिः पापकर्मणि ।
निरवद्या च सेत्याहुर्लिङ्गान्यत्र यथाक्रमम् ॥ ६ ॥

जातिभेदानुमानाय व्यक्तीनां वेदनात् स्वतः ।
तेन कर्मान्तरात् कार्यभेदेऽप्येतद्भिदाऽक्षता ॥ ७ ॥

योगादेवान्त्यबोधस्य साधुः सामग्र्यमश्नुते ।
अन्यथाकर्षगामी स्यात् पतितो वा न संशयः ॥ ८ ॥

त्रिधा भिक्षापि तत्राद्या सर्वसंपत्करी मता ।
द्वितीया पौरुषघ्नी स्याद्वृत्तिभिक्षा तथान्तिमा ॥ ९ ॥

सदानारम्भहेतुर्या सा भिक्षा प्रथमा स्मृता ।
एकबाले द्रव्यमुनौ सदानारम्भिता पुनः ॥ १० ॥

दीक्षाविरोधिनी भिक्षा पौरुषघ्नी प्रकीर्तिता ।
धर्मलाघवमेव स्यात्तया पीनस्य जीवतः ॥ ११ ॥

क्रियान्तरासमर्थत्वप्रयुक्ता वृत्तिसंज्ञिका ।
दीनान्धादिष्वियं सिद्धपुत्रादिष्वपि केषुचित् ॥ १२ ॥

अन्याबाधेन सामग्र्यं मुख्यया भिक्षयालिवत् ।
गृह्णतः पिण्डमकृतमकारितमकल्पितम् ॥ १३ ॥

नन्वेवं सद्गृहस्थानां गृहे भिक्षा न युज्यते ।
अनात्मम्भरयो यत्र स्वपरार्थं हि कुर्वते ॥ १४ ॥

संकल्पभेदविरहो विषयो यावदर्थिकम् ।
पुण्यार्थिकं च वदता दुष्टमत्र हि दुर्वचः ॥ १५ ॥

उच्यते विषयोऽत्रायं भिन्ने देये स्वभोग्यतः ।
संकल्पनं क्रियाकाले दुष्टं पुष्टमियत्तया ॥ १६ ॥

स्वोचिते तु तदारम्भे निष्ठिते नाविशुद्धिमत् ।
तदर्थकृतिनिष्ठाभ्यां चतुर्भङ्ग्यां द्वयोर्ग्रहात् ॥ १७ ॥

प्राय एवमलाभः स्यादिति चेद्बहुधाप्ययम् ।
संभवीत्यत एवोक्तो यतिधर्मोऽतिदुष्करः ॥ १८ ॥

संकल्पितस्य गृहिणा त्रिधाशुद्धिमतो ग्रहे ।
को दोष इति चेज्ज्ञाते प्रसङ्गात्पापवृद्धितः ॥ १९ ॥

यत्यर्थं गृहिणश्चेष्टा प्राण्यारम्भप्रयोजिका ।
यतेस्तद्दुर्जनोपायहीना सामग्र्यघातिनी ॥ २० ॥

वैराग्यं च स्मृतं दुःखमोहज्ञानान्वितं त्रिधा ।
आर्तध्यानाख्यमाद्यं स्याद्यथाशक्त्यप्रवृत्तितः ॥ २१ ॥

अनिच्छा ह्यत्र संसारे स्वेच्छालाभादनुत्कटा ।
नैर्गुण्यदृष्टिजं द्वेषं विना चित्ताङ्गखेदकृत् ॥ २२ ॥

एकान्तात्मग्रहोद्भूतभवनैर्गुण्यदर्शनात् ।
शान्तस्यापि द्वितीयं सज्ज्वरानुद्भवसन्निभम् ॥ २३ ॥

स्याद्वादविद्यया ज्ञात्वा बद्धानां कष्टमङ्गिनाम् ।
तृतीयं भवभीभाजां मोक्षोपायप्रवृद्धिमत् ॥ २४ ॥

सामग्र्यं स्यादनेनैव द्वयोस्तु स्वोपमर्दतः ।
अत्राङ्गत्वं कदाचित्स्याद्गुणवत्पारतन्त्र्यतः ॥ २५ ॥

भावशुद्धिरपि न्याय्या न मार्गाननुसारिणी ।
अप्रज्ञाप्यस्य बालस्य विनैतत्स्वाग्रहात्मिका ॥ २६ ॥

मोहानुत्कर्षकृच्चैतदत एवापि शास्त्रवित् ।
क्षमाश्रमणहस्तेनेत्याह सर्वेषु कर्मसु ॥ २७ ॥

यस्तु नान्यगुणान् वेद न वा स्वगुणदोषवित् ।
स एवैतन्नाद्रियते न त्वासन्नमहोदयः ॥ २८ ॥

गुणवद्बहुमानाद्यः कुर्यात्प्रवचनोन्नतिम् ।
अन्येषां दर्शनोत्पत्तेस्तस्य स्यादुन्नतिः परा ॥ २९ ॥

यस्तु शासनमालिन्येऽनाभोगेनापि वर्तते ।
बध्नाति स तु मिथ्यात्वं महानर्थनिबन्धनम् ॥ ३० ॥

स्वेच्छाचारे च बालानां मालिन्यं मार्गबाधया ।
गुणानां तेन सामग्र्यं गुणवत्पारतन्त्र्यतः ॥ ३१ ॥

इत्थं विज्ञाय मतिमान् यतिर्गीतार्थसङ्गकृत् ।
त्रिधाशुद्ध्याचरन् धर्मं परमानन्दमश्नुते ॥ ३२ ॥

# धर्मव्यवस्थाद्वात्रिंशिका ॥ ७ ॥

भक्ष्याभक्ष्यविवेकाच्च गम्यागम्यविवेकतः ।
तपोदयाविशेषाच्च स धर्मो व्यवतिष्ठते ॥ १ ॥

भक्ष्यं मांसमपि प्राह कश्चित्प्राण्यङ्गभावतः ।
ओदनादिवदित्येवमनुमानपुरःसरम् ॥ २ ॥

स्वतन्त्रसाधनत्वेऽदोऽयुक्तं दृष्टान्तदोषतः ।
प्रसङ्गसाधनत्वेऽपि बाधकत्वाद्व्यवस्थितेः ॥ ३ ॥

व्यवस्थितं हि गोः पेयं क्षीरादि रुधिरादि न ।
न्यायोऽत्राप्येष नो चेत्स्याद्भिक्षुमांसादिकं तथा ॥ ४ ॥

प्राण्यङ्गत्वादभक्ष्यत्वं न हि मांसे मतं च नः ।
जीवसंसक्तिहेतुत्वात् किं तु तद्गर्हितं बुधैः ॥ ५ ॥

पच्यमानामपक्वासु मांसपेसीषु सर्वथा ।
तन्त्रे निगोदजीवानामुत्पत्तिर्भणिता जिनैः ॥ ६ ॥

सूत्राणि कानिचिच्छेदोपभोगादिपराणि तु ।
अमद्यमांसाशितया न हन्यन्ते प्रसिद्धया ॥ ७ ॥

न प्राण्यङ्गसमुत्थं चेत्यादिना वोपि वारितम् ।
लङ्कावतारसूत्रादौ तदित्येतद्वृथोदितम् ॥ ८ ॥

न मांसभक्षणे दोषो न मद्ये न च मैथुने ।
प्रवृत्तिरेषा भूतानां निवृत्तिस्तु महाफला ॥ ९ ॥

भक्ष्यं मांसं परः प्राहानालोच्य वचनादतः ।
जन्मान्तरार्जनाद्दुष्टं न चैतद्वेद यत्स्मृतम् ॥ १० ॥

मां स भक्षयिताऽमुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥ ११ ॥

निषेधः शास्त्रबाह्योऽस्तु विधिः शास्त्रीयगोचरः ।
दोषो विशेषतात्पर्यान्नन्वेवं न यतः स्मृतम् ॥ १२ ॥

प्रोक्षितं भक्षयेन्मांसं ब्राह्मणानां च काम्यया ।
यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ॥ १३ ॥

नैतन्निवृत्त्ययोगेन तस्याः प्राप्तिनियन्त्रणात् ।
प्राप्ता चास्य निषेधेन यत एतदुहाहृतम् ॥ १४ ॥

यथाविधि नियुक्तस्तु यो मांसं नात्ति वै द्विजः ।
स प्रेत्य पशुतां याति संभवानेकविंशतिम् ॥ १५ ॥

अधिकारपरित्यागात् पारिव्राज्येऽस्तु तत्फलम् ।
इति चेत्तदभावे नादुष्टतेत्यपि संकटम् ॥ १६ ॥

मद्येऽपि प्रकटो दोषः श्रीह्रीनाशादिरैहिकः ।
सन्धानजीवमिश्रत्वान्महानामुष्मिकोऽपि च ॥ १७ ॥

नियमेन सरागत्वाद्दुष्टं मैथुनमप्यहो ।
मूलमेतदधर्मस्य निषिद्धं योगिपुङ्गवैः ॥ १८ ॥

धर्मार्थं पुत्रकामस्य स्वदारेष्वधिकारिणः ।
ऋतुकाले न तद्दुष्टं क्षुधादाविव भोजनम् ॥ १९ ॥

नैवमित्थं स्वरूपेण दुष्टत्वान्निबिडापदि ।
श्वमांसभक्षणस्येवापवादिकनिभत्वतः ॥ २० ॥

वेदं ह्यधीत्य स्नायाद्यत्तत्रैवाधीत्यसङ्गतः ।
व्याख्यातस्तदसावर्थो ब्रूते हीनां गृहस्थताम् ॥ २१ ॥

अदोषकीर्तनादस्य प्रशंसा तदसङ्गता ।
विध्युक्तेरिष्टसंसिद्धेर्बहुलोकप्रवृत्तितः ॥ २२ ॥

निवृत्तिः किं च युक्ता भो सावद्यस्येतरस्य वा ।
आद्ये स्याद्दुष्टता तेषामन्त्ये योगाद्यनादरः ॥ २३ ॥

माध्यस्थ्यं केचिदिच्छन्ति गम्यागम्याविवेकतः ।
तन्नो विपर्ययादेवानर्गलेच्छानिरोधतः ॥ २४ ॥

नाद्रियन्ते तपः केचिद्दुःखरूपतयाऽबुधाः ।
आर्तध्यानादिहेतुत्वात्कर्मोदयसमुद्भवात् ॥ २५ ॥

यथासमाधानविधेरन्तः सुखनिषेकतः ।
नैतज्ज्ञानादियोगेन क्षायोपशमिकत्वतः ॥ २६ ॥

दयापि लौकिकी नेष्टा षट्कायानवबोधतः ।
ऐकान्तिकी च नाज्ञानान्निश्चयव्यवहारयोः ॥ २७ ॥

व्यवहारात्परप्राणरक्षणं यतनावतः ।
निश्चयान्निर्विकल्पस्वभावप्राणावनं तु सा ॥ २८ ॥

यत्नतो जीवरक्षार्थो तत्पीडापि न दोषकृत् ।
अपीडनेऽपि पीडैव भवेदयतनावतः ॥ २९ ।

रहस्यं परमं साधोः समग्रश्रुतधारिणः ।
परिणामप्रमाणत्वं निश्चयैकाग्रचेतसः ॥ ३० ॥

तिष्ठतो न शुभो भावो ह्यसदायतनेषु च ।
गन्तव्यं तत्सदाचारभावाभ्यन्तरवर्त्मना ॥ ३१ ॥

विदित्वा लोकमुत्क्षिप्य लोकसंज्ञां च लभ्यते ।
इत्थं व्यवस्थितो धर्मः परमानन्दकन्दभूः ॥ ३२ ॥

## वादद्वात्रिंशिका ॥ ८ ॥

शुष्कवादो विवादश्च धर्मवादस्तथाऽपरः ।
कीर्तितस्त्रिविधो वाद इत्येवं तत्त्वदर्शिभिः ॥ १ ॥

परानर्थो लघुत्वं वा विजये च पराजये ।
यत्रोक्तौ सह दुष्टेन शुष्कवादः स कीर्तितः ॥ २ ॥

छलजातिप्रधानोक्तिर्दुस्थितेनार्थिना सह ।
विवादोऽत्रापि विजयालाभो वा विघ्नकारिता ॥ ३ ॥

ज्ञातस्वशास्त्रतत्त्वेन मध्यस्थेनाघभीरुणा ।
कथाबन्धस्तत्त्वधिया धर्मवादः प्रकीर्तितः ॥ ४ ॥

वादिनो धर्मबोधादि विजयेऽस्य महत्फलम् ।
आत्मनो मोहनाशश्च प्रकटस्तत्पराजये ॥ ५ ॥

अयमेव विधेयस्तत्तत्त्वज्ञेन तपस्विना ।
देशाद्यपेक्षयान्योऽपि विज्ञाय गुरुलाघवम् ॥ ६ ॥

अत्र ज्ञातं हि भगवान् यत्स नाभाव्यपर्षदि ।
दिदेश धर्ममुचिते देशेऽन्यत्र दिदेश च ॥ ७ ॥

विषयो धर्मवादस्य धर्मसाधनलक्षणः ।
स्वतन्त्रसिद्धः प्रकृतोपयुक्तोऽसद्ग्रहव्यये ॥ ८ ॥

यथाहिंसादयः पञ्च व्रतधर्मयमादिभिः ।
पदैः कुशलधर्माद्यैः कथ्यन्ते स्वस्वदर्शने ॥ ९ ॥

मुख्यवृत्त्या क्व युज्यन्ते न वैतानि क्व दर्शने ।
विचार्यमेतन्निपुणैरव्यग्रेणान्तरात्मना ॥ १० ॥

प्रमाणलक्षणादेस्तु नोपयोगोऽत्र कश्चन ।
तन्निश्चयेऽनवस्थानादन्यथार्थस्थितेर्यतः ॥ ११ ॥

प्रसिद्धानि प्रमाणानि व्यवहारश्च तत्कृतः ।
प्रमाणलक्षणस्योक्तौ ज्ञायते न प्रयोजनम् ॥ १२ ॥

न चार्थसंशयापत्तिः प्रमाणेऽतत्त्वशङ्कया ।
तत्राप्येतदविच्छेदाद्धेत्वभावस्य साम्यतः ॥ १३ ॥

अर्थयाथात्म्यशङ्का तु तत्त्वज्ञानोपयोगिनी ।
शुद्धार्थस्थापकत्वं च तन्त्रं सद्दर्शनग्रहे ॥ १४ ॥

तत्रात्मा नित्य एवेति येषामेकान्तदर्शनम् ।
हिंसादयः कथं तेषां कथमप्यात्मनोऽव्ययात् ॥ १५ ॥

मनोयोगविशेषस्य ध्वंसो मरणमात्मनः ।
हिंसा तच्चेन्न तत्त्वस्य सिद्धेरर्थसमाजतः ॥ १६ ॥

शरीरेणापि संबन्धो नित्यत्वेऽस्य न संभवी ।
विभुत्वेन च संसारः कल्पितः स्यादसंशयम् ॥ १७ ॥

अदृष्टाद्देहसंयोगः स्यादन्यतरकर्मजः ।
इत्थं जन्मोपपत्तिश्च न तद्योगाविवेचनात् ॥ १८ ॥

आत्मक्रियां विना च स्यान्मिताणुग्रहणं कथम् ।
कथं संयोगभेदादिकल्पना चापि युज्यते ॥ १९ ॥

अनित्यैकान्तपक्षेऽपि हिंसादीनामसंभवः ।
नाशहेतोरयोगेन क्षणिकत्वस्य साधनात् ॥ २० ॥

न च सन्तानभेदस्य जनको हिंसको मतः ।
सांवृतत्वादजन्यत्वाद्भावत्वनियतं हि तत् ॥ २१ ॥

नरादिक्षणहेतुश्च शूकरादेर्न हिंसकः ।
शूकरान्त्यक्षणेनैव व्यभिचारप्रसङ्गतः ॥ २२ ॥

अनन्तरक्षणोत्पादे बुद्धलुब्धकयोस्तुला ।
नैवं तद्विरतिः क्वापि ततः शास्त्राद्यसंगतिः ॥ २३ ॥

घटन्ते न विनाऽहिंसां सत्यादीन्यपि तत्त्वतः ।
एतस्या वृत्तिभूतानि तानि यद्भगवाञ्जगौ ॥ २४ ॥

मौनीन्द्रे च प्रवचने युज्यते सर्वमेव हि ।
नित्यानित्ये स्फुटं देहाद्भिन्नाभिन्ने तथात्मनि ॥ २५ ॥

पीडाकर्तृत्वतो देहव्यापत्त्या दुष्टभावतः ।
त्रिधा हिंसागमप्रोक्ता न हीत्थमपहेतुका ॥ २६ ॥

हन्तुर्जाग्रति को दोषो हिंसनीयस्य कर्मणि ।
प्रसक्तिस्तदभावे चान्यत्रापीति मुधा वचः ॥ २७ ॥

हिंस्यकर्मविपाके यद्दुष्टाशयनिमित्तता ।
हिंसकत्वं न तेनेदं वैद्यस्य स्याद्रिपोरिव ॥ २८ ॥

इत्थं सदुपदेशादेस्तन्निवृत्तिरपि स्फुटा ।
सोपक्रमस्य पापस्य नाशात्स्वाशयवृद्धितः ॥ २९ ॥

तथारुचिप्रवृत्त्या च व्यज्यते कर्म तादृशम् ।
संशयं जानता ज्ञातः संसार इति हि श्रुतिः ॥ ३० ॥

अपवर्गतरोर्बीजं मुख्याहिंसेयमुच्यते ।
सत्यादीनि व्रतान्यत्र जायन्ते पल्लवा नवाः ॥ ३१ ॥

विषयो धर्मवादस्य निरस्य मतिंकर्दमम् ।
संशोध्यः स्वाशयादित्थं परमानन्दमिच्छता ॥ ३२ ॥

## कथाद्वात्रिंशिका ॥ ९ ॥

अर्थकामकथा धर्मकथा मिश्रकथा तथा ।
कथा चतुर्विधा तत्र प्रथमा यत्र वर्ण्यते ॥ १ ॥

विद्या शिल्पमुपायश्चानिर्वेदश्चापि संचयः ।
दक्षत्वं सामभेदश्च दण्डो दानं च यत्नतः ॥ २ ॥

रूपं वयश्च वेषश्च दाक्षिण्यं चापि शिक्षितम् ।
दृष्टं श्रुतं चानुभूतं द्वितीयायां च संस्तवः ॥ ३ ॥

तृतीयाक्षेपणी चैका तथा विक्षेपणी परा ।
अन्यसंवेजनी निर्वेजनी चेति चतुर्विधा ॥ ४ ॥

आचाराद्व्यवहाराच्च प्रज्ञप्तेर्दृष्टिवादतः ।
आद्या चतुर्विधा श्रोतुश्चित्ताक्षेपस्य कारणम् ॥ ५ ॥

क्रिया दोषव्यपोहश्च संदिग्धे साधुबोधनम् ।
श्रोतुः सूक्ष्मोक्तिराचारादयो ग्रन्थान् परे जगुः ॥ ६ ॥

एतैः प्रज्ञापितः श्रोता चित्रस्थ इव जायते ।
दिव्यास्त्रवन्न हि क्वापि मोघाः स्युः सुधियां गिरः ॥ ७ ॥

विद्या क्रिया तपो वीर्यं तथा समितिगुप्तयः ।
आक्षेपणीकल्पवल्ल्या मकरन्द उदाहृतः ॥ ८ ॥

स्वपरश्रुतमिथ्यान्यवादोक्त्या संक्रमोत्क्रमम् ।
विक्षेपणी चतुर्धा स्यादृजोर्मार्गाभिमुख्यहृत् ॥ ९ ॥

अतिप्रसिद्धसिद्धान्तशून्या लोकादिगा हि सा ।
ततो दोषदृगाशङ्का स्याद्वा मुग्धस्य तत्त्वधीः ॥ १० ॥

क्षिप्त्वा दोषान्तरं दद्यात्स्वश्रुतार्थं परश्रुते ।
व्याक्षेपे चोच्यमानेऽस्मिन्मार्गाप्तौ दूषयेददः ॥ ११ ॥

कटुकौषधपानाभां कारयित्वा रुचिं सता ।
इयं देयान्यथा सिद्धिर्न स्यादिति विदुर्बुधाः ॥ १२ ॥

मता संवेजनी स्वान्यदेहेहप्रेत्यगोचरा ।
यया संवेज्यते श्रोता विपाकविरसत्वतः ॥ १३ ॥

वैक्रियद्ध्र्यादयो ज्ञानतपश्चरणसंपदः ।
शुभाशुभोदयध्वंसफलमस्या रसः स्मृतः ॥ १४ ॥

चतुर्भङ्गीं समाश्रित्य प्रेत्येहफलसंश्रयाम् ।
पापकर्मविपाकं या ब्रूते निर्वेजनी तु सा ॥ १५ ॥

स्तोकस्यापि प्रमादस्य परिणामोऽतिदारुणः ।
वर्ण्यमानः प्रबन्धेन निर्वेजन्या रसः स्मृतः ॥ १६ ॥

आदावाक्षेपणीं दद्याच्छिष्यस्य धनसन्निभाम् ।
विक्षेपणीं गृहीतेऽर्थे वृद्ध्युपायमिवादिशेत् ॥ १७ ॥

आक्षेपण्या किलाक्षिप्ता जीवाः सम्यक्त्वभागिनः ।
विक्षेपण्यास्तु भजना मिथ्यात्वं वातिदारुणम् ॥ १८ ॥

आद्या यथा शुभं भावं सूते नान्या कथा तथा ।
यादृग्गुणः स्यात्पीयूषात्तादृशो न विषादपि ॥ १९ ॥

धर्मार्थकामाः कथ्यन्ते सूत्रे काव्ये च यत्र सा ।
मिश्राख्या विकथा तु स्याद्भक्तस्त्रीदेशराड्गता ॥ २० ॥

प्रज्ञापकं समाश्रित्य कथा एता अपि क्रमात् ।
अकथा विकथा वा स्युः कथा वा भावभेदतः ॥ २१ ॥

मिथ्यात्वं वेदयन् ब्रूते लिङ्गस्थो वा गृहस्थितः ।
यत्साऽकथाशयोद्भूतेः श्रोतुर्वक्त्रनुसारतः ॥ २२ ॥

ज्ञानक्रियातपोयुक्ताः सद्भावं कथयन्ति यत् ।
जगज्जीवहितं सेयं कथा धीरैरुदाहृता ॥ २३ ॥

यः संयतः प्रमत्तस्तु ब्रूते सा विकथा मता ।
कर्तृश्रोत्राशये तु स्याद्भजना भेदमञ्चति ॥ २४ ॥

सन्धुक्षयन्ति मदनं श्रृङ्गारोक्तैरुदर्चिषम् ।
कथनीया कथा नैव साधुना सिद्धिमिच्छता ॥ २५ ॥

तपोनियमसारा तु कथनीया विपश्चिता ।
संवेदं वापि निर्वेदं यां श्रुत्वा मनुजो व्रजेत् ॥ २६ ॥

महार्थापि कथा ऽकथ्या परिक्लेशेन धीमता ।
अर्थं हन्ति प्रपञ्चो हि पीठक्ष्मामिव पादपः ॥ २७ ॥

प्रपञ्चितज्ञशिष्यस्यानुरोधे सोऽप्यदोषकृत् ।
सूत्रार्थादिक्रमेणातोऽनुयोगस्त्रिविधः स्मृतः ॥ २८ ॥

विध्युद्यमभयोत्सर्गापवादोभयवर्णकैः ।
कथयन्न पटुः सूत्रमपरिच्छिद्य केवलम् ॥ २९ ॥

एवं ह्येकान्तबुद्धिः स्यात्सा च सम्यक्त्वघातिनी ।
विभज्य वादिनो युक्ता कथायामधिकारिता ॥ ३० ॥

विधिना कथयन् धर्मं हीनोऽपि श्रुतदीपनात् ।
वरं न तु क्रियास्थोऽपि मूढो धर्माध्वतस्करः ॥ ३१ ॥

इत्थं व्युत्पत्तिमात्रायां कथयन् पण्डितः कथाम् ।
स्वसामर्थ्यानुसारेण परमानन्दमश्नुते ॥ ३२ ॥

## योगलक्षणद्वात्रिंशिका ॥ १० ॥

मोक्षेण योजनादेव योगो ह्यत्र निरुच्यते ।
लक्षणं तेन तन्मुख्यहेतुव्यापारतास्य तु ॥ १ ॥

मुख्यत्वं चान्तरङ्गत्वात् फलाक्षेपाच्च दर्शितम् ।
चरमे पुद्गलावर्ते यत एतस्य संभवः ॥ २ ॥

न सन्मार्गाभिमुख्यं स्यादावर्तेषु परेषु तु ।
मिथ्यात्वच्छन्नबुद्धीनां दिङ्मूढानामिवाङ्गिनाम् ॥ ३ ॥

तदा भवाभिनन्दी स्यात्संज्ञाविष्कम्भणं विना ।
धर्मकृत् कश्चिदेवाङ्गी लोकपङ्क्तिकृतादरः ॥ ४ ॥

क्षुद्रो लाभरतिर्दीनो मत्सरी भयवान् शठः ।
अज्ञो भवाभिनन्दी स्यान्निष्फलारम्भसंगतः ॥ ५ ॥

लोकाराधनहेतोर्या मलिनेनान्तरात्मना ।
क्रियते सत्क्रिया सा च लोकपङ्क्तिरुदाहृता ॥ ६ ॥

महत्यल्पत्वबोधेन विपरीतफलावहा ।
भवाभिनन्दिनो लोकपङ्क्त्या धर्मक्रिया मता ॥ ७ ॥

धर्मार्थं सा शुभायापि धर्मस्तु न तदर्थिनः ।
क्लेशोऽपीष्टो धनार्थं हि क्लेशार्थं जातु नो धनम् ॥ ८ ॥

अनाभोगवतः सापि धर्माहानिकृतो वरम् ।
शुभा तत्त्वेन नैकापि प्रणिधानाद्यभावतः ॥ ९ ॥

प्रणिधानं प्रवृत्तिश्च तथा विघ्नजयस्त्रिधा ।
सिद्धिश्च विनियोगश्च एते कर्मशुभाशयाः ॥ १० ॥

प्रणिधानं क्रियानिष्ठमधोवृत्तिकृपानुगम् ।
परोपकारसारं च चित्तं पापविवर्जितम् ॥ ११ ॥

प्रवृत्तिः प्रकृतस्थाने यत्नातिशयसंभवा ।
अन्याभिलाषरहिता चेतःपरिणतिः स्थिरा ॥ १२ ॥

बाह्यान्तर्व्याधिमिथ्यात्वजयव्यङ्ग्याशयात्मकः ।
कण्टकज्वरमोहानां जयैर्विघ्नजयः समः ॥ १३ ॥

सिद्धिस्तात्त्विकधर्माप्तिः साक्षादनुभवात्मिका ।
कृपोपकारविनयान्विता हीनादिषु क्रमात् ॥ १४ ॥

अन्यस्य योजनं धर्मे विनियोगस्तदुत्तरम् ।
कार्यमन्वयसंपत्त्या तदवन्ध्यफलं मतम् ॥ १५ ॥

एतैराशययोगैस्तु विना धर्माय न क्रिया ।
प्रत्युत प्रत्यपायाय लोभक्रोधक्रिया यथा ॥ १६ ॥

तस्मादचरमावर्तेष्वयोगो योगवर्त्मनः ।
योग्यत्वेऽपि तृणादीनां घृतत्वादेस्तदा यथा ॥ १७ ॥

नवनीतादिकल्पस्तच्चरमावर्त इष्यते ।
अत्रैव विमलो भावो गोपेन्द्रोऽपि यदभ्यधात् ॥ १८ ॥

अनिवृत्ताधिकारायां प्रकृतौ सर्वथैव हि ।
न पुंसस्तत्त्वमार्गेऽस्मिञ्जिज्ञासापि प्रवर्तते ॥ १९ ॥

साधिकारप्रकृतिमत्यावर्ते हि नियोगतः ।
पथ्येच्छेव न जिज्ञासा क्षेत्ररोगोदये भवेत् ॥ २० ॥

पुरुषाभिभवः कश्चित्तस्यामपि हि हीयते ।
युक्तं तेनैतदधिकमुपरिष्टाद्भणिष्यते ॥ २१ ॥

भावस्य मोक्षहेतुत्वं तेन मोक्षे व्यवस्थितम् ।
तस्यैव चरमावर्ते क्रियाया अपि योगतः ॥ २२ ॥

रसानुवेधात्ताम्रस्य हेमत्वं जायते यथा ।
क्रियाया अपि सम्यक्त्वं तथा भावानुवेधतः ॥ २३ ॥

भावसात्म्येऽत एवास्या भङ्गेऽपि व्यक्तमन्वयः ।
सुवर्णघटतुल्यां तां ब्रुवते सौगता अपि ॥ २४ ॥

शिरोदकसमो भावः क्रिया च खननोपमा ।
भावपूर्वादनुष्ठानाद्भाववृद्धिरतो ध्रुवा ॥ २५ ॥

मण्डूकचूर्णसदृशः क्लेशध्वंसः क्रियाकृतः ।
तद्भस्मसदृशस्तु स्याद्भावपूर्वक्रियाकृतः ॥ २६ ॥

विचित्रभावद्वारा तत् क्रिया हेतुः शिवं प्रति ।
अस्या व्यञ्जकताप्येषा परा ज्ञाननयोचिता ॥ २७ ॥

व्यापारश्चिद्विवर्तत्वाद्वीर्योल्लासाच्च स स्मृतः ।
विविच्यमाना भिद्यन्ते परिणामा हि वस्तुनः ॥ २८ ॥

जीवस्थानानि सर्वाणि गुणस्थानानि मार्गणाः ।
परिणामा विवर्तन्ते जीर्वस्तु न कदाचन ॥ २९ ॥

उपाधिः कर्मणैव स्यादाचारादौ श्रुतं ह्यदः ।
विभावानित्यभावेऽपि ततो नित्यस्वभाववान् ॥ ३० ॥

द्रव्यादेः स्यादभेदेऽपि शुद्धभेदनयादिना ।
इत्थं व्युत्पादनं युक्तं नयसारा हि देशना ॥ ३१ ॥

योगलक्षणमित्येवं जानानो जिनशासने ।
परोक्तानि परीक्षेत परमानन्दबद्धधीः ॥ ३२ ॥

## पातञ्जलयोगलक्षणविचारद्वात्रिंशिका ॥ ११ ॥

चित्तवृत्तिनिरोधं तु योगमाह पतञ्जलिः ।
द्रष्टुः स्वरूपावस्थानं यत्र स्यादविकारिणि ॥ १ ॥

आपन्ने विषयाकारं यत्र चेन्द्रियवृत्तितः ।
पुमान् भाति तथा चन्द्रश्चलन्नीरे चलन् यथा ॥ २ ॥

तच्चित्तं वृत्तयस्तस्य पञ्चतय्यः प्रकीर्तिताः ।
मानं भ्रमो विकल्पश्च निद्रा च स्मृतिरेव च ॥ ३ ॥

मानं ज्ञानं यथार्थं स्यादतस्मिंस्तन्मतिर्भ्रमः ।
पुंसश्चैतन्यमित्यादौ विकल्पोऽवस्तुशाब्दधीः ॥ ४ ॥

निद्रा च वासनाभावप्रत्ययालम्बना स्मृता ।
सुखादिविषया वृत्तिर्जागरे स्मृतिदर्शनात् ॥ ५ ॥

तथानुभूतविषयासंप्रमोषः स्मृतिः स्मृता ।
आसां निरोधः शक्त्यान्तःस्थितिर्हेतौ बहिर्हतिः ॥ ६ ॥

स चाभ्यासाच्च वैराग्यात्तत्राभ्यासः स्थितौ श्रमः ।
दृढभूमिः स च चिरं नैरन्तर्यादराश्रितः ॥ ७ ॥

या वशीकारसंज्ञा स्याद्दृष्टानुश्रविकार्थयोः ।
वितृष्णस्यापरं तत् स्याद्वैराग्यमनधीनता ॥ ८ ॥

तत्परं जातपुंख्यातेर्गुणवैतृष्ण्यसंज्ञकम् ।
बहिर्वैमुख्यमुत्पाद्य वैराग्यमुपयुज्यते ॥ ९ ॥

निरोधे पुनरभ्यासो जनयन् स्थिरतां दृढाम् ।
परमानन्दनिष्यन्दशान्तश्रोतः प्रदर्शनात् ॥ १० ॥

न चैतद्युज्यते किञ्चिदात्मन्यपरिणामिनि ।
कूटस्थे स्यादसंसारोऽमोक्षो वा तत्र हि ध्रुवम् ॥ ११ ॥

प्रकृतेरपि चैकत्वे मुक्तिः सर्वस्य नैव वा ।
जडायाश्च पुमर्थस्य कर्तव्यत्वमयुक्तिमत् ॥ १२ ॥

ननु चित्तस्य वृत्तीनां सदा ज्ञाननिबन्धनात् ।
चिच्छायासंक्रमाद्धेतोरात्मनोऽपरिणामिता ॥ १३ ॥

स्वाभासं खलु नो चित्तं दृश्यत्वेन घटादिवत् ।
तदन्यदृश्यतायां चानवस्थास्मृतिसंकरौ ॥ १४ ॥

अङ्गाङ्गिभावचाराभ्यां चितिरप्रतिसंक्रमा ।
द्रष्टृदृश्योपरक्तं तच्चित्तं सर्वार्थगोचरम् ॥ १५ ॥

नित्योदिता त्वभिव्यङ्ग्या चिच्छक्तिर्द्विविधा हि नः ।
आद्या पुमान् द्वितीया तु सत्त्वे तत्सन्निधानतः ॥ १६ ॥

सत्त्वे पुंस्थितचिच्छायासमाऽन्या तदुपस्थितिः ।
प्रतिबिम्बात्मको भोगः पुंसि भेदाग्रहादयम् ॥ १७ ॥

इत्थं प्रत्यात्मनियतं बुद्धितत्त्वं हि शक्तिमत् ।
निर्वाहे लोकयात्रायास्ततः क्वातिप्रसञ्जनम् ॥ १८ ॥

कर्तव्यत्वं पुमर्थस्यानुलोम्यप्रातिलोम्यतः ।
प्रकृतौ परिणामानां शक्ती स्वाभाविके उभे ॥ १९ ॥

न चैवं मोक्षशास्त्रस्य वैयर्थ्यं प्रकृतेर्यतः ।
ततो दुःखनिवृत्त्यर्थं कर्तृत्वस्मयवर्जनम् ॥ २० ॥

व्यक्तं कैवल्यपादेऽदः सर्वं साध्विति चेन्न तत् ।
इत्थं हि प्रकृतेर्मोक्षो न पुंसस्तददो वृथा ॥ २१ ॥

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥ २२ ॥

बुद्ध्या सर्वोपपत्तौ च मानमात्मनि मृग्यते ।
संहत्यकारिता मानं पारार्थ्यनियता च न ॥ २३ ॥

सत्त्वादीनामपि स्वाङ्गिन्युपकारोपपत्तितः ।
बुद्धिर्नामैव पुंसस्तत् स्याच्च तत्त्वान्तरव्ययः ॥ २४ ॥

व्यापारभेदादेकस्य वायोः पञ्चविधत्ववत् ।
अहंकारादिसंज्ञानोपपत्तिसुकरत्वतः ॥ २५ ॥

पुंसश्च व्यञ्जकत्वेऽपि कूटस्थत्वमयुक्तिमत् ।
अधिष्ठानत्वमेतच्चेत्तदेत्यादि निरर्थकम् ॥ २६ ॥

निमित्तत्वेऽपि कौटस्थ्यमथास्यापरिणामतः ।
स्याद्भेदो धर्मभेदेन तथापि भवमोक्षयोः ॥ २७ ॥

प्रसङ्गतादवस्थ्यं च बुद्धेर्भेदेऽपि तत्त्वतः ।
प्रकृत्यन्ते लये मुक्तेर्न चेदव्याप्यवृत्तिता ॥ २८ ॥

प्रधानभेदे चैतत्स्यात्कर्म बुद्धिगुणः पुमान् ।
स्याद्ध्रुवश्चाध्रुवश्चेति जयताज्जैनदर्शनम् ॥ २९ ॥

तथा च कायरोधादावव्याप्तं प्रोक्तलक्षणम् ।
एकाग्रतावधौ रोधे वाच्ये च प्राचि चेतसि ॥ ३० ॥

योगारम्भोऽथ विक्षिप्ते व्युत्थानं क्षिप्तमूढयोः ।
एकाग्रे च निरुद्धे च समाधिरिति चेन्न तत् ॥ ३१ ॥

योगारम्भेऽपि योगस्य निश्चयेनोपपादनात् ।
मदुक्तं लक्षणं तस्मात्परमानन्दकृत् सताम् ॥ ३२ ॥

## पूर्वसेवाद्वात्रिंशिका ॥ १२ ॥

पूर्वसेवा तु योगस्य गुरुदेवादिपूजनम् ।
सदाचारस्तपो मुक्त्यद्वेषश्चेति प्रकीर्तिताः ॥ १ ॥

माता पिता कलाचार्य एतेषां ज्ञातयस्तथा ।
वृद्धा धर्मोपदेष्टारो गुरुवर्गः सतां मतः ॥ २ ॥

पूजनं चास्य नमनं त्रिसन्ध्यं पर्युपासनम् ।
अवर्णाश्रवणं नामश्लाघोत्थानासनार्पणे ॥ ३ ॥

सर्वदा तदनिष्टेष्टत्यागोपादाननिष्ठता ।
स्वपुमर्थमनाबाध्य साराणां च निवेदनम् ॥ ४ ॥

तद्वित्तयोजनं तीर्थे तन्मृत्यनुमतेर्भिया ।
तदासनाद्यभोगश्च तद्बिम्बस्थापनार्चने ॥ ५ ॥

देवानां पूजनं ज्ञेयं शौचश्रद्धादिपूर्वकम् ।
पुष्पैर्विलेपनैर्धूपैर्नैवेद्यैः शोभनैः स्तवैः ॥ ६ ॥

अधिमुक्तिवशान्मान्या अविशेषेण वा सदा ।
अनिर्णीतविशेषाणां सर्वे देवा महात्मनाम् ॥ ७ ॥

सर्वान् देवान्नमस्यन्ति नैकं देवं समाश्रिताः ।
जितेन्द्रिया जितक्रोधा दुर्गाण्यतितरन्ति ते ॥ ८ ॥

चारिसञ्जीविनीचारन्यायादेवं फलोदयः ।
मार्गप्रवेशरूपः स्याद्विशेषेणादिकर्मणाम् ॥ ९ ॥

अधिज्ञातविशेषाणां विशेषेऽप्येतदिष्यते ।
स्वस्य वृत्तविशेषेऽपि परेषु द्वेषवर्जनात् ॥ १० ॥

नातुरापथ्यतुल्यं यद्दानं तदपि चेष्यते ।
पात्रे दीनादिवर्गे च पोष्यवर्गाविरोधतः ॥ ११ ॥

लिङ्गिनः पात्रमपचा विशिष्य स्वक्रियाकृतः ।
दीनान्धकृपणादीनां वर्गः कार्यान्तराक्षमः ॥ १२ ॥

सुदाक्षिण्यं दयालुत्वं दीनोद्धारः कृतज्ञता ।
जनापवादभीरुत्वं सदाचाराः प्रकीर्तिताः ॥ १३ ॥

रागो गुणिनि सर्वत्र निन्दात्यागस्तथापदि ।
अदैन्यं सत्प्रतिज्ञत्वं संपत्तावपि नम्रता ॥ १४ ॥

अविरुद्धकुलाचारपालनं मितभाषिता ।
अपि कण्ठगतैः प्राणैरप्रवृत्तिश्च गर्हिते ॥ १५ ॥

प्रधानकार्यनिर्बन्धः सद्व्ययोऽसद्व्ययोज्झनम् ।
लोकानुवृत्तिरुचिता प्रमादस्य च वर्जनम् ॥ १६ ॥

तपश्चान्द्रायणं कृच्छ्रं मृत्युघ्नं पापसूदनम् ।
आदिधार्मिकयोग्यं स्यादपि लौकिकमुत्तमम् ॥ १७ ॥

एकैकं वर्धयेद् ग्रासं शुक्ले कृष्णे च हापयेत् ।
भुञ्जीत नामावास्यायामेष चान्द्रायणो विधिः ॥ १८ ॥

सन्तापनादिभेदेन कृच्छ्रमुक्तमनेकधा ।
अकृच्छ्रादतिकृच्छ्रेषु हन्त सन्तारणं परम् ॥ १९ ॥

मासोपवासमित्याहुर्मृत्युघ्नं तु तपोधनाः ।
मृत्युञ्जयजपोपेतं परिशुद्धं विधानतः ॥ २० ॥

पापसूदनमप्येवं तत्तत्पापाद्यपेक्षया ।
चित्रमन्त्रजपप्रायं प्रत्यापत्तिविशोधितम् ॥ २१ ॥

मोक्षः कर्मक्षयो नाम भोगसंक्लेशवर्जितः ।
तत्र द्वेषो दृढाज्ञानादनिष्टप्रतिपत्तितः ॥ २२ ॥

भवाभिनन्दिनां सा च भवशर्मोत्कटेच्छया ।
श्रूयन्ते चैतदालापा लोके शास्त्रेऽप्यसुन्दराः ॥ २३ ॥

मदिराक्षी न यत्रास्ति तारुण्यमदविह्वला ।
जडस्तं मोक्षमाचष्टे प्रिया स इति नो मतम् ॥ २४ ॥

वरं वृन्दावने रम्ये क्रोष्टुत्वमभिवाञ्छितम् ।
न त्वेवाविषयो मोक्षः कदाचिदपि गौतम ! ॥ २५ ॥

द्वेषोऽयमत्यनर्थाय तदभावस्तु देहिनाम् ।
भवानुत्कटरागेण सहजाल्पमलत्वतः ॥ २६ ॥

मलस्तु योग्यता योगकषायाख्यात्मनो मता ।
अन्यथाऽतिप्रसङ्गः स्याज्जीवत्वस्याविशेषतः ॥ २७ ॥

प्रागबन्धान्न बन्धश्चेत् किं तत्रैव नियामकम् ।
योग्यतां तु फलोन्नेयां बाधते दूषणं न तत् ॥ २८ ॥

दिदृक्षा भवबीजं चाविद्या चानादिवासना ।
भङ्ग्येषैवाश्रिता सांख्यशैववेदान्तिसौगतैः ॥ २९ ॥

प्रत्यावर्तं व्ययोऽप्यस्यास्तदल्पत्वेऽस्य संभवः ।
अतोऽपि श्रेयसां श्रेणी किं पुनर्मुक्तिरागतः ॥ ३० ॥

न चायमेव रागः स्यान्मृदुमध्याधिकत्वतः ।
तत्रोपाये च नवधा योगिभेदप्रदर्शनात् ॥ ३१ ॥

द्वेषस्याभावरूपत्वाददद्वेषश्चैक एव हि ।
रागात् क्षिप्रं क्रमाच्चातः परमानन्दसंभवः ॥ ३२ ॥

## मुक्त्यद्वेषप्राधान्यद्वात्रिंशिका ॥ १३ ॥

उक्तभेदेषु योगीन्द्रैर्मुक्त्यद्वेषः प्रशस्यते ।
मुक्त्युपायेषु नो चेष्टा मलनायैव यत्ततः ॥ १ ॥

विषान्नतृप्तिसदृशं तद्यतो व्रतदुर्ग्रहः ।
उक्तः शास्त्रेषु शस्त्राग्निव्यालदुर्ग्रहसन्निभः ॥ २ ॥

ग्रैवेयकाप्तिरप्यस्माद्विपाकविरसाऽहिता ।
मुक्त्यद्वेषश्च तत्रापि कारणं न क्रियैव हि ॥ ३ ॥

लाभाद्यर्थितयोपाये फले चाप्रतिपत्तितः ।
व्यापन्नदर्शनानां हि न द्वेषो द्रव्यलिङ्गिनाम् ॥ ४ ॥

मुक्तौ च मुक्त्युपाये च मुक्त्यर्थं प्रस्थिते पुनः ।
यस्य द्वेषो न तस्यैव न्याय्यं गुर्वादिपूजनम् ॥ ५ ॥

गुरुदोषवतः स्वल्पा सत्क्रियापि गुणाय न ।
भौतहन्तुर्यथा तस्य पदस्पर्शनिषेधनम् ॥ ६ ॥

मुक्त्यद्वेषान्महापापनिवृत्त्या यादृशो गुणः ।
गुर्वादिपूजनात्तादृक् केवलान्न भवेत्क्वचित् ॥ ७ ॥

एकमेव ह्यनुष्ठानं कर्तृभेदेन भिद्यते ।
सरुजेतरभेदेन भोजनादिगतं यथा ॥ ८ ॥

भवाभिष्वङ्गतस्तेनानाभोगाच्च विषादिषु ।
अनुष्ठानत्रयं मिथ्या द्वयं सत्यं विपर्ययात् ॥ ९ ॥

इहामुत्र फलापेक्षा भवाभिष्वङ्ग उच्यते ।
क्रियोचितस्य भावस्यानाभोगस्त्वतिलङ्घनम् ॥ १० ॥

विषं गरोऽननुष्ठानं तद्धेतुरमृतं परम् ।
गुर्वादिपूजानुष्ठानमिति पञ्चविधं जगुः ॥ ११ ॥

विषं लब्ध्याद्यपेक्षातः क्षणात्सच्चित्तमारणात् ।
दिव्यभोगाभिलाषेण गरः कालान्तरे क्षयात् ॥ १२ ॥

संमोहादननुष्ठानं सदनुष्ठानरागतः ।
तद्धेतुरमृतं तु स्याच्छ्रद्धया जैनवर्त्मनः ॥ १३ ॥

चरमे पुद्गलावर्ते तदेवं कर्तृभेदतः ।
सिद्धमन्यादृशं सर्वं गुरुदेवादिपूजनम् ॥ १४ ॥

सामान्ययोग्यतैव प्राक् पुंसः प्रववृते किल ।
तदा समुचिता सा तु संपन्नेति विभाव्यताम् ॥ १५ ॥

चतुर्थं चरमावर्ते प्रायोऽनुष्ठानमिष्यते ।
अनाभोगादिभावे तु जातु स्यादन्यथापि हि ॥ १६ ॥

नन्वद्वेषोऽथवा रागो मोक्षे तद्धेतुतोचितः ।
आद्ये तत्स्यादभव्यानामन्त्ये न स्यात्तदद्विषाम् ॥ १७ ॥

न चाद्वेषे विशेषस्तु कोऽपीति प्राग् निदर्शितम् ।
ईषद्रागाद्विशेषश्चेदद्वेषोपक्षयस्ततः ॥ १८ ॥

उत्कटयनुत्कटत्वाभ्यां प्रतियोगिकृतोऽस्त्वयम् ।
नैवं सत्यामुपेक्षायां देशमात्रवियोगतः ॥ १९ ॥

सत्यं बीजं हि तद्धेतोरेतदन्यतरार्जितः ।
क्रियारागो न तेनातिप्रसङ्गः कोऽपि दृश्यते ॥ २० ॥

अपि बाध्या फलापेक्षा सदनुष्ठानरागकृत् ।
सा च प्रज्ञापनाधीना मुक्त्यद्वेषमपेक्षते ॥ २१ ॥

अबाध्या सा हि मोक्षार्थशास्त्रश्रवणघातिनी ।
मुक्त्यद्वेषे तदन्यस्यां बुद्धिर्मार्गानुसारिणी ॥ २२ ॥

तत्तत्फलार्थिनां तत्तत्तपस्तन्त्रे प्रदर्शितम् ।
मुग्धमार्गप्रवेशाय दीयतेऽप्यत एव च ॥ २३ ॥

इत्थं च वस्तुपालस्य भवभ्रान्तौ न बाधकम् ।
गुणाद्वेषो न यत्तस्य क्रियारागप्रयोजकः ॥ २४ ॥

जीवातुः कर्मणां मुक्त्यद्वेषस्तदयमीदृशः ।
गुणरागस्य बीजत्वमस्यैवाव्यवधानतः ॥ २५ ॥

धारालग्नः शुभो भाव एतस्मादेव जायते ।
अन्तस्तत्त्वविशुद्ध्या च विनिवृत्ताग्रहत्वतः ॥ २६ ॥

अस्मिन् सत्साधकस्येव नास्ति काचिद्विभीषिका ।
सिद्धेरासन्नभावेन प्रमोदस्यान्तरोदयात् ॥ २७ ॥

चरमावर्तिनो जन्तोः सिद्धेरासन्नता ध्रुवम् ।
भूयांसोऽमी व्यतिक्रान्तास्तेष्वेको बिन्दुरम्बुधौ ॥ २८ ॥

मनोरथिकमित्थं च सुखमास्वादयन् भृशम् ।
पीड्यते क्रियया नैव बाढं तत्रानुरज्यते ॥ २९ ॥

प्रसन्नं क्रियते चेतः श्रद्धयोत्पन्नया ततः ।
मलोज्झितं हि कतकक्षोदेन सलिलं यथा ॥ ३० ॥

वीर्योल्लासस्ततश्च स्यात्ततः स्मृतिरनुत्तरा ।
ततः समाहितं चेतः स्थैर्यमप्यवलम्बते ॥ ३१ ॥

अधिकारित्वमित्थं चापुनर्बन्धकतादिना ।
मुक्त्यद्वेषक्रमेण स्यात् परमानन्दकारणम् ॥ ३२ ॥

## अपुनर्बन्धकद्वात्रिंशिका ॥ १४ ॥

शुक्लपक्षेन्दुवत्प्रायो वर्धमानगुणः स्मृतः ।
भवाभिनन्दिदोषाणामपुनर्बन्धको व्यये ॥ १ ॥

अस्यैव पूर्वसेवोक्ता मुख्याऽन्यस्योपचारतः ।
अस्यावस्थान्तरं मार्गपतिताभिमुखौ पुनः ॥ २ ॥

योग्यत्वेऽपि व्यवहितौ परे त्वेतौ पृथग् जगुः ।
अन्यत्राप्युपचारस्तु सामीप्ये बह्वभेदतः ॥ ३ ॥

परिणामिनि कार्याद्धि सर्वथा नास्ति भिन्नता ।
तत्प्रकृत्या विनाप्यूहमन्यत्रैनां परे जगुः ॥ ४ ॥

युक्तं चैतन्मले तीव्रे भवासङ्गो न हीयते ।
संक्लेशायोगतो मुख्या सान्यथा नेति हि स्थितिः ॥ ५ ॥

एष्यद्भद्रां समाश्रित्य पुंसः प्रकृतिमीदृशीम् ।
व्यवहारः स्थितः शास्त्रे युक्तमुक्तं ततो ह्यदः ॥ ६ ॥

शान्तोदात्तस्तयैव स्यादाश्रयः शुभचेतसः ।
धन्यो भोगसुखस्येव वित्ताढ्यो रूपवान् युवा ॥ ७ ॥

अङ्गनाभावे यथा भोगोऽतात्त्विको मानहानितः ।
शान्तोदात्तत्वविरहे क्रियाप्येवं विकल्पजा ॥ ८ ॥

क्रोधाद्यबाधितः शान्त उदात्तस्तु महाशयः ।
बीजं रूपं फलं चायमूहते भवगोचरम् ॥ ९ ॥

भेदे हि प्रकृतेर्नैक्यमभेदे च न भिन्नता ।
आत्मनां स्यात्स्वभावस्याप्येवं शबलतोचिता ॥ १० ॥

भवोऽयं दुःखगहनो जन्ममृत्युजरामयः ।
अनादिरप्युपायेन पृथग्भवितुमर्हति ॥ ११ ॥

फलं भवस्य विपुलः क्लेश एव विजृम्भते ।
न्यग्भाव्यात्मस्वभावं हि पयो निम्बरसो यथा ॥ १२ ॥

तद्वियोगाश्रयोऽप्येवं सम्यगूहोऽस्य जायते ।
तत्तत्तन्त्रनयज्ञाने विशेषापेक्षयोज्ज्वलः ॥ १३ ॥

योजनाद्योग इत्युक्तो मोक्षेण मुनिसत्तमैः ।
स निवृत्ताधिकारायां प्रकृतौ लेशतो ध्रुवः ॥ १४ ॥

गोपेन्द्रवचनादस्मादेवंलक्षणशालिनः ।
परैरस्येष्यते योगः प्रतिश्रोतोऽनुगत्वतः ॥ १५ ॥

तत्क्रियायोगहेतुत्वाद्योग इत्युचितं वचः ।
मोक्षेऽतिदृढचित्तस्य भिन्नग्रन्थेस्तु भावतः ॥ १६ ॥

अन्यसक्तस्त्रियो भर्तृयोगोऽप्यश्रेयसे यथा ।
तथा मुख्यकुटुम्बादिव्यापारोऽपि न बन्धकृत् ॥ १७ ॥

निजाशयविशुद्धौ हि बाह्यो हेतुरकारणम् ।
शुश्रूषादिक्रियाऽप्यस्य शुद्धा श्रद्धानुसारिणी ॥ १८ ॥

एतन्निश्चयवृत्त्यैव यद्योगः शास्त्रसंज्ञितः ।
त्रिधा शुद्धादनुष्ठानात् सम्यक्प्रत्ययवृत्तितः ॥ १९ ॥

शास्त्रमासन्नभव्यस्य मानमामुष्मिके विधौ ।
सेव्यं यद्विचिकित्सायाः समाधेः प्रतिकूलता ॥ २० ॥

विषयात्मानुबन्धैस्तु त्रिधा शुद्धं यथोत्तरम् ।
प्रधानं कर्म तत्राद्यं मुक्त्यर्थं पतनाद्यपि ॥ २१ ॥

स्वरूपतोऽपि सावद्यमादेयाशयलेशतः ।
शुभमेतद्द्वितीयं तु लोकदृष्ट्या यमादिकम् ॥ २२ ॥

तृतीयं शान्तवृत्त्यादेस्तत्त्वसंवेदनानुगम् ।
दोषहानिस्तमोभूम्ना नाद्याज्जन्मोचितं परे ॥ २३ ॥

मुक्तीच्छापि सतां श्लाघ्या न मुक्तिसदृशं त्वदः ।
द्वितीयात्सानुवृत्तिश्च सा स्याद्दर्दुरचूर्णवत् ॥ २४ ॥

कुराजवप्रप्रायं तन्निर्विवेकमिदं स्मृतम् ।
तृतीयात्सानुबन्धा सा गुरुलाघवचिन्तया ॥ २५ ॥

गृहाद्यभूमिकाकल्पमतस्तत् कैश्चिदुच्यते ।
उदग्रफलदत्वेन मतमस्माकमप्यदः ॥ २६ ॥

आत्मनेष्टं गुरुर्ब्रूते लिङ्गान्यपि वदन्ति तत् ।
त्रिधाऽयं प्रत्ययः प्रोक्तः संपूर्णं सिद्धिसाधनम् ॥ २७ ॥

सिद्धिः सिद्ध्यनुबद्धैव न पातमनुबघ्नती ।
हाठिकानामपि ह्येषा नात्मादिप्रत्ययं विना ॥ २८ ॥

सद्योगारम्भकस्त्वेनं शास्त्रसिद्धमपेक्षते ।
सदा भेदः परेभ्यो हि तस्य जात्यमयूरवत् ॥ २९ ॥

यथा शक्तिस्तदण्डादौ विचित्रा तद्वदस्य हि ।
गर्भयोगोऽपि मातॄणां श्रूयतेऽत्युचिता क्रिया ॥ ३० ॥

सर्वोत्तमं यदेतेषु भिन्नग्रन्थेस्तदिष्यते ।
फलवद्द्रुमसद्बीजप्ररोहोद्भेदसन्निभम् ॥ ३१ ॥

तत्तत्तन्त्रोक्तमखिलमपुनर्बन्धकस्य च ।
अवस्थाभेदतो न्याय्यं परमानन्दकारणम् ॥ ३२ ॥

## सम्यग्दृष्टिद्वात्रिंशिका ॥ १५ ॥

लक्ष्यते ग्रन्थिभेदेन सम्यग्दृष्टिः स्वतन्त्रतः ।
शुश्रूषाधर्मरागाभ्यां गुरुदेवादिपूजया ॥ १ ॥

भोगिकिन्नरगेयादिविषयाधिक्यमीयुषी ।
शुश्रूषाऽस्य न सुप्तेशकथार्थविषयोपमा ॥ २ ॥

अप्राप्ते भगवद्वाक्ये धावत्यस्य मनो यथा ।
विशेषदर्शिनोऽर्थेषु प्राप्तपूर्वेषु नो तथा ॥ ३ ॥

धर्मरागोऽधिको भावाद्भोगिनः स्त्र्यादिरागतः ।
प्रवृत्तिस्त्वन्यथापि स्यात्कर्मणो बलवत्तया ॥ ४ ॥

तदलाभेऽपि तद्रागबलवत्त्वं न दुर्वचम् ।
पूयिकाद्यपि यद्भुङ्क्ते घृतपूर्णप्रियो द्विजः ॥ ५ ॥

गुरुदेवादिपूजाऽस्य त्यागात्कार्यान्तरस्य च ।
भावसारा विनिर्दिष्टा निजशक्त्यनतिक्रमात् ॥ ६ ॥

स्यादीदृक्करणे चान्त्ये सत्त्वानां परिणामतः ।
त्रिधा यथाप्रवृत्तं तदपूर्वं चानिवर्ति च ॥ ७ ॥

ग्रन्थिं यावद्भवेदाद्यं द्वितीयं तदतिक्रमे ।
भिन्नग्रन्थेस्तृतीयं तु योगिनाथैः प्रदर्शितम् ॥ ८ ॥

पतितस्यापि नामुष्य ग्रन्थिमुल्लङ्घ्य बन्धनम् ।
स्वाशयो बन्धभेदेन सतो मिथ्यादृशोऽपि तत् ॥ ९ ॥

एवं च यत्परैरुक्तं बोधिसत्त्वस्य लक्षणम् ।
विचार्यमाणं सन्नीत्या तदप्यत्रोपपद्यते ॥ १० ॥

तप्तलोहपदन्यासतुल्या वृत्तिः क्वचिद्यदि ।
इत्युक्तेः कायपात्येव चित्तपाती न स स्मृतः ॥ ११ ॥

परार्थरसिको धीमान् मार्गगामी महाशयः ।
गुणरागी तथेत्यादि सर्वं तुल्यं द्वयोरपि ॥ १२ ॥

बोधिप्रधानः सत्त्वो वा सद्बोधिर्भावितीर्थकृत् ।
तथाभव्यत्वतो बोधिसत्त्वो हन्त सतां मतः ॥ १३ ॥

तत्तत्कल्याणयोगेन कुर्वन् सत्त्वार्थमेव सः ।
तीर्थकृत्त्वमवाप्नोति परं कल्याणसाधनम् ॥ १४ ॥

संविग्नो भवनिर्वेदादात्मनिःसरणं तु यः ।
आत्मार्थसंप्रवृत्तोऽसौ सदा स्यान्मुण्डकेवली ॥ १५ ॥

अंशतः क्षीणदोषत्वाच्छिष्टत्वमपि युक्तिमत् ।
अत्रैव हि परोक्तं तु तल्लक्षणमसंगतम् ॥ १६ ॥

वेदप्रामाण्यमन्तृत्वं बौद्धे ब्राह्मणताडिते ।
अतिव्याप्तं द्विजेऽव्याप्तं स्वापे स्वारसिकं च तत् ॥ १७ ॥

तदभ्युपगमाद्यावन्न तद्व्यत्ययमन्तृता ।
तावच्छिष्टत्वमिति चेत्तदप्रामाण्यमंन्तरि ॥ १८ ॥

अजानति च वेदत्वमव्याप्तं चेद्विवक्ष्यते ।
वेदत्वेनाभ्युपगमस्तथापि स्याददः किल ॥ १९ ॥

ब्राह्मणः पातकात्प्राप्तः काकभावं तदापि हि ।
व्याप्नोतीशं च नोत्कृष्टज्ञानावच्छेदिका तनुः ॥ २० ॥

अन्याङ्गरहितत्वं च तस्य काकभवोत्तरम् ।
देहान्तराग्रहदशामाश्रित्यातिप्रसक्तिमत् ॥ २१ ॥

अवच्छेदकदेहानामपकृष्टधियामथ ।
संबन्धविरहो यावान् प्रामाण्योपगमे सति ॥ २२ ॥

अप्रामाण्यानुपगमस्तावत्कालीन एव हि ।
शिष्टत्वं काकदेहस्य प्रागभावस्तदा च न ॥ २३ ॥

नैवं तदुत्तरे विप्रेऽव्याप्तेः प्राक्प्रतिपत्तितः ।
प्रामाण्योपगमात्तन्न प्राक् तत्रेति न सेति चेत् ॥ २४ ॥

यत्किंञ्चित्तद्ग्रहे पश्चात् प्राक् च काकस्य जन्मनः ।
विप्रजन्मान्तराले स्यात्सा ध्वंसप्रागभावतः ॥ २५ ॥

जीववृत्तिविशिष्टाङ्गाभावाभावग्रहोऽप्यसन्
उत्कर्षश्चापकर्षश्चाव्यवस्थो यदपेक्षया ॥ २६ ॥

अपि चाव्याप्त्यतिव्याप्ती कात्स्न्र्यदेशविकल्पतः ।
आद्यग्रहे स्वतात्पर्यान्न दोष इति चेन्मतिः ॥ २७ ॥

नैवं विशिष्य तात्पर्याग्रहे तन्मानताऽग्रहात् ।
सामान्यतः स्वतात्पर्ये प्रामाण्यं नोऽपि संमतम् ॥ २८ ॥

मिथ्यादृष्टिगृहीतं हि मिथ्या सम्यगपि श्रुतम् ।
सम्यदृष्टिगृहीतं तु सम्यग्मिथ्येति नः स्थितिः ॥ २९ ॥

तात्पर्यं वः स्वसिद्धान्तोपजीव्यमिति चेन्मतिः ।
ननु युक्त्युपजीव्यत्वं द्वयोरप्यविशेषतः ॥ ३० ॥

उद्भावनमनिग्राह्यं युक्तेरेव हि यौक्तिके ।
प्रामाण्ये च न वेदत्वं सम्यक्त्वं तु प्रयोजकम् ॥ ३१ ॥

शिष्टत्वमुक्तमत्रैव भेदेन प्रतियोगिनः ।
तमानुभविकं बिभ्रत् परमानन्दवत्यतः ॥ ३२ ॥

## ईशानुग्रहविचारद्वात्रिंशिका ॥ १६ ॥

महेशानुग्रहात्केचिद्योगसिद्धिं प्रचक्षते ।
क्लेशाद्यैरपरामृष्टः पुंविशेषः स चेष्यते ॥ १ ॥

ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः ।
ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥ २ ॥

सात्त्विकः परिणामोऽत्र काष्ठाप्राप्ततयेष्यते ।
नाक्षप्रणालिकाप्राप्त इति सर्वज्ञतास्थितिः ॥ ३ ॥

ऋषीणां कपिलादीनामप्ययं परमो गुरुः ।
तदिच्छया जगत्सर्वं यथाकर्म विवर्तते ॥ ४ ॥

नैतद्युक्तमनुग्राह्ये तत्स्वभावत्वमन्तरा ।
नाणुः कदाचिदात्मा स्याद्देवतानुग्रहादपि ॥ ५ ॥

उभयोस्तत्स्वभावत्वभेदे च परिणामिता ।
अत्युत्कर्षश्च धर्माणामन्यत्रातिप्रसञ्जकः ॥ ६ ॥

आर्थं व्यापारमाश्रित्य तदाज्ञापालकात्मकम् ।
युज्यते परमीशस्यानुग्रहस्तन्त्रनीतितः ॥ ७ ॥

एवं च प्रणवेनैतज्जपात् प्रत्यूहसंक्षयः ।
प्रत्यक्चैतन्यलाभश्चेत्युक्तं युक्तं पतञ्जलेः ॥ ८ ॥

प्रत्यूहा व्याधयः स्थानं प्रमादालस्यसंभ्रमाः ।
सन्देहाविरती भूम्यलाभश्चाप्यनवस्थितिः ॥ ९ ॥

धातुवैषम्यजो व्याधिः स्थानं चाकर्मनिष्ठता ।
प्रमादोऽयत्न आलस्यमौदासीन्यं च हेतुषु ॥ १० ॥

विभ्रमो व्यत्ययज्ञानं सन्देहः स्यान्नवेत्ययम् ।
अखेदो विषयावेशाद्धवेदविरतिः किल ॥ ११ ॥

भूम्यलाभः समाधीनां भुवोऽप्राप्तिः कथंचन ।
लाभेऽपि तत्र चित्तस्याप्रतिष्ठा त्वनवस्थितिः ॥ १२ ॥

रजस्तमोमयाद्दोषाद्विक्षेपाश्चेतसो ह्यमी ।
सोपक्रमा जपान्नाशं यान्ति शक्तिहतिं परे ॥ १३ ॥

प्रत्यक्चैतन्यमप्यस्मादन्तर्ज्योतिःप्रथामयम् ।
बहिर्व्यापाररोधेन जायमानं मतं हि नः ॥ १४ ॥

योगातिशयतश्चायं स्तोत्रकोटिगुणः स्मृतः ।
योगदृष्ट्या बुधैर्दृष्टो ध्यानविश्रामभूमिका ॥ १५ ॥

माध्यस्थ्यमवलम्ब्यैव देवतातिशयस्य च ।
सेवा सर्वैर्बुधैरिष्टा कालातीतोऽपि यज्जगौ ॥ १६ ॥

अन्येषामप्ययं मार्गो मुक्ताविद्यादिवादिनाम् ।
अभिधानादिभेदेऽपि तत्त्वनीत्या व्यवस्थितः ॥ १७ ॥

मुक्तो बुद्धोऽर्हन्वापि यदैश्वर्येण समन्वितः ।
तदीश्वरः स एव स्यात्संज्ञाभेदोऽत्र केवलम् ॥ १८ ॥

अनादिशुद्ध इत्यादिर्यो भेदो यस्य कल्प्यते ।
तत्तत्तन्त्रानुसारेण मन्ये सोऽपि निरर्थकः ॥ १९ ॥

विशेषस्यापरिज्ञानाद्युक्तीनां जातिवादतः ।
प्रायो विरोधतश्चैव फलाभेदाच्च भावतः ॥ २० ॥

अविद्याक्लेशकर्मादि यतश्च भवकारणम् ।
ततः प्रधानमेवैतत् संज्ञाभेदमुपागतम् ॥ २१ ॥

अस्यापि योऽपरो भेदश्चित्रोपाधिस्तथा तथा ।
गीयतेऽतीतहेतुभ्यो धीमतां सोऽप्यपार्थकः ॥ २२ ॥

ततोऽस्थानप्रयासोऽयं यत्तद्भेदनिरूपणम् ।
सामान्यमनुमानस्य यतश्च विषयो मतः ॥ २३ ॥

आस्थितं चैतदाचार्यैस्त्याज्ये कुचितिकाग्रहे ।
शास्त्रानुसारिणस्तर्कान्नामभेदानुपग्रहात् ॥ २४ ॥

अस्थानं रूपमन्धस्य यथा सन्निश्चयं प्रति ।
तथैवातीन्द्रियं वस्तु छद्मस्थस्यापि तत्त्वतः ॥ २५ ॥

हस्तस्पर्शसमं शास्त्रं तत एव कथञ्चन ।
अत्र तन्निश्चयोऽपि स्यात्तथा चन्द्रोपरागवत् ॥ २६ ॥

इत्थं ह्यस्पष्टता शाब्दे प्रोक्ता तत्र विचारणम् ।
माध्यस्थ्यनीतितो युक्तं व्यासोऽपि यददो जगौ ॥ २७ ॥

आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥ २८ ॥

शास्त्रादौ चरणं सम्यक् स्याद्वादन्यायसंगतम् ।
ईशस्यानुग्रहस्तस्माद् दृष्टेष्टार्थाविरोधिनः ॥ २९ ॥

यद्दातव्यं जिनैः सर्वैर्दत्तमेव तदेकदा ।
दर्शनज्ञानचारित्रमयो मोक्षपथः सताम् ॥ ३० ॥

जिनेभ्यो याचमानोऽन्यं लब्धं धर्ममपालयन् ।
तं विह्वलो विना भाग्यं केन मूल्येन लप्स्यते ॥ ३१ ॥

अनुष्ठानं ततः स्वामिगुणरागपुरःसरम् ।
परमानन्दतः कार्यं मन्यमानैरनुग्रहम् ॥ ३२ ॥

## दैवपुरुषकारद्वात्रिंशिका ॥ १७ ॥

दैवं पुरुषकारश्च तुल्यौ द्वावपि तत्त्वतः ।
निश्चयव्यवहाराभ्यामत्र कुर्मो विचारणाम् ॥ १ ॥

दैवं पुरुषकारश्च स्वकर्मोद्यमसंज्ञकौ ।
निश्चयेनानयोः सिद्धिरन्योऽन्यनिरपेक्षयोः ॥ २ ॥

सापेक्षमसमर्थं हीत्यतो यद्व्यापृतं यदा ।
तदा तदेव हेतुः स्यादन्यत्सदपि नादृतम् ॥ ३ ॥

विशिष्य कार्यहेतुत्वं द्वयोरित्यनपेक्षयोः ।
अवर्ज्यसन्निधि त्वन्यदन्यथासिद्धिमञ्चति ॥ ४ ॥

अन्वयव्यतिरेकाभ्यां व्यवहारस्तु मन्यते ।
द्वयोः सर्वत्र हेतुत्वं गौणमुख्यत्वशालिनोः ॥ ५ ॥

अनुत्कटत्वं गौणत्वमुत्कटत्वं च मुख्यता ।
द्वयं प्रत्येकजन्यत्वव्यपदेशनियामकम् ॥ ६ ॥

उत्कटेन हि दैवेन कृतं दैवकृतं विदुः ।
तादृशेन च यत्नेन कृतं यत्नकृतं जनाः ॥ ७ ॥

अभिमानवशाद्वायं भ्रमो विध्यादिगोचरः ।
निविष्टबुद्धिरेकत्र नान्यद्विषयमिच्छति ॥ ८ ॥

यदीष्यते परापेक्षा स्वोत्पत्तिपरिणामयोः ।
तर्हि कार्येऽपि सा युक्ता न युक्तं दृष्टबाधनम् ॥ ९ ॥

विशिष्य कार्यहेतुत्वं कार्यभेदे भवेदपि ।
अन्यथा त्वन्यथासिद्धिरन्यत्रातिप्रसङ्गकृत् ॥ १० ॥

क्वचित्कर्मेव यत्नोऽपि व्यापारबहुलः क्वचित् ।
अन्ततः प्राग्भवीयोऽपि द्वावित्यन्योऽन्यसंश्रयौ ॥ ११ ॥

कर्मैव ब्रुवते केचित् कालभेदात् फलप्रदम् ।
तन्नैहिकं यतो यत्नः कर्म तत्पौर्वदेहिकम् ॥ १२ ॥

भवान्तरीयं तत्कार्यं कुरुते नैहिकं विना ।
द्वारत्वेन च गौणत्वमुभयत्र न दुर्वचम् ॥ १३ ॥

अपेक्ष्ये कालभेदे च हेत्वैक्यं परिशिष्यते ।
दृष्टहानिरदृष्टस्य कल्पनं चातिबाधकम् ॥ १४ ॥

दृष्टेनैवोपपत्तौ च नादृष्टमिति केचन ।
फले विशेषात्तदसत्तुल्यसाधनयोर्द्वयोः ॥ १५ ॥

न चापि क्षणिकं कर्म फलायादृष्टमन्तरा ।
वैयर्थ्यं च प्रसज्येत प्रायश्चित्तविधेरपि ॥ १६ ॥

विशेषश्चात्र बलवदेकमन्यन्निहन्ति यत् ।
व्यभिचारश्च नाप्येवमपेक्ष्य प्रतियोगिनम् ॥ १७ ॥

कर्मणा कर्ममात्रस्य नोपघातादि तत्त्वतः ।
स्वव्यापारगतत्वे तु तस्यैतदपि युज्यते ॥ १८ ॥

उभयोस्तत्स्वभावत्वे तत्तत्कालाद्यपेक्षया ।
बाध्यबाधकभावः स्यात्सम्यग्न्यायाविरोधतः ॥ १९ ॥

प्रतिमायोग्यतातुल्यं कर्मानियतभावकम् ।
बाध्यमाहुः प्रयत्नेन सैव प्रतिमयेत्यपि ॥ २० ॥

प्रतिमायोग्यतानाशः प्रतिमोत्पत्तितो भवेत् ।
कर्मणो विक्रिया यत्नाद्बाध्यबाधकतेत्यसौ ॥ २१ ॥

प्रतिमाया अनियमेऽप्यक्षता योग्यता यथा ।
फलस्यानियमेऽप्येवमक्षता कर्मयोग्यता ॥ २२ ॥

दार्वादेः प्रतिमाक्षेपे तद्भावः सर्वतो ध्रुवम् ।
योग्यतायोग्यता वेति न चैषा लोकसिद्धितः ॥ २३ ॥

कर्मणोऽप्येतदाक्षेपे दानादौ भावभेदतः ।
फलभेदः कथं नु स्यात्तथाशास्त्रादिसंगतः ॥ २४ ॥

शुभात्ततस्त्वसौ भावो हन्तायं तत्स्वभावभाक् ।
एवं किमत्र सिद्धं स्यादत एवास्त्वतो ह्यदः ॥ २५ ॥

इत्थं परस्परापेक्षावपि द्वौ बाध्यबाधकौ ।
प्रायेऽत्र चरमावर्ते दैवं यत्नेन बाध्यते ॥ २६ ॥

एवं च ग्रन्थिभेदोऽपि यत्नेनैव बलीयसा ।
औचित्येन प्रवृत्तिः स्यादूर्ध्वं तस्यैव चोदनात् ॥ २७ ॥

उपदेशस्त्वनेकान्तो हेतुरत्रोपयुज्यते ।
गुणमारभमाणस्य पततो वा स्थितस्य न ॥ २८ ॥

आधिक्यस्थैर्यसिद्ध्यर्थं चक्रभ्रामकदण्डवत् ।
असौ व्यञ्जकताप्यस्य तद्बलोपनतिक्रिया ॥ २९ ॥

औचित्येन प्रवृत्त्या च सुदृष्टिर्यत्नतोऽधिकात् ।
पल्योपमपृथक्त्वस्य चारित्रं लभते व्ययात् ॥ ३० ॥

मार्गानुसारिता श्रद्धा प्राज्ञप्रज्ञापनारतिः ।
गुणरागश्च लिङ्गानि शक्यारम्भोऽपि चास्य हि ॥ ३१ ॥

योगप्रवृत्तिरत्र स्यात्परमानन्दसंगता ।
देशसर्वविभेदेन चित्रे सर्वज्ञभाषिते ॥ ३२ ॥

## योगभेदद्वात्रिंशिका ॥ १८ ॥

अध्यात्मं भावना ध्यानं समता वृत्तिसंक्षयः ।
योगः पञ्चविधः प्रोक्तो योगमार्गविशारदैः ॥ १ ॥

औचित्याद्वृत्तयुक्तस्य वचनात्तत्त्वचिन्तनम् ।
मैत्र्यादिभावसंयुक्तमध्यात्मं तद्विदो विदुः ॥ २ ॥

सुखचिन्ता मता मैत्री सा क्रमेण चतुर्विधा ।
उपकारिस्वकीयस्वप्रतिपन्नाखिलाश्रया ॥ ३ ॥

करुणा दुःखहानेच्छा मोहाद्दुःखितदर्शनात् ।
संवेगाच्च स्वभावाच्च प्रीतिमत्स्वपरेषु च ॥ ४ ॥

आपातरम्ये सद्धेतावनुबन्धयुते परे ।
सन्तुष्टिर्मुदिता नाम सर्वेषां प्राणिनां सुखे ॥ ५ ॥

करुणातोऽनुबन्धाच्च निर्वेदात्तत्त्वचिन्तनात् ।
उपेक्षा ह्यहितेऽकाले सुखेऽसारे च सर्वतः ॥ ६ ॥

सुखीर्ष्यां दुःखितोपेक्षां पुण्यद्वेषमधर्मिषु ।
रागद्वेषौ त्यजन्नेता लब्ध्वाध्यात्मं समाश्रयेत् ॥ ७ ॥

अतः पापक्षयः सत्त्वं शीलं ज्ञानं च शाश्वतम् ।
तथानुभवसंसिद्धममृतं ह्यद एव नु ॥ ८ ॥

अभ्यासो वृद्धिमानस्य भावना बुद्धिसंगतः ।
निवृत्तिरशुभाभ्यासाद्भाववृद्धिश्च तत्फलम् ॥ ९ ॥

ज्ञानदर्शनचारित्रतपोवैराग्यभेदतः ।
इष्यते पञ्चधा चेयं दृढसंस्कारकारणम् ॥ १० ॥

उपयोगे विजातीयप्रत्ययाव्यवधानभाक् ।
शुभैकप्रत्ययो ध्यानं सूक्ष्माभोगसमन्वितम् ॥ ११ ॥

खेदोद्वेगभ्रमोत्थानक्षेपासङ्गान्यमुद्रुजाम् ।
त्यागादष्टपृथक्चित्तदोषाणामनुबन्ध्यदः ॥ १२ ॥

प्रवृत्तिजः क्लमः खेदस्ततो दार्ढ्यं न चेतसः ।
मुख्यो हेतुरदश्चात्र कृषिकर्मणि वारिवत् ॥ १३ ॥

स्थितस्यैव स उद्वेगो योगद्वेषात्ततः क्रिया ।
राजविष्टिसमा जन्म बाधते योगिनां कुले ॥ १४ ॥

भ्रमोन्तर्विप्लवस्तत्र न कृताकृतवासना ।
तां विना योगकरणं प्रस्तुतार्थविरोधकृत् ॥ १५ ॥

प्रशान्तवाहिताभाव उत्थानं करणं ततः ।
त्यागानुरूपमत्यागं निर्वेदादतथोदयम् ॥ १६ ॥

क्षेपोऽन्तरान्तरान्यत्र चित्तन्यासोऽफलावहः ।
शालेरपि फलं नो यद्दृष्टमुत्खननेऽसकृत् ॥ १७ ॥

आसङ्गः स्यादभिष्वङ्गस्तत्रासङ्गक्रियैव न ।
ततोऽयं हन्त तन्मात्रगुणस्थानस्थितिप्रदः ॥ १८ ॥

विहितेऽविहिते वार्थेऽन्यत्र मुत्प्रकृतात्किल ।
इष्टेऽर्थेऽङ्गारवृष्ट्याभात्यनादरविधानतः ॥ १९ ॥

रुजि सम्यगनुष्ठानोच्छेदाद्वन्ध्यफलं हि तत् ।
एतान् दोषान् विना ध्यानं शान्तोदात्तस्य तद्धितम् ॥ २० ॥

वशिता चैव सर्वत्र भावस्तैमित्यमेव च ।
अनुबन्धव्यवच्छेदश्चेति ध्यानफलं विदुः ॥ २१ ॥

व्यवहारकुदृष्ट्योच्चैरिष्टानिष्टेषु वस्तुषु ।
कल्पितेषु विवेकेन तत्त्वधीः समतोच्यते ॥ २२ ॥

विनैतया न हि ध्यानं ध्यानेनेयं विना च न ।
ततः प्रवृत्तचक्रं स्याद्द्वयमन्योऽन्यकारणात् ॥ २३ ॥

ऋद्ध्यप्रवर्तनं चैव सूक्ष्मकर्मक्षयस्तथा ।
अपेक्षातन्तुविच्छेदः फलमस्याः प्रचक्षते ॥ २४ ॥

विकल्पस्यन्दरूपाणां वृत्तीनामन्यजन्मनाम् ।
अपुनर्भावतो रोधः प्रोच्यते वृत्तिसंक्षयः ॥ २५ ॥

केवलज्ञानलाभश्च शैलेशीसंपरिग्रहः ।
मोक्षप्राप्तिरनाबाधा फलमस्य प्रकीर्तितम् ॥ २६ ॥

वृत्तिरोधोऽपि योगश्चेद्भिद्यते पञ्चधाऽप्ययम् ।
मनोवाक्कायवृत्तीनां रोधे व्यापारभेदतः ॥ २७ ॥

प्रवृत्तिस्थिरताभ्यां हि मनोगुप्तिद्वये किल ।
भेदाश्चत्वार इष्यन्ते तत्रान्त्यायां तथान्तिमः ॥ २८ ॥

विमुक्तकल्पनाजालं समत्वे सुप्रतिष्ठितम् ।
आत्मारामं मनश्चेति मनोगुप्तिस्त्रिधोदिता ॥ २९ ॥

अन्यासामवतारोऽपि यथायोगं विभाव्यताम् ।
यतः समितिगुप्तीनां प्रपञ्चो योग उत्तमः ॥ ३० ॥

उपायत्वेऽत्र पूर्वेषामन्त्य एवावशिष्यते ।
तत्पञ्चमगुणस्थानादुपायोऽर्वागिति स्थितिः ॥ ३१ ॥

भगवद्वचनस्थित्या योगः पञ्चविधोऽप्ययम् ।
सर्वोत्तमं फलं दत्ते परमानन्दमञ्जसा ॥ ३२ ॥

# योगविवेकद्वात्रिंशिका ॥ १९ ॥

इच्छां शास्त्रं च सामर्थ्यमाश्रित्य त्रिविधोऽप्ययम् ।
गीयते योगशास्त्रज्ञैर्निर्व्याजं यो विधीयते ॥ १ ॥

चिकीर्षोः श्रुतशास्त्रस्य ज्ञानिनोऽपि प्रमादिनः ।
कालादिविकलो योग इच्छायोग उदाहृतः ॥ २ ॥

साङ्गमप्येककं कर्म प्रतिपन्ने प्रमादिनः ।
नत्त्वेच्छायोगत इति श्रवणादत्र मज्जति ॥ ३ ॥

यथाशक्त्यप्रमत्तस्य तीव्रश्रद्धावबोधतः ।
शास्त्रयोगस्त्वखण्डार्थाराधनादुपदिश्यते ॥ ४ ॥

शास्त्रेण दर्शितोपायः फलपर्यवसायिना ।
तदतिक्रान्तविषयः सामर्थ्याख्योऽतिशक्तितः ॥ ५ ॥

शास्त्रादेव न बुध्यन्ते सर्वथा सिद्धिहेतवः ।
अन्यथा श्रवणादेव सर्वज्ञत्वं प्रसज्यते ॥ ६ ॥

प्रातिभज्ञानगम्यस्तत्सामर्थ्याख्योऽयमिष्यते ।
अरुणोदयकल्पं हि प्राच्यं तत्केवलार्कतः ॥ ७ ॥

रात्रेर्दिनादपि पृथग्यथा नो वारुणोदयः ।
श्रुताच्च केवलज्ञानात्तथेदमपि भाव्यताम् ॥ ८ ॥

ऋतम्भरादिभिः शब्दैर्वाच्यमेतत्परैरपि ।
इष्यते गमकत्वं चामुष्य व्यासोऽपि यज्जगौ ॥ ९ ॥

आगमेनानुमानेन योगाभ्यासरसेन च ।
त्रिधा प्रकल्पयन् प्रज्ञां लभते तत्त्वमुत्तमम् ॥ १० ॥

द्विधाऽयं धर्मसंन्यासयोगसंन्याससंज्ञितः ।
क्षायोपशमिका धर्मा योगाः कायादिकर्म तु ॥ ११ ॥

द्वितीयापूर्वकरणे प्रथमस्तात्त्विको भवेत् ।
आयोज्यकरणादूर्ध्वं द्वितीय इति तद्विदः ॥ १२ ॥

तात्त्विकोऽतात्त्विकश्चेति सामान्येन द्विधाप्ययम् ।
तात्त्विको वास्तवोऽन्यस्तु तदाभासः प्रकीर्तितः ॥ १३ ॥

अपुनर्बन्धकस्यायं व्यवहारेण तात्त्विकः ।
अध्यात्मभावनारूपो निश्चयेनोत्तरस्य तु ॥ १४ ॥

सकृदावर्तनादीनामतात्त्विक उदाहृतः ।
प्रत्यपायफलप्रायस्तथावेषादिमात्रतः ॥ १५ ॥

शुद्ध्यपेक्षो यथायोगं चारित्रवत एव च ।
हन्त ध्यानादिको योगस्तात्त्विकः प्रविजृम्भते ॥ १६ ॥

अपायाभावभावाभ्यां सानुबन्धोऽपरश्च सः ।
निरुपक्रमकर्मैवापायो योगस्य बाधकम् ॥ १७ ॥

बहुजन्मान्तरकरः सापायस्यैव साश्रवः ।
अनाश्रवस्त्वेकजन्मा तत्त्वाङ्गव्यवहारतः ॥ १८ ॥

शास्त्रेणाधीयते चायं नासिद्धेर्गोत्रयोगिनाम् ।
सिद्धेर्निष्पन्नयोगस्य नोद्देशः पश्यकस्य यत् ॥ १९ ॥

कुलप्रवृत्तचक्राणां शास्त्रात्तत्तदुपक्रिया ।
योगाचार्यैर्विनिर्दिष्टं तल्लक्षणमिदं पुनः ॥ २० ॥

ये योगिनां कुले जातास्तद्धर्मानुगताश्च ये ।
कुलयोगिन उच्यन्ते गोत्रवन्तोऽपि नापरे ॥ २१ ॥

सर्वात्राद्वेषिणश्चैते गुरुदेवद्विजप्रियाः ।
दयालवो विनीताश्च बोधवन्तो जितेन्द्रियाः ॥ २२ ॥

प्रवृत्तचक्रास्तु पुनर्यमद्वयसमाश्रयाः ।
शेषद्वयार्थिनोऽत्यन्तं शुश्रूषादिगुणान्विताः ॥ २३ ॥

आद्यावञ्चकयोगाप्त्या तदन्यद्वयलाभिनः ।
एतेऽधिकारिणो योगप्रयोगस्येति तद्विदः ॥ २४ ॥

यमाश्चतुर्विधा इच्छाप्रवृत्तिस्थैर्यसिद्धयः ।
योगक्रियाफलाख्यं च स्मर्यतेऽवञ्चकत्रयम् ॥ २५ ॥

इच्छायमो यमेष्विच्छा युता तद्वत्कथामुदा ।
स प्रवृत्तियमो यत्तत्पालनं शमसंयुतम् ॥ २६ ॥

सत्क्षयोपशमोत्कर्षादतिचारादिचिन्तया ।
रहिता यमसेवा तु तृतीयो यम उच्यते ॥ २७ ॥

परार्थसाधिका त्वेषा सिद्धिः शुद्धान्तरात्मनः ।
अचिन्त्यशक्तियोगेन चतुर्थो यम उच्यते ॥ २८ ॥

सद्भिः कल्याणसंपन्नैर्दर्शनादपि पावनैः ।
तथादर्शनतो योग आद्यावञ्चक उच्यते ॥ २९ ॥

तेषामेव प्रणामादिक्रियानियम इत्यलम् ।
क्रियावञ्चकयोगः स्यान्महापापक्षयोदयः ॥ ३० ॥

फलावञ्चकयोगस्तु सद्भ्य एव नियोगतः ।
सानुबन्धफलावाप्तिर्धर्मसिद्धौ सतां मता ॥ ३१ ॥

इत्थं योगविवेकस्य विज्ञानाद्धीनकल्मषः ।
यतमाना यथाशक्ति परमानन्दमश्नुते ॥ ३२ ॥

## योगावतारद्वात्रिंशिका ॥ २० ॥

संप्रज्ञातोऽपरश्चेति द्विधाऽन्यैरयमिष्यते ।
सम्यक् प्रज्ञायते येन संप्रज्ञातः स उच्यते ॥ १ ॥

वितर्केण विचारेणानन्देनास्मितयान्वितः ।
भाव्यस्य भावनाभेदात्संप्रज्ञातश्चतुर्विधः ॥ २ ॥

पूर्वापरानुसन्धानाच्छब्दोल्लेखाच्च भावना ।
महाभूतेन्द्रियार्थेषु सविकल्पोऽन्यथापरः ॥ ३ ॥

तन्मात्रान्तःकरणयोः सूक्ष्मयोर्भावना पुनः ।
दिक्कालधर्मावच्छेदात् सविचारोऽन्यथापरः ॥ ४ ॥

यदा रजस्तमोलेशानुविद्धं भाव्यते मनः ।
तदा भाव्यसुखोद्रेकाच्चिच्छक्तेर्गुणभावतः ॥ ५ ॥

सानन्दोऽत्रैव भण्यन्ते विदेहा बद्धवृत्तयः ।
देहाहङ्कारविगमात् प्रधानमुपदर्शिनः ॥ ६ ॥

सत्त्वं रजस्तमोलेशानाक्रान्तं यत्र भाव्यते ।
स सास्मितोऽत्र चिच्छक्तिसत्त्वयोर्मुख्यगौणता ॥ ७ ॥

अत्रैव कृततोषा ये परमात्मानवेक्षिणः ।
चित्ते गते ते प्रकृतिलया हि प्रकृतौ लयम् ॥ ८ ॥

गृहीतृग्रहणग्राह्यसमापत्तित्रयं किल ।
अत्र सास्मितसानन्दनिर्विचारान्तविश्रमम् ॥ ९ ॥

मणेरिवाभिजातस्य क्षीणवृत्तेरसंशयम् ।
तात्स्थ्यात्तदञ्जनत्वाच्च समापत्तिः प्रकीर्तिता ॥ १० ॥

संकीर्णा सा च शब्दार्थज्ञानैरपि विकल्पतः ।
सवितर्का परैर्भेदैर्भवतीत्थं चतुर्विधा ॥ ११ ॥

अध्यात्मं निर्विचारत्ववैशारद्ये प्रसीदति ।
ऋतम्भरा ततः प्रज्ञा श्रुतानुमितितोऽधिका ॥ १२ ॥

तज्जन्मा तत्त्वसंस्कारः संस्कारान्तरबाधकः ।
असंप्रज्ञातनामा स्यात् समाधिस्तन्निरोधतः ॥ १३ ॥

विरामप्रत्ययाभ्यासान्नेति नेति निरन्तरात् ।
ततः संस्कारशेषाच्च कैवल्यमुपतिष्ठते ॥ १४ ॥

संप्रज्ञातोऽवतरति ध्यानभेदेऽत्र तत्त्वतः ।
तात्त्विकी च समापत्तिर्नात्मनो भाव्यतां विना ॥ १५ ॥

परमात्मसमापत्तिर्जीवात्मनि हि युज्यते ।
अभेदेन तथाध्यानादन्तरङ्गस्वशक्तितः ॥ १६ ॥

बाह्यात्मा चान्तरात्मा च परमात्मेति च त्रयः ।
कायाधिष्ठायकध्येयाः प्रसिद्धा योगवाङ्मये ॥ १७ ॥

अन्ये मिथ्यात्वसम्यक्त्वकेवलज्ञानभागिनः ।
मिश्रे च क्षीणमोहे च विश्रान्तास्ते त्वयोगिनि ॥ १८ ॥

विषयस्य समापत्तिरुत्पत्तिर्भावसंज्ञिनः ।
आत्मनस्तु समापत्तिर्भावो द्रव्यस्य तात्त्विकः ॥ १९ ॥

अत एव च योऽर्हन्तं स्वद्रव्यगुणपर्ययैः ।
वेदात्मानं स एव स्वं वेदेत्युक्तं महर्षिभिः ॥ २० ॥

असंप्रज्ञातनामा तु संमतो वृत्तिसंक्षयः ।
सर्वतोऽस्मादकरणनियमः पापगोचरः ॥ २१ ॥

ग्रन्थिभेदे यथाऽयं स्याद्बन्धहेतुं परं प्रति ।
नरकादिगतिष्वेवं ज्ञेयस्तद्धेतुगोचरः ॥ २२ ॥

दुःखात्यन्तविमुक्त्यादि नान्यथा स्याच्छ्रुतोदितम् ।
हेतुः सिद्धश्च भावोऽस्मिन्निति वृत्तिक्षयौचिती ॥ २३ ॥

योगे जिनोक्तेऽप्येकस्मिन् दृष्टिभेदः प्रवर्तते ।
क्षयोपशमवैचित्र्यात् समेघाद्योघदृष्टिवत् ॥ २४ ॥

सच्छ्रद्धासंगतो बोधो दृष्टिः सा चाष्टधोदिता ।
मित्रा तारा बला दीप्रा स्थिरा कान्ता प्रभा परा ॥ २५ ॥

तृणगोमयकाष्ठाग्निकणदीप्रप्रभोपमा ।
रत्नातारार्कचन्द्राभा क्रमेणेक्ष्वादिसन्निभा ॥ २६ ॥

यमादियोगयुक्तानां खेदादिपरिहारतः ।
अद्वेषादिगुणस्थानां क्रमेणैषा सतां मता ॥ २७ ॥

आद्याश्चतस्रः सापायपाता मिथ्यादृशामिह ।
तत्त्वतो निरपायाश्च भिन्नग्रन्थेस्तथोत्तराः ॥ २८ ॥

प्रयाणभङ्गाभावेन निशि स्वापसमः पुनः ।
विघातो दिव्यभवतश्चरणस्योपजायते ॥ २९ ॥

तादृश्यौदयिके भावे विलीने योगिनां पुनः ।
जाग्रन्निरन्तरगतिप्राया योगप्रवृत्तयः ॥ ३० ॥

मिथ्यात्वे मन्दतां प्राप्ते मित्राद्या अपि दृष्टयः ।
मार्गाभिमुखभावेन कुर्वते मोक्षयोजनम् ॥ ३१ ॥

प्रकृत्या भद्रकः शान्तो विनीतो मृदुरुत्तमः ।
सूत्रे मिथ्यादृगप्युक्तः परमानन्दभागतः ॥ ३२ ॥

## मित्राद्वात्रिंशिका ॥ २१ ॥

मित्रायां दर्शनं मन्दं योगाङ्गं च यमो भवेत् ।
अखेदो देवकार्यादावन्यत्राद्वेष एव च ॥ १ ॥

अहिंसासूनृतास्तेयब्रह्माकिञ्चनता यमाः ।
दिक्कालाद्यनवच्छिन्नाः सार्वभौमा महाव्रतम् ॥ २ ॥

बाधनेन वितर्काणां प्रतिपक्षस्य भावनात् ।
योगसौकर्यतोऽमीषां योगाङ्गत्वमुदाहृतम् ॥ ३ ॥

क्रोधाल्लोभाच्च मोहाच्च कृतानुमितकारिताः ।
मृदुमध्याधिमात्राश्च वितर्काः सप्तविंशतिः ॥ ४ ॥

दुःखाज्ञानानन्तफला अमी इति विभावनात् ।
प्रकर्षं गच्छतामेतद्यमानां फलमुच्यते ॥ ५ ॥

वैरत्यागोऽन्तिके तस्य फलं चाकृतकर्मणः ।
रत्नोपस्थानसद्वीर्यलाभो जनुरनुस्मृतिः ॥ ६ ॥

इत्थं यमप्रधानत्वमवगम्य स्वतन्त्रतः ।
योगबीजमुपादत्ते श्रुतमत्र श्रुतादपि ॥ ७ ॥

जिनेषु कुशलं चित्तं तन्नमस्कार एव च ।
प्रणामादि च संशुद्धं योगबीजमनुत्तमम् ॥ ८ ॥

चरमे पुद्गलावर्ते तथाभव्यत्वपाकतः ।
प्रतिबन्धोज्झितं शुद्धमुपादेयधिया ह्यदः ॥ ९ ॥

प्रतिबन्धैकनिष्ठं तु स्वतः सुन्दरमप्यदः ।
तत्स्थानस्थितिकार्येव वीरे गौतमरागवत् ॥ १० ॥

सरागस्याप्रमत्तस्य वीतरागदशानिभम् ।
अभिन्दतोऽप्यदो ग्रन्थिं योगाचार्यैर्यथोदितम् ॥ ११ ॥

ईषदुन्मज्जनाभोगो योगचित्तं भवोदधौ ।
तच्छक्त्यतिशयोच्छेदि दम्भोलिर्ग्रन्थिपर्वते ॥ १२ ॥

आचार्यादिष्वपि ह्येतद्विशुद्धं भावयोगिषु ।
न चान्येष्वप्यसारत्वात्कूटेऽकूटधियोऽपि हि ॥ १३ ॥

श्लाघनाद्यसदाशंसापरिहारपुरःसरम् ।
वैयावृत्त्यं च विधिना तेष्वाशयविशेषतः ॥ १४ ॥

भवादुद्विग्नता शुद्धौषधदानाद्यभिग्रहः ।
तथा सिद्धान्तमाश्रित्य विधिना लेखनादि च ॥ १५ ॥

लेखना पूजना दानं श्रवणं वाचनोद्ग्रहः ।
प्रकाशनाथ स्वाध्यायश्चिन्तना भावनेति च ॥ १६ ॥

बीजश्रुतौ परा श्रद्धान्तर्विश्रोतसिकाव्ययात् ।
तदुपादेयभावश्च फलौत्सुक्यं विनाधिकः ॥ १७ ॥

निमित्तं सत्प्रणामादेर्भद्रमूर्तेरमुष्य च ।
शुभो निमित्तसंयोगोऽवञ्चकोदयतो मतः ॥ १८ ॥

योगक्रियाफलाख्यं च साधुभ्योऽवञ्चकत्रयम् ।
श्रुतः समाधिरव्यक्त इषुलक्ष्यक्रियोपमः ॥ १९ ॥

हेतुरत्रान्तरङ्गश्च तथा भावमलाल्पता ।
ज्योत्स्नादाविव रत्नादिमलापगम उच्यते ॥ २० ॥

सत्सु सत्त्वधियं हन्त मले तीव्रे लभेत कः ।
अङ्गुल्या न स्पृशेत् पङ्गुः शाखां सुमहतस्तरोः ॥ २१ ॥

वीक्ष्यते स्वल्परोगस्य चेष्टा चेष्टार्थसिद्धये ।
स्वल्पकर्ममलस्यापि तथा प्रकृतकर्मणि ॥ २२ ॥

यथाप्रवृत्तकरणे चरमे चेदृशी स्थितिः ।
तत्त्वतोऽपूर्वमेवेदमपूर्वासत्तितो विदुः ॥ २३ ॥

प्रवर्तते गुणस्थानपदं मिथ्यादृशीह यत् ।
अन्वर्थयोजना नूनमस्यां तस्योपपद्यते ॥ २४ ॥

व्यक्तमिथ्यात्वधीप्राप्तिरप्यन्यत्रेयमुच्यते ।
घने मले विशेषस्तु व्यक्ताव्यक्तधियोर्नु कः ॥ २५ ॥

यमः सद्योगमूलस्तु रुचिवृद्धिनिबन्धनम् ।
शुक्लपक्षद्वितीयाया योगश्चन्द्रमसो यथा ॥ २६ ॥

उत्कर्षादपकर्षाच्च शुद्ध्यशुद्ध्योरयं गुणः ।
मित्रायामपुनर्बन्धात् कर्मणां स प्रवर्तते ॥ २७ ॥

गुणाभासस्त्वकल्याणमित्रयोगे न कश्चन ।
अनिवृत्ताग्रहत्वेनाभ्यन्तरज्वरसन्निभः ॥ २८ ॥

मुग्धः सद्योगतो धत्ते गुणं दोषं विपर्ययात् ।
स्फटिको नु विधत्ते हि शोणश्याममसुमत्त्विषम् ॥ २९ ॥

यथौषधीषु पीयूषं द्रुमेषु स्वर्द्रुमो यथा ।
गुणेष्वपि सतां योगस्तथा मुख्य इहेष्यते ॥ ३० ॥

विनैनं मतिमूढानां येषां योगोत्तमस्पृहा ।
तेषां हन्त विना नावमुत्तितीर्षा महोदधेः ॥ ३१ ॥

तन्मित्रायां स्थितो दृष्टौ सद्योगेन गरीयसा ।
समारुह्य गुणस्थानं परमानन्दमश्नुते ॥ ३२ ॥

## तारादित्रयद्वात्रिंशिका ॥ २२ ॥

तारायां तु मनाक् स्पष्टं दर्शनं नियमाः शुभाः ।
अनुद्वेगो हितारम्भे जिज्ञासा तत्त्वगोचरा ॥ १ ॥

नियमाः शौचसन्तोषौ स्वाध्यायतपसी अपि ।
देवताप्रणिधानं च योगाचार्यैरुदाहृताः ॥ २ ॥

शौचभावनया स्वाङ्गजुगुप्साऽन्यैरसंगमः ।
सत्त्वशुद्धिः सौमनस्यैकाग्र्याक्षजययोग्यता ॥ ३ ॥

सन्तोषादुत्तमं सौख्यं स्वाध्यायादिष्टदर्शनम् ।
तपसोऽङ्गाक्षयोः सिद्धिः समाधिः प्रणिधानतः ॥ ४ ॥

विज्ञाय नियमानेतानेवं योगोपकरिणः ।
अत्रैतेषु रतो दृष्टौ भवेदिच्छादिकेषु हि ॥ ५ ॥

भवत्यस्यामविच्छिन्ना प्रीतिर्योगकथासु च ।
यथाशक्त्युपचारश्च बहुमानश्च योगिषु ॥ ६ ॥

भयं न भवजं तीव्रं हीयते नोचितक्रिया ।
न चानाभोगतोऽपि स्यादत्यन्तानुचितक्रिया ॥ ७ ॥

स्वकृत्ये विकले त्रासो जिज्ञासा सस्पृहाधिके ।
दुःखोच्छेदार्थिनां चित्रे कथंताधीः परिश्रमे ॥ ८ ॥

नास्माकं महती प्रज्ञा सुमहान् शास्त्रविस्तरः ।
शिष्टाः प्रमाणमिह तदित्यस्यां मन्यते सदा ॥ ९ ॥

सुखस्थिरासनोपेतं बलायां दर्शनं दृढम् ।
परा च तत्त्वशुश्रूषा न क्षेपो योगगोचरः ॥ १० ॥

असत्तृष्णात्वराभावात् स्थिरं च सुखमासनम् ।
प्रयत्नश्लथतानन्त्यसमापत्तिबलादिह ॥ ११ ॥

अतोऽन्तरायविजयो द्वन्द्वानभिहति परा ।
दृष्टदोषपरित्यागः प्रणिधानपुरःसरः ॥ १२ ॥

कान्ताजुषो विदग्धस्य दिव्यगेयश्रुतौ यथा ।
यूनो भवति शुश्रूषा तथास्यां तत्त्वगोचरा ॥ १३ ॥

अभावेऽस्याः श्रुतं व्यर्थं बीजन्यास इवोषरे ।
श्रुताभावेऽपि भावेऽस्या ध्रुवः कर्मक्षयः पुनः ॥ १४ ॥

योगारम्भ इहाक्षेपात् स्यादुपायेषु कौशलम् ।
उप्यमाने तरौ दृष्टा पयःसेकेन पीनता ॥ १५ ॥

प्राणायामवती दीप्रा योगोत्थानविवर्जिता ।
तत्त्वश्रवणसंयुक्ता सूक्ष्मबोधमनाश्रिता ॥ १६ ॥

रेचकः स्याद्बहिर्वृत्तिरन्तर्वृत्तिश्च पूरकः ।
कुम्भकः स्तम्भवृत्तिश्च प्राणायामस्त्रिधेत्ययम् ॥ १७ ॥

धारणायोग्यता तस्मात् प्रकाशावरणक्षयः ।
अन्यैरुक्तः क्वचिच्चैतद्युज्यते योग्यतानुगम् ॥ १८ ॥

रेचनाद्बाह्यभावानामन्तर्भावस्य पूरणात् ।
कुम्भनान्निश्चितार्थस्य प्राणायामश्च भावतः ॥ १९ ॥

प्राणेभ्योऽपि गुरुर्धर्मः प्राणायामविनिश्चयात् ।
प्राणांस्त्यजन्ति धर्मार्थं न धर्मं प्राणसंकटे ॥ २० ॥

पुण्यबीजं नयत्येवं तत्त्वश्रुत्या सदाशयः ।
भवक्षाराम्भसस्त्यागाद्वृद्धिं मधुरवारिणा ॥ २१ ॥

तत्त्वश्रवणतस्तीव्रा गुरुभक्तिः सुखावहा ।
समापत्त्यादिभेदेन तीर्थकृद्दर्शनं ततः ॥ २२ ॥

कर्मवज्रविभेदेनानन्तधर्मकगोचरे ।
वेद्यसंवेद्यपदजे बोधे सूक्ष्मत्वमत्र न ॥ २३ ॥

अवेद्यसंवेद्यपदं चतसृष्वासु दृष्टिषु ।
पक्षिच्छायाजलचरप्रवृत्त्याभं यदुल्बणम् ॥ २४ ॥

वेद्यं संवेद्यते यस्मिन्नपायादिनिबन्धनम् ।
पदं तद्वेद्यसंवेद्यमन्यदेतद्विपर्ययात् ॥ २५ ॥

अपायशक्तिमालिन्यं सूक्ष्मबोधविघातकृत् ।
न वेद्यसंवेद्यपदे वज्रतण्डुलसन्निभे ॥ २६ ॥

तच्छक्तिः स्थूलबोधस्य बीजमन्यत्र चाक्षतम् ।
तत्र यत्पुण्यबन्धोऽपि हन्तापायोत्तरः स्मृतः ॥ २७ ॥

प्रवृत्तिरपि योगस्य वैराग्यान्मोहगर्भतः ।
प्रसूतेऽपायजननीमुत्तरां मोहवासनाम् ॥ २८ ॥

अवेद्यसंवेद्यपदे पुण्यं निरनुबन्धकम् ।
भवाभिनन्दिजन्तूनां पापं स्यात्सानुबन्धकम् ॥ २९ ॥

कुकृत्यं कृत्यमाभाति कृत्यं चाकृत्यमेव हि ।
अत्र व्यामूढचित्तानां कण्डूकण्डूयनादिवत् ॥ ३० ॥

एतेऽसच्चेष्टयात्मानं मलिनं कुर्वते निजम् ।
बडिशामिषवत्तुच्छे प्रसक्ता भोगजे सुखे ॥ ३१ ॥

अवेद्यसंवेद्यपदं सत्सङ्गागमयोगतः ।
तद्दुर्गतिप्रदं जेयं परमानन्दमिच्छता ॥ ३२ ॥

# कुतर्कग्रहनिवृत्तिद्वात्रिंशिका ॥ २३ ॥

जीयमानेऽत्र राज्ञीव चमूचरपरिच्छदः ।
निवर्तते स्वतः शीघ्रं कुतर्कविषमग्रहः ॥ १ ॥

शमारामानलज्वाला हिमानी ज्ञानपङ्कजे ।
श्रद्धाशल्यं स्मयोल्लासः कुतर्कः सुनयार्गला ॥ २ ॥

कुतर्केऽभिनिवेशस्तन्न युक्तो मुक्तिमिच्छताम् ।
युक्तः पुनः श्रुते शीले समाधौ शुद्धचेतसाम् ॥ ३ ॥

उक्तं च योगमार्गज्ञैस्तपोनिर्धूतकल्मषैः ।
भावियोगिहितायोच्चैर्मोहदीपसमं वचः ॥ ४ ॥

वादांश्च प्रतिवादांश्च वदन्तो निश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति तिलपीलकवद्गतौ ॥ ५ ॥

विकल्पकल्पनाशिल्पं प्रायोऽविद्याविनिर्मितम् ।
तद्योजनामयश्चात्र कुतर्कः किमनेन तत् ॥ ६ ॥

जातिप्रायश्च बाध्योऽयं प्रकृतान्यविकल्पनात् ।
हस्ती हन्तीतिवचने प्राप्ताप्राप्तविकल्पवत् ॥ ७ ॥

स्वभावोत्तरपर्यन्त एषोऽत्रापि च तत्त्वतः ।
नार्वाग्दृग्ज्ञानगम्यत्वमन्यथान्येन कल्पनात् ॥ ८ ॥

अपां दाहस्वभावत्वे दर्शिते दहनान्तिके ।
विप्रकृष्टेऽप्ययस्कान्ते स्वार्थशक्तेः किमुत्तरम् ॥ ९ ॥

दृष्टान्तमात्रसौलभ्यात्तदयं केन बाध्यताम् ।
स्वभावबाधने नालं कल्पनागौरवादिकम् ॥ १० ॥

द्विचन्द्रस्वप्नविज्ञाननिदर्शनबलोत्थितः ।
धियां निरालम्बनतां कुतर्कः साधयत्यपि ॥ ११ ॥

तत्कुतर्केण पर्याप्तमसमञ्जसकारिणा ।
अतीन्द्रियार्थसिद्ध्यर्थं नावकाशोऽस्य कुत्रचित् ॥ १२ ॥

शास्त्रस्यैवावकाशोऽत्र कुतर्काग्रहतस्ततः ।
शीलवान् योगवानत्र श्रद्धावांस्तत्त्वविद्भवेत् ॥ १३ ॥

तत्त्वतः शास्त्रभेदश्च न शास्तॄणामभेदतः ।
मोहस्तदधिमुक्तीनां तद्भेदाश्रयणं ततः ॥ १४ ॥

सर्वज्ञो मुख्य एकस्तत्प्रतिपत्तिश्च यावताम् ।
सर्वेऽपि ते तमापन्ना मुख्यं सामान्यतो बुधाः ॥ १५ ॥

न ज्ञायते विशेषस्तु सर्वथाऽसर्वदर्शिभिः ।
अतो न ते तमापन्ना विशिष्य भुवि केचन ॥ १६ ॥

सर्वज्ञप्रतिपत्त्यंशमाश्रित्यामलया धिया ।
निर्व्याजं तुल्यता भाव्या सर्वतन्त्रेषु योगिनाम् ॥ १७ ॥

दूरासन्नादिभेदोऽपि तद्भृत्यत्वं निहन्ति न ।
एको नामादिभेदेन भिन्नाचारेष्वपि प्रभुः ॥ १८ ॥

देवेषु योगशास्त्रेषु चित्राचित्रविभागतः ।
भक्तिवर्णनमप्येवं युज्यते तदभेदतः ॥ १९ ॥

संसारिषु हि देवेषु भक्तिस्तत्कायगामिनाम् ।
तदतीते पुनस्तत्त्वे तदतीतार्थयायिनाम् ॥ २० ॥

चित्रा चाद्येषु तद्रागतदन्यद्वेषसंगता ।
अचित्रा चरमे त्वेषा शमसाराखिलैव हि ॥ २१ ॥

इष्टापूर्तानि कर्माणि लोके चित्राभिसन्धितः ।
फलं चित्रं प्रयच्छन्ति तथाबुद्ध्यादिभेदतः ॥ २२ ॥

बुद्धिर्ज्ञानमसंमोहस्त्रिविधो बोध इष्यते ।
रत्नोपलम्भतज्ज्ञानतदवाप्तिनिदर्शनात् ॥ २३ ॥

आदरः करणे प्रीतिरविघ्नः संपदागमः ।
जिज्ञासा तज्ज्ञसेवा च सदनुष्ठानलक्षणम् ॥ २४ ॥

भवाय बुद्धिपूर्वाणि विपाकविरसत्वतः ।
कर्माणि ज्ञानपूर्वाणि श्रुतशक्त्या च मुक्तये ॥ २५ ॥

असंमोहसमुत्थानि योगिनामाशु मुक्तये ।
भेदेऽपि तेषामेकोऽध्वा जलधौ तीरमार्गवत् ॥ २६ ॥

तस्मादचित्रभक्त्याप्याः सर्वज्ञा न भिदामिताः ।
चित्रा गीर्भववैद्यानां तेषां शिष्यानुगुण्यतः ॥ २७ ॥

तथैव बीजाधानादेर्यथाभव्यमुपक्रिया ।
अचिन्त्यपुण्यसामर्थ्यादेकस्या वापि भेदतः ॥ २८ ॥

चित्रा वा देशना तत्तन्नयैः कालादियोगतः ।
यन्मूला तत्प्रतिक्षेपोऽयुक्तो भावमजानतः ॥ २९ ॥

यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्य एवोपपद्यते ॥ ३० ॥

ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः ।
कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ ३१ ॥

तत्कुतर्कग्रहस्त्याज्यो ददता दृष्टिमागमे ।
प्रायो धर्मा अपि त्याज्याः परमानन्दसंपदि ॥ ३२ ॥

## सद्दृष्टिद्वात्रिंशिका ॥ २४ ॥

प्रत्याहारः स्थिरायां स्याद्दर्शनं नित्यमभ्रमम् ।
तथा निरतिचारायां सूक्ष्मबोधसमन्वितम् ॥ १ ॥

विषयासंप्रयोगेऽन्तःस्वरूपानुकृतिः किल ।
प्रत्याहारो हृषीकाणामेतदायत्तताफलः ॥ २ ॥

अतो ग्रन्थिविभेदेन विवेकोपेतचेतसाम् ।
त्रपायै भवचेष्टा स्याद्बालक्रीडोपमाखिला ॥ ३ ॥

तत्त्वमत्र परंज्योतिर्ज्ञस्वभावैकमूर्तिकम् ।
विकल्पतल्पमारूढः शेषः पुनरुपप्लवः ॥ ४ ॥

भवभोगिफणाभोगो भोगोऽस्यामवभासते ।
फलं ह्यनात्मधर्मत्वात्तुल्यं यत्पुण्यपापयोः ॥ ५ ॥

धर्मादपि भवन् भोगः प्रायोऽनर्थाय देहिनाम् ।
चन्दनादपि संभूतो दहत्येव हुताशनः ॥ ६ ॥

स्कन्धात्स्कन्धान्तरारोपे भारस्येव न तात्त्विकी ।
इच्छाया विरतिर्भोगात्तत्संस्कारानतिक्रमात् ॥ ७ ॥

धारणा प्रीतयेऽन्येषां कान्तायां नित्यदर्शनम् ।
नान्यमुत् स्थिरभावेन मीमांसा च हितोदया ॥ ८ ॥

देशबन्धो हि चित्तस्य धारणा तत्र सुस्थितः ।
प्रियो भवति भूतानां धर्मैकाग्रमनास्तथा ॥ ९ ॥

अस्यामाक्षेपकज्ञानान्न भोगा भवहेतवः ।
श्रुतधर्मे मनोयोगाच्चेष्टाशुद्धेर्यथोदितम् ॥ १० ॥

मायाम्भस्तत्त्वतः पश्यन्ननुद्विग्नस्ततो द्रुतम् ।
तन्मध्येन प्रयात्येव यथा व्याघातवर्जितः ॥ ११ ॥

भोगान् स्वरूपतः पश्यंस्तथा मायोदकोपमान् ।
भुञ्जानोऽपि ह्यसङ्गः सन् प्रयात्येव परं पदम् ॥ १२ ॥

भोगतत्त्वस्य तु पुनर्न भवोदधिलङ्घनम् ।
मायोदकदृढावेशस्तेन यातीह कः पथा ॥ १३ ॥

स तत्रैव भवोद्विग्नो यथा तिष्ठत्यसंशयम् ।
मोक्षमार्गेऽपि हि तथा भोगजम्बालमोहितः ॥ १४ ॥

धर्मशक्तिं न हन्त्यस्यां भोगशक्तिर्बलीयसीम् ।
हन्ति दीपापहो वायुर्ज्वलन्तं न दवानलम् ॥ १५ ॥

मीमांसा दीपिका चास्यां मोहध्वान्तविनाशिनी ।
तत्त्वालोकेन तेन स्यान्न कदाप्यसमञ्जसम् ॥ १६ ॥

ध्यानसारा प्रभा तत्त्वप्रतिपत्तियुता रुजा ।
वर्जिता च विनिर्दिष्टा सत्प्रवृत्तिपदावहा ॥ १७ ॥

चित्तस्य धारणादेशे प्रत्ययस्यैकतानता ।
ध्यानं ततः सुखं सारमात्मायत्तं प्रवर्तते ॥ १८ ॥

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥ १९ ॥

ध्यानं च विमले बोधे सदैव हि महात्मनाम् ।
सदा प्रसृमरोऽनभ्रे प्रकाशो गगने विधोः ॥ २० ॥

सत्प्रवृत्तिपदं चेहासङ्गानुष्ठानसंज्ञितम् ।
संस्कारतः स्वरसतः प्रवृत्त्या मोक्षकारणम् ॥ २१ ॥

प्रशान्तवाहितासंज्ञं विसभागपरिक्षयः ।
शिववर्त्म ध्रुवाध्वेति योगिभिर्गीयते ह्यदः ॥ २२ ॥

प्रशान्तवाहिता वृत्तेः संस्कारात् स्यान्निरोधजात् ।
प्रादुर्भावतिरोभावौ तद्व्युत्थानजयोरयम् ॥ २३ ॥

सर्वार्थतैकाग्रतयोः समाधिस्तु क्षयोदयौ ।
तुल्यावेकाग्रता शान्तोदितौ च प्रत्ययाविह ॥ २४ ॥

अस्यां व्यवस्थितो योगी त्रयं निष्पादयत्यदः ।
ततश्चेयं विनिर्दिष्टा सत्प्रवृत्तिपदावहा ॥ २५ ॥

समाधिनिष्ठा तु परा तदासङ्गविवर्जिता ।
सात्मीकृतप्रवृत्तिश्च तदुत्तीर्णाशयेति च ॥ २६ ॥

स्वरूपमात्रनिर्भासं समाधिर्ध्यानमेव हि ।
विभागमनतिक्रम्य परे ध्यानफलं विदुः ॥ २७ ॥

निराचारपदो ह्यस्यामतः स्यान्नातिचारभाक् ।
चेष्टा चास्याखिला भुक्तभोजनाभाववन्मता ॥ २८ ॥

रत्नशिक्षादृगन्या हि तन्नियोजनदृग्यथा ।
फलभेदात्तथाचारक्रियाप्यस्य विभिद्यते ॥ २९ ॥

कृतकृत्यो यथा रत्ननियोगाद्रत्नविद्भवेत् ।
तथायं धर्मसंन्यासविनियोगान्महामुनिः ॥ ३० ॥

केवलश्रियमासाद्य सर्वलब्धिफलान्विताम् ।
परम्परार्थं संपाद्य ततो योगान्तमश्नुते ॥ ३१ ॥

तत्रायोगाद्योगमुख्याद्भवोपग्राहिकर्मणाम् ।
क्षयं कृत्वा प्रयात्युच्चैः परमानन्दमन्दिरम् ॥ ३२ ॥

## क्लेशहानोपायद्वात्रिंशिका ॥ २५ ॥

ज्ञानं च सदनुष्ठानं सम्यक् सिद्धान्तवेदिनः ।
क्लेशानां कर्मरूपाणां हानोपायं प्रचक्षते ॥ १ ॥

नैरात्म्यदर्शनादन्ये निबन्धनवियोगतः ।
क्लेशप्रहाणमिच्छन्ति सर्वथा तर्कवादिनः ॥ २ ॥

समाधिराज एतच्च तदेतत्तत्त्वदर्शनम् ।
आग्रहच्छेदकार्येतत्तदेतदमृतं परम् ॥ ३ ॥

जन्मयोनिर्यतस्तृष्णा ध्रुवा सा चात्मदर्शने ।
तदभावे च नेयं स्याद्बीजाभाव इवाङ्कुरः ॥ ४ ॥

न ह्यपश्यन्नहमिति स्निह्यत्यात्मनि कश्चन ।
न चात्मनि विना प्रेम्णा सुखहेतुषु धावति ॥ ५ ॥

नैरात्म्यायोगतो नैतदभावक्षणिकत्वयोः ।
आद्यपक्षेऽविचार्यत्वाद्धर्माणां धर्मिणं विना ॥ ६ ॥

वक्राद्यभावतश्चैव कुमारीसुतबुद्धिवत् ।
विकल्पस्याप्यशक्यत्वाद्वक्तुं वस्तु विना स्थितम् ॥ ७ ॥

द्वितीयेऽपि क्षणादूर्ध्वं नाशादन्याप्रसिद्धितः ।
अन्यथोत्तरकार्याङ्गभावाविच्छेदतोऽन्वयात् ॥ ८ ॥

स्वनिवृत्तिस्वभावत्वे न क्षणस्यापरोदयः ।
अन्यजन्मस्वभावत्वे स्वनिवृत्तिरसंगता ॥ ९ ॥

उभयैकस्वभावत्वे न विरुद्धोऽन्वयोऽपि हि ।
न च तद्धेतुकः स्नेहः किं तु कर्मोदयोद्भवः ॥ १० ॥

ध्रुवेक्षणेऽपि न प्रेम निवृत्तमनुपप्लवात् ।
ग्राह्याकार इव ज्ञानेऽन्यथा तत्रापि तद्भवेत् ॥ ११ ॥

विवेकख्यातिरुच्छेत्री क्लेशानामनुपप्लवा ।
सप्तधा प्रान्तभूप्रज्ञा कार्यचित्तविमुक्तिभिः ॥ १२ ॥

बलान्नश्यत्यविद्यास्या उत्तरेषामियं पुनः ।
प्रसुप्ततनुविच्छिन्नोदाराणां क्षेत्रमिष्यते ॥ १३ ॥

स्वकार्यं नारभन्ते ये चित्तभूमौ स्थिता अपि ।
विना प्रबोधकबलं ते प्रसुप्ताः शिशोरिव ॥ १४ ॥

भावनात्प्रतिपक्षस्य शिथिलीकृतशक्तयः ।
तनवोऽतिबलापेक्षा योगाभ्यासवतो यथा ॥ १५ ॥

अन्येनोच्चैर्बलवताभिभूतस्वीयशक्तयः ।
तिष्ठन्तो हन्त विच्छिन्ना रागो द्वेषोदये यथा ॥ १६ ॥

सर्वेषां सन्निधिं प्राप्ता उदाराः सहकारिणाम् ।
निर्वर्तयन्तः स्वं कार्यं यथा व्युत्थानवर्तिनः ॥ १७ ॥

अविद्या चास्मिता चैव रागद्वेषौ तथापरौ ।
पञ्चमोऽभिनिवेशश्च क्लेशा एते प्रकीर्तिताः ॥ १८ ॥

विपर्यासात्मिकाविद्यास्मिता दृग्दर्शनैकता ।
रागस्तृष्णा सुखोपाये द्वेषो दुःखाङ्गनिन्दनम् ॥ १९ ॥

विदुषोऽपि तथारूढः सदा स्वरसवृत्तिकः ।
शरीराद्यवियोगस्याभिनिवेशोऽभिलाषतः ॥ २० ॥

एभ्यः कर्माशयो दृष्टादृष्टजन्मानुभूतिभाक् ।
तद्विपाकश्च जात्यायुर्भोगाख्यः संप्रवर्तते ॥ २१ ॥

परिणामाच्च तापाच्च संस्कारादद्विविधोऽप्ययम् ।
गुणवृत्तिविरोधाच्च हन्त दुःखमयः स्मृतः ॥ २२ ॥

इत्थं दृग्दृश्ययोगात्माऽविद्यको भवविप्लवः ।
नाशान्नश्यत्यविद्याया इति पातञ्जला जगुः ॥ २३ ॥

नैतत्साध्वपुमर्थत्वात् पुंसः कैवल्यसंस्थितेः ।
क्लेशाभावेन संयोगाजन्मोच्छेदो हि गीयते ॥ २४ ॥

तात्त्विको नात्मनो योगो ह्येकान्तापरिणामिनः ।
कल्पनामात्रमेवं च क्लेशास्तद्धानमप्यहो ॥ २५ ॥

नृपस्येवाभिधानाद्यः सातबन्धः प्रकीर्तितः ।
अहिशङ्काविषज्ञानाच्चेतरोऽसौ निरर्थकः ॥ २६ ॥

पुरुषार्थाय दुःखेऽपि प्रवृत्तेर्ज्ञानदीपतः ।
हानं चरमदुःखस्य क्लेशस्येति तु तार्किकाः ॥ २७ ॥

ब्रूते हन्त विना कश्चिददोऽपि न मदोद्धतम् ।
सुखं विना न दुःखार्थं कृतकृत्यस्य हि श्रमः ॥ २८ ॥

चरमत्वं च दुःखत्वव्याप्या जातिर्न जातितः ।
तच्छरीरप्रयोज्यातः साङ्कर्यान्नान्यदर्थवत् ॥ २९ ॥

सुखमुद्दिश्य तद्दुःखनिवृत्त्या नान्तरीयकम् ।
प्रक्षयः कर्मणामुक्तो युक्तो ज्ञानक्रियाध्वना ॥ ३० ॥

क्लेशाः पापानि कर्माणि बहुभेदानि नो मते ।
योगादेव क्षयस्तेषां न भोगादनवस्थितेः ॥ ३१ ॥

ततो निरुपमं स्थानमनन्तमुपतिष्ठते ।
भवप्रपञ्चरहितं परमानन्दमेदुरम् ॥ ३२ ॥

## योगमाहात्म्यद्वात्रिंशिका ॥ २६ ॥

शास्त्रस्योपनिषद्योगो योगो मोक्षस्य वर्तनी ।
अपायशमनो योगो योगः कल्याणकारणम् ॥ १ ॥

संसारवृद्धिर्धनिनां पुत्रदारादिना यथा ।
शास्त्रेणापि तथा योगं विना हन्त विपश्चिताम् ॥ २ ॥

इहापि लब्धयश्चित्राः परत्र च महोदयः ।
परात्मायत्तता चैव योगकल्पतरोः फलम् ॥ ३ ॥

योगसिद्धेः श्रुतेष्वस्य बहुधा दर्शितं फलम् ।
दर्श्यते लेशतश्चैतद्यदन्यैरपि दर्शितम् ॥ ४ ॥

अतीतानागतज्ञानं परिणामेषु संयमात् ।
शब्दार्थधीविभागे च सर्वभूतरुतस्य धीः ॥ ५ ॥

संस्कारे पूर्वजातीनां प्रत्यये परचेतसः ।
शक्तिस्तम्भे तिरोधानं कायरूपस्य संयमात् ॥ ६ ॥

संयमात् कर्मभेदानामरिष्टेभ्योऽपरान्तधीः ।
मैत्र्यादिषु बलान्येषां हस्त्यादीनां बलेषु च ॥ ७ ॥

सूर्ये च भुवनज्ञानं ताराव्यूहे गतिर्विधौ ।
ध्रुवे च तद्गतेर्नाभिचक्रे व्यूहस्य वर्ष्मणः ॥ ८ ॥

क्षुत्तृड्व्यय: कण्ठकूपे कूर्मनाड्यामचापलम् ।
मूर्धज्योतिषि सिद्धानां दर्शनं च प्रकीर्तितम् ॥ ९ ॥

प्रातिभात् सर्वत: संविच्चेतसो हृदये तथा ।
स्वार्थे संयमत: पुंसि भिन्ने भोगात्परार्थकात् ॥ १० ॥

समाधिविघ्ना व्युत्थानसिद्धय: प्रातिभं तत: ।
श्रावणं वेदनादर्शास्वादवार्ताश्च वित्तय: ॥ ११ ॥

बन्धकारणशैथिल्यात् प्रचारस्य च वेदनात् ।
चित्तस्य स्यात् परपुरप्रवेशो योगसेविन: ॥ १२ ॥

समानस्य जयाद्धामोदानस्याबाद्यसङ्गता ।
दिव्यं श्रोत्रं पुन: श्रोत्रव्योम्नो: संबन्धसंयमात् ॥ १३ ॥

लघुतूलसमापत्त्या कायव्योम्नोस्ततोऽम्बरे ।
गतिर्महाविदेहात: प्रकाशावरणक्षय: ॥ १४ ॥

स्थूलादिसंयमाद्भूतजयोऽस्मादणिमादिकम् ।
कायसंपच्च तद्धर्मानभिघातश्च जायते ॥ १५ ॥

संयमाद्ग्रहणादीनामिन्द्रियाणां जयस्तत: ।
मनोजवो विकरणभावश्च प्रकृतेर्जय: ॥ १६ ॥

स्थितस्य सत्त्वपुरुषान्यताख्यातौ च केवलम् ।
सार्वज्ञ्यं सर्वभावानामधिष्ठातृत्वमेव च ॥ १७ ॥

स्मृता सिद्धिर्विशोकेयं तद्वैराग्याच्च योगिन: ।
दोषबीजक्षये नूनं कैवल्यमुपदर्शितम् ॥ १८ ॥

असङ्गश्चास्मयश्चैव स्थितावुपनिमन्त्रणे ।
बीजं पुनरनिष्टस्य प्रसङ्ग: स्यात् किलान्यथा ॥ १९ ॥

स्यात् क्षणक्रमसंबन्धसंयमाद्यद्विवेकजम् ।
ज्ञानं जात्यादिभिस्तच्च तुल्ययो: प्रतिपत्तिकृत् ॥ २० ॥

तारकं सर्वविषयं सर्वथाविषयाक्रमम् ।
शुद्धिसाम्येन कैवल्यं ततः पुरुषसत्त्वयोः ॥ २१ ॥

इह सिद्धिषु वैचित्र्ये बीजं कर्मक्षयादिकम् ।
संयमश्चात्र सदसत्प्रवृत्तिविनिवृत्तितः ॥ २२ ॥

प्रायश्चित्तं पुनर्योगः प्राग्जन्मकृतकर्मणाम् ।
अब्धीनां निश्चयादन्तःकोट्याकोटिस्थितेः किल ॥ २३ ॥

निकाचितानामपि यः कर्मणां तपसा क्षयः ।
सोऽभिप्रेत्योत्तमं योगमपूर्वकरणोदयम् ॥ २४ ॥

अपि क्रूराणि कर्माणि क्षणाद्योगः क्षिणोति हि ।
ज्वलनो ज्वालयत्येव कुटिलानपि पादपान् ॥ २५ ॥

दृढप्रहारिशरणं चिलातीपुत्ररक्षकः ।
अपि पापकृतां योगः पक्षपातान्न शङ्कते ॥ २६ ॥

अहर्निशमपि ध्यातं योग इत्यक्षरद्वयम् ।
अप्रवेशाय पापानां ध्रुवं वज्रार्गलायते ॥ २७ ॥

आजीविकादिनार्थेन योगस्य च विडम्बना ।
पवनाभिमुखस्थस्य ज्वलनज्वालनोपमा ॥ २८ ॥

योगस्पृहापि संसारतापव्ययतपात्ययः ।
महोदयसरस्तीरसमीरलहरीलवः ॥ २९ ॥

योगानुग्राहको योऽन्यैः परमेश्वर इष्यते ।
अचिन्त्यपुण्यप्राग्भारयोगानुग्राह्य एव सः ॥ ३० ॥

भरतो भरतक्षोणीं भुञ्जानोऽपि महामतिः ।
तत्कालं योगमाहात्म्यादबुभुजे केवलश्रियम् ॥ ३१ ॥

पूर्वमप्राप्तधर्मापि परमानन्दनन्दिता ।
योगप्रभावतः प्राप मरुदेवा परं पदम् ॥ ३२ ॥

# भिक्षुद्वात्रिंशिका ॥ २७ ॥

नित्यं चेतः समाधाय यो निष्क्रम्य गुरूदिते ।
प्रत्यापिबति नो वान्तमवशः कुटिलभ्रुवाम् ॥ १ ॥

पृथिव्यादींश्च षट्कायान् सुखेच्छूनसुखद्विषः ।
गणयित्वात्मतुल्यान् यो महाव्रतरतो भवेत् ॥ २ ॥

औद्देशिकं न भुञ्जीत त्रसस्थावरघातजम् ।
बुद्धोक्तध्रुवयोगी यः कषायांश्चतुरो वमेत् ॥ ३ ॥

निर्जातरूपरजतो गृहियोगं च वर्जयेत् ।
सम्यग्दृष्टिः सदाऽमूढस्तथा संयमबुद्धिषु ॥ ४ ॥

न यश्चागामिनेऽर्थाय सन्निधत्तेऽशनादिकम् ।
साधर्मिकान्निमन्त्र्यैव भुक्त्वा स्वाध्यायकृच्च यः ॥ ५ ॥

न कुप्यति कथायां यो नाप्युच्चैः कलहायते ।
उचितेऽनादरो यस्य नादरोऽनुचितेऽपि च ॥ ६ ॥

आक्रोशादीन्महात्मा यः सहते ग्रामकण्टकान् ।
न बिभेति भयेभ्यश्च स्मशाने प्रतिमास्थितः ॥ ७ ॥

आकुष्टो वा हतो वापि लूषितो वा क्षमासमः ।
व्युत्सृष्टत्यक्तदेहो योऽनिदानश्चाकुतूहलः ॥ ८ ॥

यश्च निर्ममभावेन काये दोषैरुपप्लुते ।
जानाति पुद्गलान्यस्य न मे किञ्चिदुपप्लुतम् ॥ ९ ॥

तथाहि मिथिलानाथो मुमुक्षुर्निर्ममः पुरा ।
बभाण मिथिलादाहे न मे किञ्चन दह्यते ॥ १० ॥

हस्तेन चाङ्घ्रिणा वाचा संयतो विजितेन्द्रियः ।
अध्यात्मध्याननिरतः सूत्रार्थं यश्च चिन्तयेत् ॥ ११ ॥

अज्ञातोञ्छं चरन् शुद्धमलोलोऽरसगृद्धिमान् ।
ऋद्धिसत्कारपूजांश्च जीवितं यो न काङ्क्षति ॥ १२ ॥

यो न कोपकरं ब्रूयात् कुशीलं न वदेत्परम् ।
प्रत्येकं पुण्यपापज्ञो जात्यादिमदवर्जितः ॥ १३ ॥

प्रवेदयत्यार्यपदं परं स्थापयति स्थितः ।
धर्मचेष्टां कुशीलानां परित्यजति यः पुनः ॥ १४ ॥

उद्वेगो हसितं शोको रुदितं क्रन्दितं तथा ।
यस्य नास्ति जुगुप्सा च क्रीडा चापि कदाचन ॥ १५ ॥

इदं शरीरमशुचि शुक्रशोणितसंभवम् ।
अशाश्वतं च मत्वा यः शाश्वतार्थं प्रवर्तते ॥ १६ ॥

स भावभिक्षुर्भेत्तृत्वादागमस्योपयोगतः ।
भेदनेनोग्रतपसा भेद्यस्याशुभकर्मणः ॥ १७ ॥

भिक्षामात्रेण वा भिक्षुर्यतमानो यतिर्भवेत् ।
भवक्षयाद्भवान्तश्च चरकः संयमं चरन् ॥ १८ ॥

क्षपकः क्षपयन् पापं तपस्वी च तपः श्रिया ।
भिक्षुशब्दनिरुक्तस्य भेदाः खल्वर्थतो ह्यमी ॥ १९ ॥

तीर्णस्तायी व्रती द्रव्यं क्षान्तो दान्तो मुनिर्यतिः ।
ऋजुः प्रज्ञापको भिक्षुर्विद्वान् विरततापसौ ॥ २० ॥

बुद्धः प्रव्रजितो मुक्तोऽनगारश्चरकस्तथा ।
पाखण्डी ब्राह्मणश्चैव परिव्राजकसंयतौ ॥ २१ ॥

साधुर्लूक्षश्च तीरार्थी निर्ग्रन्थः श्रमणस्तथा ।
इत्यादीन्यभिधानानि गुणभाजां महात्मनाम् ॥ २२ ॥

संवेगो विषयत्यागः सुशीलानां च संगतिः ।
ज्ञानदर्शनचारित्राराधना विनयस्तपः ॥ २३ ॥

क्षान्तिर्मार्दवमृजुता तितिक्षा मुक्त्यदीनते ।
आवश्यकविशुद्धिश्च भिक्षोर्लिङ्गान्यकीर्तयन् ॥ २४ ॥

एतद्गुणान्वितो भिक्षुर्न भिन्नस्तु विपर्ययात् ।
स्वर्णं कषादिशुद्धं चेद्युक्तिस्वर्णं न तत्पुनः ॥ २५ ॥

षट्कायभिद्गृहं कुर्याद्भुञ्जीतौद्देशिकं च यः ।
पिबेत् प्रत्यक्षमप्कायं स कथं भिक्षुरुच्यते ॥ २६ ॥

गृहिणोऽपि सदारम्भा याचमाना ऋजुं जनम् ।
दीनान्धकृपणा ये च ते खलु द्रव्यभिक्षवः ॥ २७ ॥

त्रसस्थावरहन्तारो नित्यमब्रह्मचारिणः ।
मिथ्यादृशः संचयिनस्तथा सचित्तभोजिनः ॥ २८ ॥

विशुद्धतपसोऽभावादज्ञानध्वस्तशक्तयः ।
त्रिधा पापेषु निरता हन्त त्यक्तगृहा अपि ॥ २९ ॥

वर्धकिर्द्रव्यतो भिक्षुरुच्यते दारुभेदनात् ।
द्रव्यभिक्षणशीलत्वाद्ब्राह्मणादिश्च विश्रुतः ॥ ३० ॥

प्रधानद्रव्यभिक्षुश्च शुद्धः संविग्नपाक्षिकः ।
संपूर्य प्रतिमादीक्षां गृही यो वा ग्रहीष्यति ॥ ३१ ॥

केचिदुक्ता अनन्तेषु भावभिक्षोर्गुणाः पुनः ।
भाव्यमाना अमी सम्यक् परमानन्दसंपदे ॥ ३२ ॥

## दीक्षाद्वात्रिंशिका ॥ २८ ॥

दीक्षा हि श्रेयसो दानादशिवक्षपणात्तथा ।
सा ज्ञानिनो नियोगेन ज्ञानिनिश्रावतोऽथवा ॥ १ ॥

एकः स्यादिह चक्षुष्मानन्यस्तदनुवृत्तिमान् ।
प्राप्नुतो युगपद्ग्रामं गन्तव्यं यदुभावपि ॥ २ ॥

यस्य क्रियासु सामर्थ्यं स्यात्सम्यग्गुरुरागतः ।
योग्यता तस्य दीक्षायामपि माषतुषाकृतेः ॥ ३ ॥

देया दीक्षास्य विधिना नामादिन्यासपूर्वकम् ।
हन्तानुपप्लवश्चायं संप्रदायानुसारतः ॥ ४ ॥

नाम्नान्वर्थेन कीर्त्तिः स्यात् स्थापनारोग्यकारिणी ।
द्रव्येण च व्रतस्थैर्यं भावः सत्पददीपनः ॥ ५ ॥

इहादौ वचनक्षान्तिर्धर्मक्षान्तिरनन्तरम् ।
अनुष्ठानं च वचनानुष्ठानात् स्यादसंगतम् ॥ ६ ॥

उपकारापकाराभ्यां विपाकाद्वचनात्तथा ।
धर्माच्च समये क्षान्तिः पञ्चधा हि प्रकीर्तिता ॥ ७ ॥

प्रीतिभक्तिवचोऽसङ्गैरनुष्ठानं चतुर्विधम् ।
आद्यद्वये क्षमास्तिस्रोऽन्तिमे द्वे चान्तिमद्वये ॥ ८ ॥

सूक्ष्माश्च विरलाश्चैवातिचारा वचनोदये ।
स्थूलाश्चैव घनाश्चैव ततः पूर्वममी पुनः ॥ ९ ॥

ततो निरतिचारेण धर्मक्षान्त्यादिना किल ।
सर्वं संवत्सरादूर्ध्वं शुक्लमेवोपजायते ॥ १० ॥

मासादौ व्यन्तरादीनां तेजोलेश्याव्यतिक्रमः ।
पर्याये युज्यते चेत्थं गुणश्रेणिप्रवृद्धितः ॥ ११ ॥

दिनानि पक्षा मासा वा गण्यन्ते शरदोऽपि च ।
नास्यां गुणाविघातस्य गण्यतेऽवसरः पुनः ॥ १२ ॥

नैहिकार्थानुरागेण यस्यां पापविषव्ययः ।
वसन्तनृपचेष्टेव सा दीक्षानर्थकारिणी ॥ १३ ॥

इन्द्रियाणां कषायाणां गृह्यते मुण्डनोत्तरम् ।
या शिरोमुण्डनव्यङ्ग्या तां सद्दीक्षां प्रचक्षते ॥ १४ ॥

विहाय पूर्वसंयोगमस्यामुपशमं व्रजन् ।
मनाक्कायं प्रकर्षेण निश्चयेन च पीडयेत् ॥ १५ ॥

वीराणां दुश्चरः पन्था एषोऽनागमगामिनाम् ।
आदानीयाभिधानानां भिन्दतां स्वसमुच्छ्रयम् ॥ १६ ॥

शरीरेणैव युध्यन्ते दीक्षापरिणतौ बुधाः ।
दुर्लभं वैरिणं प्राप्य व्यावृत्ता बाह्ययुद्धतः ॥ १७ ॥

सर्वो यदर्थमारम्भः क्रियतेऽनन्तदुःखकृत् ।
सर्पलालनमङ्गस्य पालनं तस्य वैरिणः ॥ १८ ॥

शरीराद्यनुरागस्तु न गतो यस्य तत्त्वतः ।
तेषामेकाकिभावोऽपि क्रोधादिनियतः स्मृतः ॥ १९ ॥

नन्वेव तं विना साधोः कथं भिक्षाटनाद्यपि ।
न तस्य मोहजन्यत्वादसङ्गप्रतिपत्तितः ॥ २० ॥

ससङ्गप्रतिपत्तिर्हि ममता वासनात्मिका ।
असङ्गप्रतिपत्तिश्च मुक्तिवाञ्छानुरोधिनी ॥ २१ ॥

अनादिकालानुगता महती सङ्गवासना ।
तत्त्वज्ञानानुगतया दीक्षयैव निरस्यते ॥ २२ ॥

यः समः सर्वभूतेषु त्रसेषु स्थावरेषु च ।
अत एव च तस्यैव दीक्षा सामायिकात्मिका ॥ २३ ॥

नारत्यानन्दयोरस्यामवकाशः कदाचन ।
प्रचारो भानुमत्यभ्रे न तमस्तारकत्विषोः ॥ २४ ॥

शुद्धोपयोगरूपेयमित्थं च व्यवतिष्ठते ।
व्यवहारेऽपि नैवास्या व्युच्छेदो वासनात्मना ॥ २५ ॥

फले न तुल्यकक्षत्वं शुभशुद्धोपयोगयोः ।
येषामन्त्यक्षणे तेषां शैलेश्यामेव विश्रमः ॥ २६ ॥

अध्यात्मादिकयोगानां ध्यानेनोपक्षयो यदि ।
हन्त वृत्तिक्षयेण स्यात्तदा तस्याप्युपक्षयः ॥ २७ ॥

व्यवहारेऽपि च ध्यानमक्षतप्रसरं सदा ।
मनोवाक्काययोगानां सुव्यापारस्य तत्त्वतः ॥ २८ ॥

शुभं योगं प्रतीत्यास्यामनारम्भित्वमागमे ।
व्यवस्थितमितश्चांशात् स्वभावसमवस्थितिः ॥ २९ ॥

व्युत्थानं व्यवहारश्चेन्न ध्यानाप्रतिबन्धतः ।
स्थितं ध्यानान्तरारम्भ एकध्यानान्तरं पुनः ॥ ३० ॥

विचित्रत्वमनालोच्य बकुशत्वादिना श्रुतम् ।
दीक्षाशुद्धैकरूपेण वृथा भ्रान्तं दिगम्बरैः ॥ ३१ ॥

चित्रा क्रियात्मना चेयमेका सामायिकात्मना ।
तस्मात् समुच्चयेनार्यैः परमानन्दकृन्मता ॥ ३२ ॥

## विनयद्वात्रिंशिका ॥ २९ ॥

कर्मणां द्राग्विनयनाद्विनयो विदुषां मतः ।
अपवर्गफलाढ्यस्य मूलं धर्मतरोरयम् ॥ १ ॥

ज्ञानदर्शनचारित्रतपोभिरुपचारतः ।
अयं च पञ्चधा भिन्नो दर्शितो मुनिपुङ्गवैः ॥ २ ॥

प्रतिरूपेण योगेन तथानाशातनात्मना ।
उपचारो द्विधा तत्रादिमो योगत्रयात्त्रिधा ॥ ३ ॥

अभिग्रहासनत्यागावभ्युत्थानाञ्जलिग्रहौ ।
कृतिकर्म च शुश्रूषा गतिः पश्चाच्च संमुखम् ॥ ४ ॥

कायिकोऽष्टविधश्चायं वाचिकश्च चतुर्विधः ।
हितं मितं चापरुषं ब्रुवतोऽनुविचिन्त्य च ॥ ५ ॥

मानसश्च द्विधा शुद्धप्रवृत्त्याऽसन्निरोधतः ।
छद्मस्थानामयं प्रायः सकलोऽन्यानुवृत्तितः ॥ ६ ॥

अर्हत्सिद्धकुलाचार्योपाध्यायस्थविरेषु च ।
गणसङ्घक्रियाधर्मज्ञानज्ञानिगणिष्वपि ॥ ७ ॥

अनाशातनया भक्त्या बहुमानेन वर्णनात् ।
द्विपञ्चाशद्विधः प्रोक्तो द्वितीयश्चौपचारिकः ॥ ८ ॥

एकस्याशातनाप्यत्र सर्वेषामेव तत्त्वतः ।
अन्योऽन्यमनुविद्धा हि तेषु ज्ञानादयो गुणाः ॥ ९ ॥

नूनमल्पश्रुतस्यापि गुरोराचारशालिनः ।
हीलना भस्मसात्कुर्याद् गुणं वह्निरिवेन्धनम् ॥ १० ॥

शक्त्यग्रज्वलनव्यालसिंहक्रोधातिशायिनी ।
अनन्तदुःखजननी कीर्तिता गुरुहीलना ॥ ११ ॥

पठेद्यस्यान्तिके धर्मपदान्यस्यापि सन्ततम् ।
कायवाङ्मनसां शुद्ध्या कुर्याद्विनयमुत्तमम् ॥ १२ ॥

पर्यायेण विहीनोऽपि शुद्धज्ञानगुणाधिकः ।
ज्ञानप्रदानसामर्थ्यादतो रत्नाधिकः स्मृतः ॥ १३ ॥

शिल्पार्थमपि सेवन्ते शिल्पाचार्यं जनाः किल ।
धर्माचार्यस्य धर्मार्थं किं पुनस्तदतिक्रमः ॥ १४ ॥

ज्ञानार्थं विनयं प्राहुरपि प्रकटसेविनः ।
अत एवापवादेनान्यथा शास्त्रार्थबाधनम् ॥ १५ ॥

न चैवमस्य भावत्वाद् द्रव्यत्वोक्तिर्विरुध्यते ।
सद्भावकारणत्वोक्तेर्भावस्याप्यागमाख्यया ॥ १६ ॥

विनयेन विना न स्याज्जिनप्रवचनोन्नतिः ।
पयःसेकं विना किं वा वर्धते भुवि पादपः ॥ १७ ॥

विनयं ग्राह्यमाणो यो मृदूपायेन कुप्यति ।
उत्तमां श्रियमायान्तीं दण्डेनापनयत्यसौ ॥ १८ ॥

त्रैलोक्येऽपि विनीतानां दृश्यते सुखमङ्गिनाम् ।
त्रैलोक्येऽप्यविनीतानां दृश्यतेऽसुखमङ्गिनाम् ॥ १९ ॥

ज्ञानादिविनयेनैव पूज्यत्वाप्तिः श्रुतोदिता ।
गुरुत्वं हि गुणापेक्षं न स्वेच्छामनुधावति ॥ २० ॥

विनये च श्रुते चैव तपस्याचार एव च ।
चतुर्विधः समाधिस्तु दर्शितो मुनिपुङ्गवैः ॥ २१ ॥

शुश्रूषति विनीतः सन् सम्यगेवावबुध्यते ।
यथावत् कुरुते चार्थं मदेन च न माद्यति ॥ २२ ॥

श्रुतमेकाग्रता वा मे भवितात्मानमेव वा ।
स्थापयिष्यामि धर्मेऽन्यं वेत्यध्येति सदागमम् ॥ २३ ॥

कुर्यात्तपस्तथाचारं नैहिकामुष्मिकाशया ।
कीर्त्याद्यर्थं च नो किं तु निष्कामो निर्जराकृते ॥ २४ ॥

इत्थं समाहिते स्वान्ते विनयस्य फलं भवेत् ।
स्पर्शाख्यं स हि तत्त्वाप्तिर्बोधमात्रं परः पुनः ॥ २५ ॥

अक्षेपफलदः स्पर्शस्तन्मयीभावतो मतः ।
यथा सिद्धरसस्पर्शस्ताम्रे सर्वानुवेधतः ॥ २६ ॥

इत्थं च विनयो मुख्य- सर्वानुगमशक्तितः ।
मिष्टान्नेष्विव सर्वेषु निपतन्निक्षुजो रसः ॥ २७ ॥

दोषाः किल तमांसीव क्षीयन्ते विनयेन च ।
प्रसृतेनांशुजालेन चण्डमार्तण्डमण्डलात् ॥ २८ ॥

श्रुतस्याप्यतिदोषाय ग्रहणं विनयं विना ।
यथा महानिधानस्य विना साधनसन्निधिम् ॥ २९ ॥

विनयस्य प्रधानत्वद्योतनायैव पर्षदि ।
तीर्थं तीर्थपतिर्नत्वा कृतार्थोऽपि कथां जगौ ॥ ३० ॥

छिद्यते विनयो यैस्तु शुद्धोञ्छादिपरैरपि ।
तैरप्यग्रेसरीभूय मोक्षमार्गो विलुप्यते ॥ ३१ ॥

नियुङ्क्ते यो यथास्थानमेनं तस्य तु सन्निधौ ।
स्वयंवराः समायान्ति परमानन्दसंपदः ॥ ३२ ॥

## केवलिभुक्तिव्यवस्थापनद्वात्रिंशिका ॥ ३० ॥

सर्वथा दोषविगमात् कृतकृत्यतया तथा ।
आहारसंज्ञाविरहादनन्तसुखसंगतेः ॥ १ ॥

दग्धरज्जुसमत्वाच्च वेदनीयस्य कर्मणः ।
अक्षोद्भवतया देहगतयोः सुखदुःखयोः ॥ २ ॥

मोहात्परप्रवृत्तेश्च सातवेद्यानुदीरणात् ।
प्रमादजननादुच्चैराहारकथयापि च ॥ ३ ॥

भुक्त्या निद्रादिकोत्पत्तेस्तथा ध्यानतपोव्ययात् ।
परमौदारिकाङ्गस्य स्थास्नुत्वात्तां विनापि च ॥ ४ ॥

परोपकारहानेश्च पुरीषादिजुगुप्सया ।
व्याध्युत्पत्तेश्च भगवान् भुङ्क्ते नेति दिगम्बराः (पञ्चभिः कुलकम्) ॥ ५ ॥

सिद्धान्तश्चायमधुना लेशेनास्माभिरुच्यते ।
दिगम्बरमतव्यालपलायनकलागुरुः ॥ ६ ॥

हन्ताज्ञानादिका दोषा घातिकर्मोदयोद्भवाः ।
तदभावेऽपि किं न स्याद्वेदनीयोद्भवा क्षुधा ॥ ७ ॥

अव्याबाधविघाताच्चेत्सा दोष इति ते मतम् ।
नरत्वमपि दोषः स्यात्तदा सिद्धत्वदूषणात् ॥ ८ ॥

घातिकर्मक्षयादेवाक्षता च कृतकृत्यता ।
तदभावेऽपि नो बाधा भवोपग्राहिकर्मभिः ॥ ९ ॥

आहारसंज्ञा चाहारतृष्णाख्या न मुनेरपि ।
किं पुनस्तदभावेन स्वामिनो मुक्तिबाधनम् ॥ १० ॥

अनन्तं च सुखं भर्तुर्ज्ञानादिगुणसंगतम् ।
क्षुधादयो न बाधन्ते पूर्णं त्वस्ति महोदये ॥ ११ ॥

दग्धरज्जुसमत्वं च वेदनीयस्य कर्मणः ।
वदन्तो नैव जानन्ति सिद्धान्तार्थव्यवस्थितिम् ॥ १२ ॥

पुण्यप्रकृतितीव्रत्वादसाताद्यनुपक्षयात् ।
स्थितिशेषाद्यपेक्षं वा तद्वचो व्यवतिष्ठते ॥ १३ ॥

इन्द्रियोद्भवताध्रौव्यं बाह्ययोः सुखदुःखयोः ।
चित्रं पुनः श्रुतं हेतुः कर्माध्यात्मिकयोस्तयोः ॥ १४ ॥

आहारादिप्रवृत्तिश्च मोहजन्या यदीष्यते ।
देशनादिप्रवृत्त्यापि भवितव्यं तदा तथा ॥ १५ ॥

यत्नं विना निसर्गाच्चेद्देशनादिकमिष्यते ।
भुक्त्यादिकं तथैव स्याद्दृष्टबाधा समोभयोः ॥ १६ ॥

भुक्त्या या सातवेद्यस्योदीरणापाद्यते त्वया ।
सापि देशनयाऽसातवेद्यस्यैतां तवाक्षिपेत् ॥ १७ ॥

उदीरणाख्यं करणं प्रमादव्यङ्ग्यमत्र यत् ।
तस्य तत्त्वमजानानः खिद्यसे स्थूलया धिया ॥ १८ ॥

आहारकथया हन्त प्रमादः प्रतिबन्धतः ।
तदभावे च नो भुक्त्या श्रूयते सुमुनेरपि ॥ १९ ॥

निद्रा नोत्पाद्यते भुक्त्या दर्शनावरणं विना ।
उत्पाद्यते न दण्डेन घटो मृत्पिण्डमन्तरा ॥ २० ॥

रासनं च मतिज्ञानमाहारेण भवेद्यदि ।
घ्राणीयं स्यात्तदा पुष्पं घ्राणतर्पणयोगतः ॥ २१ ॥

ईर्यापथप्रसङ्गश्च समोऽत्र गमनादिना ।
अक्षते ध्यानतपसी स्वकालासंभवे पुनः ॥ २२ ॥

परमौदारिकं चाङ्गं भिन्नं चेत्तत्र का प्रमा ।
औदारिकादभिन्नं चेद्विना भुक्तिं न तिष्ठति ॥ २३ ॥

भुक्त्याद्यदृष्टं संबन्धमदृष्टं स्थापकं तनोः ।
तत्त्यागे दृष्टबाधा त्वत्पक्षभक्षणराक्षसी ॥ २४ ॥

प्रतिकूलानिवर्त्यत्वात्तत्तनुत्वं च नोचितम् ।
दोषजन्मतनुत्वं च निर्दोषे नोपपद्यते ॥ २५ ॥

परोपकारहानिश्च नियतावसरस्य न ।
पुरीषादिजुगुप्सा च निर्मोहस्य न विद्यते ॥ २६ ॥

ततोऽन्येषां जुगुप्सा चेत्सुरासुरनृपर्षदि ।
नाग्र्येऽपि न कथं तस्यातिशयश्चोभयोः समः ॥ २७ ॥

स्वतो हितमिताहाराद्व्याध्युत्पत्तिश्च कापि न ।
ततो भगवतो भुक्तौ पश्यामो नैव बाधकम् ॥ २८ ॥

तथापि ये न तुष्यन्ति भगवद्भुक्तिलज्जया ।
सदाशिवं भजन्तां ते नृदेहादपि लज्जया ॥ २९ ॥

दोषं वृथा पृथक्कृत्य भवोपग्राहिकर्मजम् ।
बध्नन्ति पातकान्याप्तं दूषयन्तः कदाग्रहात् ॥ ३० ॥

कलङ्कैः कल्पितैर्दुष्टैः स्वामी नो नैव दूष्यते ।
चौराद्युत्क्षिप्तधूलीभिः स्पृश्यते नैव भानुमान् ॥ ३१ ॥

परमानन्दितैरित्थं दिगम्बरविनिग्रहात् ।
प्राप्तं सिताम्बरैः शोभां जैनं जयति शासनम् ॥ ३२ ॥

# मुक्तिद्वात्रिंशिका ॥ ३१ ॥

दुःखध्वंसः परो मुक्तिर्मानं दुःखत्वमत्र च ।
आत्मकालान्यगध्वंसप्रतियोगिन्यवृत्तिमत् ॥ १ ॥

सत्कार्यमात्रवृत्तित्वात् प्रागभावोऽसुखस्य यः ।
तदनाधारगध्वंसप्रतियोगिनि वृत्तिमत् ॥ २ ॥

दीपत्ववदिति प्राहुस्तार्किकास्तदसंगतम् ।
बाधाद्वृत्तिविशेषेष्टावन्यथार्थान्तराव्ययात् ॥ ३ ॥

विपक्षबाधकाभावादनभिप्रेतसिद्धितः ।
अन्तरैतदयोग्यत्वाशङ्का योगापहेति चेत् ॥ ४ ॥

नैवं शमादिसंपत्त्या स्वयोग्यत्वविनिश्चयात् ।
न चान्योऽन्याश्रयस्तस्याः संभवात् पूर्वसेवया ॥ ५ ॥

शमाद्युपहिता हन्त योग्यतैव विभिद्यते ।
तदवच्छेदकत्वेन संकोचस्तेन तस्य न ॥ ६ ॥

संसारित्वेन गुरुणा शमादौ च न हेतुता ।
भव्यत्वेनैव किं त्वेषेत्येतदन्यत्र दर्शितम् ॥ ७ ॥

परमात्मनि जीवात्मलयः सेति त्रिदण्डिनः ।
लयो लिङ्गव्ययोऽत्रेष्टो जीवनाशश्च नेष्यते ॥ ८ ॥

बौद्धास्त्वालयविज्ञानसन्ततिः सेत्यकीर्तयन् ।
विनान्वयिनमाधारं तेषामेषा कदर्थना ॥ ९ ॥

विवर्तमानज्ञेयार्थापेक्षायां सति चाश्रये ।
अस्यां विजयतेऽस्माकं पर्यायनयदेशना ॥ १० ॥

स्वातन्त्र्यं मुक्तिरित्यन्ये प्रभुता तन्मदः क्षयी ।
अथ कर्मनिर्वृत्तिश्चेत् सिद्धान्तोऽस्माकमेव सः ॥ ११ ॥

पुंसः स्वरूपावस्थानं सेति सांख्याः प्रचक्षते ।
तेषामेतदसाध्यत्वं वज्रलेपोऽस्ति दूषणम् ॥ १२ ॥

पूर्वचित्तनिवृत्तिः साग्रिमानुत्पादसंगता ।
इत्यन्ये श्रयते तेषामनुत्पादो न साध्यताम् ॥ १३ ॥

सात्महानमिति प्राह चार्वाकस्तत्तु पाप्मने ।
तस्य हातुमशक्यत्वात्तदनुद्देशतस्तथा ॥ १४ ॥

नित्योत्कृष्टसुखव्यक्तिरिति तौतातिता जगुः ।
नित्यत्वं चेदनन्तत्वमत्र तत्संमतं हि नः ॥ १५ ॥

अथानादित्वमेतच्चेत्तथाप्येष नयोऽस्तु नः ।
सर्वथोपगमे च स्यात्सर्वदा तदुपस्थितिः ॥ १६ ॥

वेदान्तिनस्त्वविद्यायां निवृत्तायां विविक्तता ।
सेत्याह सापि नो तेषामसाध्यत्वादवस्थितेः ॥ १७ ॥

कृत्स्नकर्मक्षयो मुक्तिरित्येष तु विपश्चिताम् ।
स्याद्वादामृतपानस्योद्गारः स्फारनयाश्रयः ॥ १८ ॥

ऋजुसूत्रादिभिर्ज्ञानसुखादिकपरम्परा ।
व्यङ्ग्यमावरणोच्छित्त्या सङ्ग्रहेणेष्यते सुखम् ॥ १९ ॥

क्षयः प्रयत्नसाध्यस्तु व्यवहारेण कर्मणाम् ।
न चैवमपुमर्थत्वं द्वेषयोनिप्रवृत्तितः ॥ २० ॥

दुःखद्वेषे हि तद्धेतून् द्वेष्टि प्राणी नियोगतः ।
जायतेऽस्य प्रवृत्तिश्च ततस्तन्नाशहेतुषु ॥ २१ ॥

अन्यत्राप्यसुखं मा भून्माङोऽर्थेऽत्रान्वयः स्थितः ।
दुःखस्यैवं समाश्रित्य स्वहेतुप्रतियोगिताम् ॥ २२ ॥

स्वतोऽपुमर्थताप्येवमिति चेत् कर्मणामपि ।
शक्त्या चेन्मुख्यदुःखत्वं स्याद्वादे किं नु बाध्यताम् ॥ २३ ॥

स्वतः प्रवृत्तिसाम्राज्यं किं चाखण्डसुखेच्छया ।
निराबाधं च वैराग्यमसङ्गे तदुपक्षयात् ॥ २४ ॥

समानायव्ययत्वे च वृथा मुक्तौ परिश्रमः ।
गुणहानेरनिष्टत्वात्ततः सुष्ठूच्यते ह्यदः ॥ २५ ॥

दुःखाभावोऽपि नावेद्यः पुरुषार्थतयेष्यते ।
न हि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः ॥ २६ ॥

एतेनैतदपास्तं हि पुमर्थत्वेऽप्रयोजकम् ।
तज्ज्ञानं दुःखनाशश्च वर्तमानोऽनुभूयते ॥ २७ ॥

गुणहानेरनिष्टत्वं वैराग्यान्नाथ वेद्यते ।
इच्छाद्वेषौ विना नैवं प्रवृत्तिः सुखदुःखयोः ॥ २८ ॥

अशरीरं वा वसन्तमित्यादिश्रुतितः पुनः ।
सिद्धो हन्त्युभयाभावो नैकसत्तां यतः स्मृतम् ॥ २९ ॥

सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम् ।
तं वै मोक्षं विजानीयाद्दुष्प्रापमकृतात्मभिः ॥ ३० ॥

उपचारोऽत्र नाबाधात् साक्षिणी चात्र दृश्यते ।
नित्यं विज्ञानमानन्दं ब्रह्मेत्यप्यपरा श्रुतिः ॥ ३१ ॥

परमानं दलयतां परमानं दयावताम् ।
परमानन्दपीनाः स्मः परमानन्दचर्चया ॥ ३२ ॥

## सज्जनस्तुतिद्वात्रिंशिका ॥ ३२ ॥

नाम सज्जन इति त्रिवर्णकं, कर्णकोटरकुटुम्बि चेद्भवेत् ।
नोल्लसन्ति विषशक्तयस्तदा, दिव्यमन्त्रनिहताः खलोक्तयः ॥ १ ॥

स्याद्बली बलमिह प्रदर्शयेत्, सज्जनेषु यदि सत्सु दुर्जनः ।
किं बलं नु तमसोऽपि वर्ण्यते, यद्भवेदसति भानुमालिनि ॥ २ ॥

दुर्जनस्य रसना सनातनीं, सङ्गतिं न परुषस्य मुञ्चति ।
सज्जनस्य तु सुधातिशायिनः, कोमलस्य वचनस्य केवलम् ॥ ३ ॥

या द्विजिह्वदलना घनादराद्यात्मनीह पुरुषोत्तमस्थितिः ।
याप्यनन्तगतिरेतयेष्यते, सज्जनस्य गरुडानुकारिता ॥ ४ ॥

सज्जनस्य विदुषां गुणग्रहे, दूषणे निविशते खलस्य धीः ।
चक्रवाकदृगहर्पतेर्द्युतौ, घूकदृक् तमसि सङ्गमङ्गति ॥ ५ ॥

दुर्जनैरिह सतामुपक्रिया, तद्वचोविजयकीर्तिसंभवात् ।
व्यातनोति जिततापविप्लवां, वह्निरेव हि सुवर्णशुद्धताम् ॥ ६ ॥

याकलङ्किवसतेन सक्षया, या कदापि न भुजङ्गसङ्गता ।
गोत्रभित्सदसि या न सा सतां, वाचि काचिदतिरिच्यते सुधा ॥ ७ ॥

दुर्जनोद्यमतपर्तुपूर्तिजात्तापतः श्रुतलता क्षयं व्रजेत् ।
नो भवेद्यदि गुणाम्बुवर्षिणी, तत्र सज्जनकृपा तपात्ययः (या) ॥ ८ ॥

तन्यते सुकविकीर्ति वारिधौ दुर्जनेन वडवानलव्यथा ।
सज्जनेन तु शशाङ्ककौमुदी सङ्गरङ्गवदहो महोत्सवः ॥ ९ ॥

यद्यनुग्रहपरं सतां मनो दुर्जनात् किमपि नो भयं तदा ।
सिंह एव तरसा वशीकृते किं भयं भुवि श्रृगालबालकात् ॥ १० ॥

खेदमेव तनुते जडात्मनां सज्जनस्य तु मुदं कवेः कृतिः ।
स्मेरता कुवलयेऽपीडनं(ऽबुजे व्यथा)चन्द्रभासि भवतीति हि स्थितिः ॥ ११ ॥

न त्यजन्ति कवयः श्रुतश्रमं संमुदैव खलपीडनादपि ।
स्वोचिताचरणबद्धवृत्तयः साधवः शमदमक्रियामिव ॥ १२ ॥

नव्यतन्त्ररचनं सतां रतेस्त्यज्यते न खलखेदतो बुधैः ।
नैव भारभयतो विमुच्यते शीतरक्षणपटीयसी पटी ॥ १३ ॥

आगमे सति नवः श्रमो मदान्न स्थितेरिति खलेन दूष्यते ।
नौरिवेह जलधौ प्रवेशकृत् सोऽयमित्यथ सतां स्फुत्तरम् ॥ १४ ॥

पूर्वपूर्वतनसूरिहीलना नो तथापि निहतेति दुर्जनः ।
तातवागनुविधायिबालवन्नेयमित्यथ सतां सुभाषितम् ॥ १५ ॥

किं तथापि पलिमन्थमन्थरैरत्र साध्यमिति दुर्जनोदिते ।
स्वान्ययोरुपकृतिर्नवा मतिश्चेति सज्जननयोक्तिरर्गला ॥ १६ ॥

सप्रसङ्गमिदमाद्यविंशिकोपक्रमे मतिमतोपवा(पा)दितम् ।
चारुतां व्रजति सज्जनस्थितिर्नाक्षतासु नियतं खलोक्तिषु ॥ १७ ॥

न्यायतन्त्रशतपत्रभानवे लोकलोचनसुधाञ्जनत्विषे ।
पापशैलशतकोटिमूर्त्तये सज्जनाय सततं नमोनमः ॥ १८ ॥

भूषिते बहुगुणे तपागणे श्रीयुतैर्विजयदेवसूरिभिः ।
भूरिसूरितिलकैरपि श्रिया पूरितैर्विजयसिंहसूरिभिः ॥ १९ ॥

धाम भास्वदधिकं निरामयं रामणीयकमपि प्रसृत्वरम् ।
नाम कामकलशातिशायिनामिष्टपूर्तिषु यदीयमञ्चति ॥ २० ॥

यैरुपेत्य विदुषां सतीर्थ्यतां स्फीतजीतविजयाभिधावताम् ।
धर्मकर्म विदधे जयन्ति ते श्रीनयादिविजयाभिधा बुधाः ॥ २१ ॥

उद्यतैरहमपि प्रसद्य तैस्तर्कतन्त्रमधिकाशि पाठितः ।
एष तेषु धुरि लेख्यतां ययौ सद्गुणस्तु जगतां सतामपि ॥ २२ ॥

येषु येषु तदनुस्मृतिर्भवेत्तेषु धावति च दर्शनेषु धीः ।
यत्र यत्र मरुदेति लभ्यते तत्र तत्र खलु पुष्पसौरभम् ॥ २३ ॥

तद्गुणैर्मुकुलितं रवेः करैः शास्त्रपद्ममिह मन्मनोह्रदात् ।
उल्लसन्नयपरागसङ्गतं सेव्यते सुजनषट्पदव्रजैः ॥ २४ ॥

निर्गुणो बहुगुणैर्विराजितांस्तान् गुरूनुपकरोमि कैर्गुणैः ।
वारिदस्य ददतो हि जीवनं किं ददातु बत चातकार्भकः ॥ २५ ॥

प्रस्तुतश्रमसमर्थितैर्नयैर्योग्यदानफलितैस्तु तद्यशः ।
यत्प्रसर्पति सतामनुग्रहादेतदेव मम चेतसो मुदे ॥ २६ ॥

आसते जगति सज्जनाः शतं तैरुपैमि नु समं कमञ्जसा।
किं न सन्ति गिरयः परःशता मेरुरेव तु बिभर्तु मेदिनीम् ॥ २७ ॥

तत्पदाम्बुरुहषट्पदः स च ग्रन्थमेनमपि मुग्धधीर्व्यधाम्।
यस्य भाग्यनिलयोऽजनि श्रियां सद्म पद्मविजयः सहोदरः ॥ २८ ॥

मत्त एव मृदुबुद्धयश्च ये तेष्वतोऽप्युपकृतिश्च भाविनी।
किं च बालवचनानुभाषणानुस्मृतिः परमबोधशालिनाम् ॥ २९ ॥

अत्र पद्यमपि पाङ्क्तिकं क्वचिद्वर्तते च परिवर्तितं क्वचित्।
स्वान्ययोः स्मरणमात्रमुद्दिशंस्तत्र नैष तु जनोऽपराध्यति ॥ ३० ॥

ख्यातिमेष्यति परामयं पुनः सज्जनैरनुगृहीत एव च।
किं न शंकरशिरोनिवासतो निम्नगा सुविदिता सुरापगा ॥ ३१ ॥

यत्र स्याद्वादविद्या परमततिमिरध्वान्तसूर्यांशुधारा
निस्ताराज्जन्मसिन्धोः शिवपदपदवीं प्राणिनो यान्ति यस्मात्।
अस्माकं किं च यस्माद्भवति शमरसैर्नित्यमाकण्ठतृप्ति
जैनेन्द्रं शासनं तद्विलसति परमानन्दकन्दाम्बुवाहः ॥ ३२ ॥

# ॥ समाधिसाम्यद्वात्रिंशिका ॥

समुद्धतं पारगतागमाब्धेः, समाधिपीयूषमिदं निशम्य ।
महाशयाः ! पीतमनादिकालात्कषाय-हालाहलमुद्वमन्तु ॥ १ ॥

विना समाधिं परिशीलितेन, क्रियाकलापेन न कर्मभङ्गः ।
शक्तिं विना किं समुपाश्रितेन, दुर्गेण राज्ञां द्विषतां जयः स्यात् ॥ २ ॥

अन्तः समाधेः सुखमाकलय्य, बाह्ये सुखे नो रतिमेति योगी ।
अटेदटव्यां क इवार्थलुब्धो, गृहे समुत्सर्पति कल्पवृक्षे ॥ ३ ॥

इतस्ततो भ्राम्यति चित्तपक्षी, वितत्य यो रत्यरती स्वपक्षौ ।
स्वच्छन्दता-वारणहेतुरस्य, समाधिसत्पञ्जरयन्त्रणैव ॥ ४ ॥

असह्यया वेदनयाऽपि धीरा, रुजन्ति नात्यन्तसमाधिशुद्धाः ।
कल्पान्त कालाग्निमहार्चिषाऽपि, नैव द्रवीभावमुपैति मेरुः ॥ ५ ॥

ज्ञानी तपस्वी परमक्रियावान्, सम्यक्त्ववानप्युपशान्तिशून्यः ।
प्राप्नोति तं नैव गुणं कदापि, समाहितात्मा लभते शमी यत् ६

नूनं परोक्षं सुखसद्मसौख्यं, मोक्षस्य चात्यन्तपरोक्षमेव ।
प्रत्यक्षमेकं समतासुखं तु, समाधिसिद्धानुभवोदयानाम् ॥ ७ ॥

प्राणप्रियप्रेमसुखं न भोगास्वादं विना वेत्ति यथा कुमारी ।
समाधियोगानुभवं विनैव, न वेत्ति लोकः शमशर्म साधोः ॥ ८ ॥

न दोषदर्शिष्वपि रोषपोषो, गुणस्तुतावप्यवलिप्तता नो ।
न दम्भसंरम्भविधेर्लवोऽपि, न लोभसंक्षोभजविप्लवोऽपि ॥ ९ ॥

लाभेऽप्यलाभेऽपि सुखे च दुःखे, ये जीवितव्ये मरणे च तुल्याः ।
रत्याप्यरत्यापि निरस्तभावाः, समाधिसिद्धा मुनयस्त एव ॥ १० ॥

उग्रे विहारे च सुदुष्करायां, भिक्षाविशुद्धौ च तपस्यसह्ये ।
समाधिलाभ-व्यवसायहेतोः, क्व वैमनस्यं मुनिपुङ्गवानाम् ॥ ११ ॥

इष्टप्रणाशेऽप्यनभीष्टलाभे, नित्यस्वभावं नियतिञ्च जानन् ।
सन्तापमन्तर्न समाधिवृष्टिविध्यातशोकाग्निरुपैति साधुः ॥ १२ ॥

भीरुर्यथा प्रागपि युद्धकालाद्, गवेषयत्यद्रि-लता-वनादि ।
क्लीबास्तथाऽध्यात्मविषादभावा समाहिताच्छन्नपदेक्षिणः स्युः १३ ॥

रणाङ्गणे शूरपरम्परास्तु, पश्यन्ति पृष्ठं नहि मृत्युभीताः ।
समाहिताः प्रव्रजितास्तथैव, वाञ्छन्ति नोत्प्रव्रजितुं कदाचित् १४

न मूत्रविष्ठापिटरीषु रागं, बध्नन्ति कान्तासु समाधिशान्ताः ।
अनङ्गकीटालयतत्प्रसङ्गमब्रह्मदौर्गन्ध्यभयास्त्यजन्ति ॥ १५ ॥

रम्यं सुखं यद्विषयोपनीतं, नरेन्द्रचक्रित्रिदशाधिपानाम् ।
समाहितास्तज्ज्वलदिन्द्रियाग्नि-ज्वालाघृताहुत्युपमं विदन्ति ॥ १६ ॥

स्त्रैणे तृणे ग्राव्णि च काञ्चने चं, भवे च मोक्षे समतां श्रयन्तः ।
[तां निर्वृत्तिं काञ्चन वक्ष्यमाणां], समाधिभाजः सुखिता भवन्ति

जना मुदं यान्ति समाधिसाम्य-जुषां मुनीनां सुखमेव दृष्ट्वा ।
चन्द्रेक्षणादेव चकोरबालाः, पीतामृतोद्गारपरा भवन्ति ॥ १८ ॥

अपेक्षिताऽन्तःप्रतिपक्षपक्षं, कर्माणि बद्धान्यपि कर्मलक्षैः ।
प्रभा तमांसीव रवेः क्षणेन, समाधि-सिद्धा समता क्षिणोति १९

संसारिणो नैव निजं स्वरूपं, पश्यन्ति मोहावृतबोधनेत्राः ।
समाधिसिद्धा समतैव तेषां, दिव्यौषधं दोषहरं प्रसिद्धम् ॥ २० ॥

बबन्ध पापं नरकेषु वेद्यं, प्रसन्नचन्द्रो मनसाऽ प्रशान्तः ।
तत्कालमेव प्रशमे तु लब्धे, समाधिभृत् केवलमाससाद ॥ २१ ॥

षट्खण्डसाम्राज्यभुजोऽपि वश्या, यत्केवलश्रीर्भरतस्य जज्ञे ।
न याति पारं वचसोऽनुपाधिसमाधिसाम्यस्य विजृम्भितं तत् २२

अप्राप्तधर्माऽपि पुरादिमार्हन्माता शिवं यद्भगवत्यवाप ।
समाधिसिद्धा समतैव हेतुस्तत्रापि बाह्यस्तु न कोऽपि योगः २३

स्त्रीभ्रूणगोब्राह्मणघातजातपापादधःपातकृताऽऽभिमुख्याः ।
दृढप्रहारिप्रमुखाः समाधिसाम्यावलम्बाः पदमुच्चमापुः ॥ २४ ॥

निरञ्जनाः शङ्खवदाश्रयन्तोऽस्खलद्गतित्वं भुवि जीववच्च ।
वियद्वदालम्बनविप्रमुक्ताः, समीरवच्च प्रतिबन्धशून्याः ॥ २५ ॥

शरत्सरोनीरविशुद्धचित्ता, लेपोज्झिताः पुष्करपत्रवच्च ।
गुप्तेन्द्रियाः कूर्मवदेकभावमुपागताः खड्गिविषाणवच्च ॥ २६ ॥

सदा विहङ्गा इव विप्रमुक्ता, भारण्डपक्षीन्द्रवदप्रमत्ताः ।
शौण्डीर्यभाजो गजवच्च जातस्थामप्रकर्षा वृषभा इवोच्चैः॥ २७ ॥

दुर्द्धर्षतां सिंहवदब्धिवच्च, गम्भीरतां मन्दरवत् स्थिरत्वम् ।
प्राप्ताः सितांशूज्ज्वलसौम्यलेश्याः, सूर्या इवात्यद्भुतदीप्तिमन्तः २८

सुजातरूपास्तपनीयवच्च, भारक्षमा एव वसुन्धरावत् ।
ज्वलत्त्विषो वह्निवदुल्लसन्ति, समाधिसाम्योपगता मुनीन्द्राः॥ २९ ॥

गजाश्च-सिंहा गरुडाश्च नागा, व्याघ्राश्च गावश्च सुरासुराश्च ।
तिष्ठन्ति पार्श्वे मिलिताः समाधिसाम्यस्पृशामुज्झितनित्यवैराः ॥ ३० ॥

समाधिसाम्यक्रमतो हि योगक्रियाफलावञ्चकलाभभाजः ।
आसादितात्यद्भुतयोगदृष्टि-स्फुरच्चिदानन्दसमृद्धयः स्युः ॥ ३१ ॥

यो यो भावो जनयति मुदं वीक्ष्यमाणोऽतिरम्यो,
बाह्यस्तं तं घटयति सुधीरन्तरङ्गोपमानैः ।
मग्नस्येत्थं परमसमता-क्षीरसिन्धौ यतीन्दोः,
कण्ठाऽऽश्लेषं प्रणयति महोत्कण्ठया द्राग् यशःश्रीः ॥ ३२ ॥

# ॥ ज्ञानसारः ॥

## १ पूर्णताऽष्टकम्

ऐन्द्रश्रीसुखमग्नेन, लीलालग्नमिवाखिलम् ।
सच्चिदानन्दपूर्णेन, पूर्णं जगदवेक्ष्यते ॥ १ ॥

पूर्णता या परोपाधेः, सा याचितकमण्डनम् ।
या तु स्वाभाविकी सैव, ज्ञात्यरत्नविभानिभा ॥ २ ॥

अवास्तवी विकल्पैः स्यात्, पूर्णताऽब्धेरिवोर्मिभिः ।
पूर्णानन्दस्तु भगवान्, स्तिमितोदधिसन्निभः ॥ ३ ॥

जागर्ति ज्ञानदृष्टिश्चेत्, तृष्णाकृष्णाहिजाङ्गुली ।
पूर्णानन्दस्य तत्किं स्याद्, दैन्यवृश्चिकवेदना ॥ ४ ॥

पूर्यन्ते येन कृपणा-स्तदुपेक्षैव पूर्णता ।
पूर्णानन्दसुधास्निग्धा, दृष्टिरेषा मनीषिणाम् ॥ ५ ॥

अपूर्णः पूर्णतामेति, पूर्यमाणस्तु हीयते ।
पूर्णानन्दस्वभावोऽयं, जगदद्भुतदायकः ॥ ६ ॥

परस्वत्वकृतोन्माथा, भूनाथा न्यूनतेक्षिणः ।
स्वस्वत्वसुखपूर्णस्य, न्यूनता न हरेरपि ॥ ७ ॥

कृष्णे पक्षे परिक्षीणे, शुक्ले च समुदञ्चति ।
द्योतन्ते सकलाध्यक्षाः, पूर्णानन्दविधोः कलाः ॥ ८ ॥

## २ मग्नताऽष्टकम्

प्रत्याहृत्येन्द्रियव्यूहं, समाधाय मनो निजम् ।
दधच्चिन्मात्रविश्रान्तिं, मग्न इत्यभिधीयते ॥ १ ॥

यस्य ज्ञानसुधासिन्धौ, परब्रह्मणि मग्नता ।
विषयान्तरसञ्चार-स्तस्य हालाहलोपमः ॥ २ ॥

स्वभावसुखमग्नस्य, जगत्तत्त्वावलोकिनः ।
कर्तृत्वं नान्यभावानां, साक्षित्वमवशिष्यते ॥ ३ ॥

परब्रह्मणि मग्नस्य, श्लथा पौद्‌गलिकी कथा ।
क्वामी चामीकरोन्मादाः, स्फारा दारादरा क्व च ॥ ४ ॥

तेजोलेश्याविवृद्धिर्या, साधोः पर्यायवृद्धितः ।
भाषिता भगवत्यादौ, सेत्थम्भूतस्य युज्यते ॥ ५ ॥

ज्ञानमग्नस्य यच्छर्म, तद्वक्तुं नैव शक्यते ।
नोपमेयं प्रियाश्लेषै-र्नापि तच्चन्दनद्रवैः ॥ ६ ॥

शमशैत्यपुषो यस्य, विप्रुषोऽपि महाकथा ।
किं स्तुमो ज्ञानपीयूषे, तत्र सर्वाङ्गमग्नताम् ॥ ७ ॥

यस्य दृष्टिः कृपावृष्टि र्गिरः शमसुधाकिरः ।
तस्मै नमः शुभज्ञान-ध्यानमग्नाय योगिने ॥ ८ ॥

## ३ स्थिरताऽष्टकम्

वत्स ! किं चञ्चलस्वान्तो, भ्रान्त्वा भ्रान्त्वा विषीदसि ।
निधिं स्वसन्निधावेव, स्थिरता दर्शयिष्यति ॥ १ ॥

ज्ञानदुग्धं विनश्येत, लोभविक्षोभकूर्चकैः ।
अम्लद्रव्यादिवाऽस्थैर्या-दिति मत्वा स्थिरो भव ॥ २ ॥

अस्थिरे हृदये चित्रा, वाङ्‌नेत्राऽऽकारगोपना ।
पुंश्चल्या इव कल्याण-कारिणी न प्रकीर्त्तिता ॥ ३ ॥

अन्तर्गतं महाशल्य-मस्थैर्यं यदि नोद्‌धृतम् ।
क्रियौषधस्य को दोष-स्तदा गुणमयच्छतः ॥ ४ ॥

स्थिरता वाङ्‌मनःकायै-र्येषामङ्गाङ्गितां गता ।
योगिनः समशीलास्ते, ग्रामेऽरण्ये दिवा निशि ॥ ५ ॥

स्थैर्यरत्नप्रदीपश्चे-द्दीप्रः सङ्कल्पदीपजैः ।
तद्विकल्पैरलं धूमै-रलंधूमैस्तथाऽऽश्रवैः ॥ ६ ॥

उदीरयिष्यसि स्वान्ता-दस्थैर्यं पवनं यदि ।
समाधेर्धर्ममेघस्य, घटां विघटयिष्यसि ॥ ७ ॥

चारित्रं स्थिरतारूप-मतः सिद्धेष्वपीष्यते ।
यतन्तां यतयोऽवश्य-मस्या एव प्रसिद्धये ॥ ८ ॥

## ४ मोहत्यागाऽष्टकम्

अहं ममेति मन्त्रोऽयं, मोहस्य जगदान्ध्यकृत् ।
अयमेव हि नञ्पूर्वः, प्रतिमन्त्रोऽपि मोहजित् ॥ १ ॥

शुद्धात्मद्रव्यमेवाऽहं, शुद्धज्ञानं गुणो मम ।
नान्योऽहं न ममान्ये चे-त्यदो मोहास्त्रमुल्बणम् ॥ २ ॥

यो न मुह्यति लग्नेषु, भावेष्वौदयिकादिषु ।
आकाशमिव पङ्केन, नाऽसौ पापेन लिप्यते ॥ ३ ॥

पश्यन्नेव परद्रव्य-नाटकं प्रतिपाटकम् ।
भवचक्रपुरस्थोऽपि, नाऽमूढः परिखिद्यते ॥ ४ ॥

विकल्पचषकैरात्मा, पीतमोहाऽऽसवो ह्ययम् ।
भवोच्चतालमुत्ताल-प्रपञ्चमधितिष्ठति ॥ ५ ॥

निर्मलं स्फटिकस्येव, सहजं रूपमात्मनः ।
अध्यस्तोपाधिसम्बन्धो, जडस्तत्र विमुह्यति ॥ ६ ॥

अनारोपसुखं मोह-त्यागादनुभवन्नपि ।
आरोपप्रियलोकेषु, वक्तुमाश्चर्यवान् भवेत् ॥ ७ ॥

यश्चिद्दर्पणविन्यस्त-समस्ताऽऽचारचारुधीः ।
क्व नाम स परद्रव्ये-ऽनुपयोगिनि मुह्यति ? ॥ ८ ॥

## ५ ज्ञानाऽष्टकम्

मज्जत्यज्ञः किलाऽज्ञाने, विष्ठायामिव शूकरः ।
ज्ञानी निमज्जति ज्ञाने, मराल इव मानसे ॥ १ ॥

निर्वाणपदमप्येकं, भाव्यते यन्मुहुर्मुहुः ।
तदेव ज्ञानमुत्कृष्टं, निर्बन्धो नास्ति भूयसा ॥ २ ॥

स्वभावलाभसंस्कार-कारणं ज्ञानमिष्यते ।
ध्यान्ध्यमात्रमतस्त्वन्यत्, तथा चोक्तं महात्मना ॥ ३ ॥

वादांश्च प्रतिवादांश्च, वदन्तोऽनिश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति, तिलपीलकवद् गतौ ॥ ४ ॥

स्वद्रव्यगुणपर्याय-चर्या वर्या पराऽन्यथा ।
इति दत्तात्मसन्तुष्टि-र्मुष्टिज्ञानस्थितिर्मुनेः ॥ ५ ॥

अस्ति चेद् ग्रन्थिभिज्ज्ञानं, किं चित्रैस्तन्त्रयन्त्रणैः ।
प्रदीपाः क्वोपयुज्यन्ते, तमोघ्नी दृष्टिरेव चेत् ? ॥ ६ ॥

मिथ्यात्वशैलपक्षच्छिज्ज्ञानदम्भोलिशोभितः ।
निर्भयः शक्रवद्योगी, नन्दत्यानन्दनन्दने ॥ ७ ॥

पीयूषमसमुद्रोत्थं, रसायनमनौषधम् ।
अनन्याऽपेक्षमैश्वर्यं, ज्ञानमाहुर्मनीषिणः ॥ ८ ॥

## ६ शमाऽष्टकम्

विकल्पविषयोत्तीर्णः, स्वभावाऽऽलम्बनः सदा ।
ज्ञानस्य परिपाको यः, स शमः परिकीर्तितः ॥ १ ॥

अनिच्छन् कर्मवैषम्यं, ब्रह्मांशेन समं जगत् ।
आत्माऽभेदेन यः पश्ये-दसौ मोक्षंगमी शमी ॥ २ ॥

आरुरुक्षुर्मुनिर्योगं, श्रयेद् बाह्यक्रियामपि ।
योगारूढः शमादेव, शुद्ध्यत्यन्तर्गतक्रियः ॥ ३ ॥

ध्यानवृष्टेर्दयानद्याः, शमपूरे प्रसर्पति ।
विकारतीरवृक्षाणां, मूलादुन्मूलनं भवेत् ॥ ४ ॥

ज्ञानध्यानतपःशील-सम्यक्त्वसहितोऽप्यहो ।
तं नाप्नोति गुणं साधुर्यं प्राप्नोति शमाऽन्वितः ॥ ५ ॥

स्वयम्भूरमणस्पर्द्धि-वर्द्धिष्णुसमतारसः ।
मुनिर्येनोपमीयेत, कोऽपि नाऽसौ चराचरे ॥ ६ ॥

शमसूक्तसुधासिक्तं, येषां नक्तंदिनं मनः ।
कदापि ते न दह्यन्ते, रागोरगविषोर्मिभिः ॥ ७ ॥

गर्जज्ज्ञानगजोत्तुङ्गा, रङ्गद्ध्यानतुरङ्गमाः ।
जयन्ति मुनिराजस्य, शमसाम्राज्यसम्पदः ॥ ८ ॥

## ७ इन्द्रियजयाऽष्टकम्

बिभेषि यदि संसारान्मोक्षप्राप्तिं च काङ्क्षसि ।
तदेन्द्रियजयं कर्तुं, स्फोरय स्फारपौरुषम् ॥ १ ॥

वृद्धास्तृष्णाजलाऽपूर्णैरालवालैः किलेन्द्रियैः ।
मूर्छामतुच्छां यच्छन्ति, विकारविषपादपाः ॥ २ ॥

सरित्सहस्रदुष्पूरसमुद्रोदरसोदरः ।
तृप्तिमान्नेन्द्रियग्रामो, भव तृप्तोऽन्तरात्मना ॥ ३ ॥

आत्मानं विषयैः पाशैर्भववासपराङ्मुखम् ।
इन्द्रियाणि निबध्नन्ति, मोहराजस्य किङ्कराः ॥ ४ ॥

गिरिमृत्स्नां धनं पश्यन्, धावतीन्द्रियमोहितः ।
अनादिनिधनं ज्ञानं, धनं पार्श्वे न पश्यति ॥ ५ ॥

पुरः पुरः स्फुरत्तृष्णामृगतृष्णाऽनुकारिषु ।
इन्द्रियार्थेषु धावन्ति, त्यक्त्वा ज्ञानाऽमृतं जडाः ॥ ६ ॥

पतङ्गभृङ्गमीनेभसारङ्गा यान्ति दुर्दशाम् ।
एकैकेन्द्रियदोषाच्चेद्, दुष्टैस्तैः किं न पञ्चभिः ॥ ७ ॥

विवेकद्विपहर्यक्षैः, समाधिधनतस्करैः ।
इन्द्रियैर्न जितो योऽसौ, धीराणां धुरि गण्यते ॥ ८ ॥

## ८ त्यागाऽष्टकम्

संयताऽऽत्मा श्रये शुद्धोपयोगं पितरं निजम् ।
धृतिमम्बाञ्च पितरौ, तन्मां विसृजतं ध्रुवम् ॥ १ ॥

युष्माकं सङ्गमोऽनादिर्बन्धवोऽनियतात्मनाम् ।
ध्रुवैकरूपान् शीलादिबन्धूनित्यधुना श्रये ॥ २ ॥

कान्ता मे समतैवैका, ज्ञातयो मे समक्रियाः ।
बाह्यवर्गमिति त्यक्त्वा, धर्मसन्न्यासवान् भवेत् ॥ ३ ॥

धर्मास्त्याज्याः सुसङ्गोत्थाः, क्षायोपशमिका अपि ।
प्राप्य चन्दनगन्धाभं, धर्मसन्न्यासमुत्तमम् ॥ ४ ॥

गुरुत्वं स्वस्य नोदेति, शिक्षासात्म्येन यावता ।
आत्मतत्त्वप्रकाशेन, तावत् सेव्यो गुरूत्तमः ॥ ५ ॥

ज्ञानाऽऽचारादयोऽपीष्टाः, शुद्धस्वस्वपदावधि ।
निर्विकल्पे पुनस्त्यागे, न विकल्पो न वा क्रिया ॥ ६ ॥

योगसन्न्यासतस्त्यागी, योगानप्यखिलांस्त्यजेत् ।
इत्येवं निर्गुणं ब्रह्म, परोक्तमुपपद्यते ॥ ७ ॥

वस्तुतस्तु गुणैः पूर्णमनन्तैर्भासते स्वतः ।
रूपं त्यक्तात्मनः साधोर्निरभ्रस्य विधोरिव ॥ ८ ॥

## ९ क्रियाऽष्टकम्

ज्ञानी क्रियापरः शान्तो, भावितात्मा जितेन्द्रियः ।
स्वयं तीर्णो भवाम्भोधेः, परांस्तारयितुं क्षमः ॥ १ ॥

क्रियाविरहितं हन्त, ज्ञानमात्रमनर्थकम् ।
गतिं विना पथज्ञोऽपि, नाप्नोति पुरमीप्सितम् ॥ २ ॥

स्वानुकूलां क्रियां काले, ज्ञानपूर्णोऽप्यपेक्षते ।
प्रदीपः स्वप्रकाशोऽपि तैलपूर्त्यादिकं यथा ॥ ३ ॥

बाह्यभावं पुरस्कृत्य, ये क्रियां व्यवहारतः ।
वदने कवलक्षेपं, विना ते तृप्तिकाङ्क्षिणः ॥ ४ ॥

गुणवद्बहुमानादे-र्नित्यस्मृत्या च सत्क्रिया ।
जातं न पातयेद्भावमजातं जनयेदपि ॥ ५ ॥

क्षायोपशमिके भावे, या क्रिया क्रियते तया ।
पतितस्यापि तद्भावप्रवृद्धिर्जायते पुनः ॥ ६ ॥

गुणवृद्ध्यै ततः कुर्यात्, क्रियामस्खलनाय वा ।
एकं तु संयमस्थानं, जिनानामवतिष्ठते ॥ ७ ॥

वचोऽनुष्ठानतोऽसङ्गक्रिया सङ्गतिमङ्गति ।
सेयं ज्ञानक्रियाभेदभूमिरानन्दपिच्छला ॥ ८ ॥

## १० तृप्त्यष्टकम्

पीत्वा ज्ञानाऽमृतं भुक्त्वा, क्रियासुरलताफलम् ।
साम्यताम्बूलमास्वाद्य, तृप्तिं याति परां मुनिः ॥ १ ॥

स्वगुणैरेव तृप्तिश्चेदाकालमविनश्वरी ।
ज्ञानिनो विषयैः किं तैर्यैर्भवेत् तृप्तिरित्वरी ॥ २ ॥

या शान्तैकरसास्वादाद्भवेत् तृप्तिरतीन्द्रिया ।
सा न जिह्वेन्द्रियद्वारा, षड्रसास्वादनादपि ॥ ३ ॥

संसारे स्वप्नवन्मिथ्या, तृप्तिः स्यादाभिमानिकी ।
तथ्या तु भ्रान्तिशून्यस्य, सात्मवीर्यविपाककृत् ॥ ४ ॥

पुद्गलैः पुद्गलास्तृप्तिं, यान्त्यात्मा पुनरात्मना ।
परतृप्तिसमारोपो, ज्ञानिनस्तन्न युज्यते ॥ ५ ॥

मधुराज्यमहाशाकाऽग्राह्ये बाह्ये च गोरसात् ।
परब्रह्मणि तृप्तिर्या जनास्तां जानतेऽपि न ॥ ६ ॥

विषयोर्मिविषोद्गारः स्यादतृप्तस्य पुद्गलैः ।
ज्ञानतृप्तस्य तु ध्यानसुधोद्गारपरम्परा ॥ ७ ॥

सुखिनो विषयातृप्ता, नेन्द्रोपेन्द्रादयोऽप्यहो ।
भिक्षुरेकः सुखी लोके, ज्ञानतृप्तो निरञ्जनः ॥ ८ ॥

## ११ निर्लेपाऽष्टकम्

संसारे निवसन् स्वार्थसज्जः कज्जलवेश्मनि ।
लिप्यते निखिलो लोको, ज्ञानसिद्धो न लिप्यते ॥ १ ॥

नाऽहं पुद्गलभावानां, कर्ता कारयिताऽपि न ।
नानुमन्ताऽपि चेत्यात्मज्ञानवान् लिप्यते कथम् ॥ २ ॥

लिप्यते पुद्गलस्कन्धो, न लिप्ये पुद्गलैरहम् ।
चित्रव्योमाञ्जनेनेव, ध्यायन्निति न लिप्यते ॥ ३ ॥

लिप्तता ज्ञानसम्पातप्रतिघाताय केवलम् ।
निर्लेपज्ञानमग्नस्य, क्रिया सर्वोपयुज्यते ॥ ४ ॥

तपःश्रुतादिना मत्तः, क्रियावानपि लिप्यते ।
भावनाज्ञानसम्पन्नो, निष्क्रियोऽपि न लिप्यते ॥ ५ ॥

अलिप्तो निश्चयेनात्मा, लिप्तश्च व्यवहारतः ।
शुद्ध्यत्यलिप्तया ज्ञानी, क्रियावान्, लिप्तया दृशा ॥ ६ ॥

ज्ञानक्रियासमावेशः, सहैवोन्मीलने द्वयोः ।
भूमिकाभेदतस्त्वत्र, भवेदेकैकमुख्यता ॥ ७ ॥

सज्ज्ञानं यदनुष्ठानं, न लिप्तं दोषपङ्कतः ।
शुद्धबुद्धस्वभावाय, तस्मै भगवते नमः ॥ ८ ॥

## १२ निःस्पृहाऽष्टकम्

स्वभावलाभात् किमपि, प्राप्तव्यं नाऽवशिष्यते ।
इत्यात्मैश्वर्यसम्पन्नो, निःस्पृहो जायते मुनिः ॥ १ ॥

संयोजितकरैः के के, प्रार्थ्यन्ते न स्पृहावहैः ।
अमात्रज्ञानपात्रस्य, निःस्पृहस्य तृणं जगत् ॥ २ ॥

छिन्दन्ति ज्ञानदात्रेण, स्पृहाविषलतां बुधाः ।
मुखशोषं च मूर्च्छांश्च, दैन्यं यच्छति यत्फलम् ॥ ३ ॥

निष्काशनीया विदुषा, स्पृहा चित्तगृहाद् बहिः ।
अनात्मरतिचाण्डालीसङ्गमङ्गीकरोति या ॥ ४ ॥

स्पृहावन्तो विलोक्यन्ते, लघवस्तृणतूलवत् ।
महाश्चर्यं तथाप्येते, मज्जन्ति भववारिधौ ॥ ५ ॥

गौरवं पौरवन्द्यत्वात्, प्रकृष्टत्वं प्रतिष्ठया ।
ख्यातिं जातिगुणात्स्वस्य, प्रादुष्कुर्यान्न निःस्पृहः ॥ ६ ॥

भूशय्या भैक्षमशनं, जीर्णं वासो वनं गृहम् ।
तथापि निःस्पृहस्याऽहो, चक्रिणोऽप्यधिकं सुखम् ॥ ७ ॥

परस्पृहा महादुःखं, निःस्पृहत्वं महासुखम् ।
एतदुक्तं समासेन, लक्षणं सुखदुःखयोः ॥ ८ ॥

## १३ मौनाऽष्टकम्

मन्यते यो जगत्तत्त्वं, स मुनिः परिकीर्त्तितः ।
सम्यक्त्वमेव तन्मौनं, मौनं सम्यक्त्वमेव वा ॥ १ ॥

आत्माऽऽत्मन्येव यच्छुद्धं, जानात्यात्मानमात्मना ।
सेयं रत्नत्रये ज्ञप्तिरुच्याचारैकता मुनेः ॥ २ ॥

चारित्रमात्मचरणाज्, ज्ञानं वा दर्शनं मुनेः ।
शुद्धज्ञाननये साध्यं, क्रियालाभात् क्रियानये ॥ ३ ॥

यतः प्रवृत्तिर्न मणौ, लभ्यते वा न तत्फलम् ।
अतात्त्विकी मणिज्ञप्तिर्मणिश्रद्धा च सा यथा ॥ ४ ॥

तथा यतो न शुद्धात्मस्वभावाऽऽचरणं भवेत् ।
फलं दोषनिवृत्तिर्वा, न तज्ज्ञानं न दर्शनम् ॥ ५ ॥

यथा शोफस्य पुष्टत्वं, यथा वा वध्यमण्डनम् ।
तथा जानन्भवोन्मादमात्मतृप्तो मुनिर्भवेत् ॥ ६ ॥

सुलभं वागनुच्चारं मौनमेकेन्द्रियेष्वपि ।
पुद्गलेष्वप्रवृत्तिस्तु, योगानां मौनमुत्तमम् ॥ ७ ॥

ज्योतिर्मयीव दीपस्य, क्रिया सर्वापि चिन्मयी ।
यस्याऽनन्यस्वभावस्य, तस्य मौनमनुत्तरम् ॥ ८ ॥

## १४ विद्याऽष्टकम्

नित्यशुच्यात्मताख्यातिरनित्याशुच्यनात्मसु ।
अविद्या तत्त्वधीर्विद्या, योगाचार्यैः प्रकीर्तिता ॥ १ ॥

यः पश्यन्नित्यमात्मानमनित्यं परसङ्गमम् ।
छलं लब्धुं न शक्नोति, तस्य मोहमलिम्लुचः ॥ २ ॥

तरङ्गतरलां लक्ष्मीमायुर्वायुवदस्थिरम् ।
अदभ्रधीरनुध्यायेदभ्रवद्भङ्गुरं वपुः ॥ ३ ॥

शुचीन्यप्यशुचीकर्तुं, समर्थेऽशुचिसम्भवे ।
देहे जलादिना शौचभ्रमो मूढस्य दारुणः ॥ ४ ॥

यः स्नात्वा समताकुण्डे, हित्वा कश्मलजं मलम् ।
पुनर्न याति मालिन्यं, सोऽन्तरात्मा परः शुचिः ॥ ५ ॥

आत्मबोधो नवः पाशो, देहगेहधनादिषु ।
यः क्षिप्तोऽप्यात्मना तेषु, स्वस्य बन्धाय जायते ॥ ६ ॥

मिथो युक्तपदार्थानामसङ्क्रमचमत्क्रिया ।
चिन्मात्रपरिणामेन, विदुषैवाऽनुभूयते ॥ ७ ॥

अविद्यातिमिरध्वंसे, दृशा विद्याञ्जनस्पृशा ।
पश्यन्ति परमात्मानमात्मन्येव हि योगिनः ॥ ८ ॥

## १५ विवेकाऽष्टकम्

कर्म जीवं च संश्लिष्टं, सर्वदा क्षीरनीरवत् ।
विभिन्नीकुरुते योऽसौ, मुनिहंसो विवेकवान् ॥ १ ॥

देहाऽऽत्माद्यविवेकोयं, सर्वदा सुलभो भवे ।
भवकोट्यापि तद्भेदविवेकस्त्वतिदुर्लभः ॥ २ ॥

शुद्धेऽपि व्योम्नि तिमिराद्, रेखाभिर्मिश्रता यथा ।
विकारैर्मिश्रता भाति, तथाऽऽत्मन्यविवेकतः ॥ ३ ॥

यथा योधैः कृतं युद्धं, स्वामिन्येवोपचर्यते ।
शुद्धात्मन्यविवेकेन, कर्मस्कन्धोर्जितं तथा ॥ ४ ॥

इष्टकाद्यपि हि स्वर्णं, पीतोन्मत्तो यथेक्षते ।
आत्माऽभेदभ्रमस्तद्वद्देहादावविवेकिनः ॥ ५ ॥

इच्छन्न परमान् भावान्, विवेकाद्रेः पतत्यधः ।
परमं भावमन्विच्छन्नाऽविवेके निमज्जति ॥ ६ ॥

आत्मन्येवात्मनः कुर्यात्, यः षट्कारकसङ्गतिम् ।
क्वाविवेकज्वरस्यास्य, वैषम्यं जडमज्जनात् ॥ ७ ॥

संयमास्त्रं विवेकेन, शाणेनोत्तेजितं मुनेः ।
धृतिधारोल्बणं कर्म-शत्रुच्छेदक्षमं भवेत् ॥ ८ ॥

## १६ माध्यस्थ्याऽष्टकम्

स्थीयतामनुपालम्भं, मध्यस्थेनान्तरात्मना ।
कुतर्ककर्करक्षेपैस्त्यज्यतां बालचापलम् ॥ १ ॥

मनोवत्सो युक्तिगवीं, मध्यस्थस्याऽनुधावति ।
तामाकर्षति पुच्छेन, तुच्छाऽऽग्रहमनःकपिः ॥ २ ॥

नयेषु स्वार्थसत्येषु, मोघेषु परचालने ।
समशीलं मनो यस्य, स मध्यस्थो महामुनिः ॥ ३ ॥

स्वस्वकर्मकृतावेशाः, स्वस्वकर्मभुजो नराः ।
न रागं नापि च द्वेषं, मध्यस्थस्तेषु गच्छति ॥ ४ ॥

मनः स्याद् व्यापृतं यावत्, परदोषगुणग्रहे ।
कार्यं व्यग्रं वरं तावन्मध्यस्थेनात्मभावने ॥ ५ ॥

विभिन्ना अपि पन्थानः, समुद्रं सरितामिव ।
मध्यस्थानां परं ब्रह्म, प्राप्नुवन्त्येकमक्षयम् ॥ ६ ॥

स्वाऽऽगमं रागमात्रेण, द्वेषमात्रात्परागमम् ।
न श्रयामस्त्यजामो वा, किन्तु मध्यस्थया दृशा ॥ ७ ॥

मध्यस्थया दृशा सर्वेष्वपुनर्बन्धकादिषु ।
चारिसंजीविनीचारन्यायादाशास्महे हितम् ॥ ८ ॥

## १७ निर्भयाऽष्टकम्

यस्य नास्ति पराऽपेक्षा, स्वभावाऽद्वैतगामिनः ।
तस्य किं न भयभ्रान्तिक्लान्तिसन्तानतानवम् ॥ १ ॥

भवसौख्येन किं भूरिभयज्वलनभस्मना ।
सदा भयोज्झितं ज्ञानं, सुखमेव विशिष्यते ॥ २ ॥

न गोप्यं क्वापि नाऽऽरोप्यं, हेयं देयं न च क्वचित् ।
क्व भयेन मुनेः स्थेयं, ज्ञेयं ज्ञानेन पश्यतः ॥ ३ ॥

एकं ब्रह्मास्त्रमादाय, निघ्नन् मोहचमूं मुनिः ।
बिभेति नैव सङ्ग्रामशीर्षस्थ इव नागराट् ॥ ४ ॥

मयूरी ज्ञानदृष्टिश्चेत्, प्रसर्पति मनोवने ।
वेष्टनं भयसर्पाणां, न तदानन्दचन्दने ॥ ५ ॥

कृतमोहास्त्रवैफल्यं, ज्ञानवर्म बिभर्ति यः ।
क्व भीस्तस्य क्व वा भङ्गः, कर्मसङ्गरकेलिषु ॥ ६ ॥

तूलवल्लघवो मूढा, भ्रमन्त्यभ्रे भयाऽनिलैः ।
नैकं रोमाऽपि तैर्ज्ञानगरिष्ठानां तु कम्पते ॥ ७ ॥

चित्ते परिणतं यस्य, चारित्रमकुतोभयम् ।
अखण्डज्ञानराज्यस्य, तस्य साधोः कुतो भयम् ॥ ८ ॥

## १८ अनात्मशंसाऽष्टकम्

गुणैर्यदि न पूर्णोऽसि, कृतमात्मप्रशंसया ।
गुणैरेवाऽसि पूर्णश्चेत्, कृतमात्मप्रशंसया ॥ १ ॥

श्रेयोद्रुमस्य मूलानि, स्वोत्कर्षाम्भःप्रवाहतः ।
पुण्यानि प्रकटीकुर्वन्, फलं किं समवाप्स्यसि ? ॥ २ ॥

आलम्बिता हिताय स्युः, परैः स्वगुणरश्मयः ।
अहो स्वयं गृहीतास्तु, पातयन्ति भवोदधौ ॥ ३ ॥

उच्चत्वदृष्टिदोषोत्थस्वोत्कर्षज्वरशान्तिकम् ।
पूर्वपुरुषसिंहेभ्यो, भृशं नीचत्वभावनम् ॥ ४ ॥

शरीररूपलावण्यग्रामाऽऽरामधनादिभिः ।
उत्कर्षः परपर्यायै-श्चिदानन्दघनस्य कः ॥ ५ ॥

शुद्धाः प्रत्यात्मसाम्येन, पर्यायाः परिभाविताः ।
अशुद्धाश्चाऽपकृष्टत्वान्-नोत्कर्षाय महामुनेः ॥ ६ ॥

क्षोभं गच्छन् समुद्रोऽपि, स्वोत्कर्षपवनेरितः ।
गुणौघान् बुद्बुदीकृत्य, विनाशयसि किं मुधा ॥ ७ ॥

निरपेक्षानवच्छिन्नानन्तचिन्मात्रमूर्तयः ।
योगिनो गलितोत्कर्षाऽपकर्षाऽनल्पकल्पनाः ॥ ८ ॥

## १९ तत्त्वदृष्ट्यष्टकम्

रूपे रूपवती दृष्टिर्दृष्ट्वा रूपं विमुह्यति ।
मज्जत्यात्मनि नीरूपे, तत्त्वदृष्टिस्त्वरूपिणी ॥ १ ॥

भ्रमवाटी बहिर्दृष्टिर्भ्रमच्छाया तदीक्षणम् ।
अभ्रान्तस्तत्त्वदृष्टिस्तु, नास्यां शेते सुखाशया ॥ २ ॥

ग्रामाऽऽरामादि मोहाय, यद्दृष्टं बाह्यया दृशा ।
तत्त्वदृष्ट्या तदेवान्तर्नीतं वैराग्यसम्पदे ॥ ३ ॥

बाह्यदृष्टेः सुधासारघटिता भाति सुन्दरी ।
तत्त्वदृष्टेस्तु सा साक्षाद्विण्मूत्रपिठरोदरी ॥ ४ ॥

लावण्यलहरीपुण्यं, वपुः पश्यति बाह्यदृग् ।
तत्त्वदृष्टिः श्वकाकानां, भक्ष्यं कृमिकुलाकुलम् ॥ ५ ॥

गजाश्वैर्भूपभवनं, विस्मयाय बहिर्दृशः ।
तत्राऽश्वेभवनात्कोऽपि, भेदस्तत्त्वदृशस्तु न ॥ ६ ॥

भस्मना केशलोचेन, वपुर्धृतमलेन वा ।
महान्तं बाह्यदृग् वेत्ति, चित्साम्राज्येन तत्त्ववित् ॥ ७ ॥

न विकाराय विश्वस्योपकारायैव निर्मिताः ।
स्फुरत्कारुण्यपीयुषवृष्टयस्तत्त्वदृष्टयः ॥ ८ ॥

## २० सर्वसमृद्ध्यष्टकम्

बाह्यदृष्टिप्रचारेषु, मुद्रितेषु महात्मनः ।
अन्तरेवाऽवभासन्ते, स्फुटाः सर्वाः समृद्धयः ॥ १ ॥

समाधिर्नन्दनं धैर्यं, दम्भोलिः समता शची ।
ज्ञानं महाविमानं च, वासवश्रीरियं मुनेः ॥ २ ॥

विस्तारितक्रियाज्ञानचर्मच्छत्रो निवारयन् ।
मोहम्लेच्छमहावृष्टिं चक्रवर्ती न किं मुनिः ॥ ३ ॥

नवब्रह्मसुधाकुण्डनिष्ठाऽधिष्ठायको मुनिः ।
नागलोकेशवद् भाति, क्षमां रक्षन् प्रयत्नतः ॥ ४ ॥

मुनिरध्यात्मकैलाशे, विवेकवृषभस्थितः ।
शोभते विरतिज्ञप्तिगङ्गागौरीयुतः शिवः ॥ ५ ॥

ज्ञानदर्शनचन्द्रार्कनेत्रस्य नरकच्छिदः ।
सुखसागरमग्नस्य, किं न्यूनं योगिनो हरेः ॥ ६ ॥

या सृष्टिर्ब्रह्मणो बाह्या, बाह्यापेक्षावलम्बिनी ।
मुनेः परानपेक्षाऽन्तर्गुणसृष्टिस्ततोऽधिका ॥ ७ ॥

रत्नैस्त्रिभिः पवित्रा या श्रोतोभिरिव जाह्नवी ।
सिद्धयोगस्य साऽप्यर्हत्पदवी न दवीयसी ॥ ८ ॥

## २१ कर्मविपाकाचिन्तनाष्टकम्

दुःखं प्राप्य न दीनःस्यात् सुखं प्राप्य च विस्मितः ।
मुनिः कर्मविपाकस्य, जानन् परवशं जगत् ॥ १ ॥

येषां भ्रूभङ्गमात्रेण, भज्यन्ते पर्वता अपि ।
तैरहो कर्मवैषम्ये, भूपैर्भिक्षाऽपि नाऽऽप्यते ॥ २ ॥

जातिचातुर्यहीनोऽपि, कर्मण्यभ्युदयावहे ।
क्षणाद्रङ्कोऽपि राजा स्याच्छत्रच्छन्नदिगन्तरः ॥ ३ ॥

विषमा कर्मणः सृष्टिर्दृष्टा करभपृष्ठवत् ।
जात्यादिभूतिवैषम्यात्, का रतिस्तत्र योगिनः ? ॥ ४ ॥

आरूढाः प्रशमश्रेणिं, श्रुतकेवलिनोऽपि च ।
भ्राम्यन्तेऽनन्तसंसारमहो दुष्टेन कर्मणा ॥ ५ ॥

अर्वाक् सर्वापि सामग्री, श्रान्तेव परितिष्ठति ।
विपाकः कर्मणः कार्यपर्यन्तमनुधावति ॥ ६ ॥

असावचरमावर्ते, धर्मं हरति पश्यतः ।
चरमावर्तिसाधोस्तु, च्छलमन्विष्य हृष्यति ॥ ७ ॥

साम्यं बिभर्ति यः कर्मविपाकं हृदि चिन्तयन् ।
स एव स्याच्चिदानन्द-मकरन्दमधुव्रतः ॥ ८ ॥

## २२ भवोद्वेगाऽष्टकम्

यस्य गम्भीरमध्यस्याऽज्ञानवज्रमयं तलम् ।
रुद्धा व्यसनशैलौघैः, पन्थानो यत्र दुर्गमाः ॥ १ ॥

पातालकलशा यत्र, भृतास्तृष्णामहानिलैः ।
कषायाश्चित्तसंकल्पवेलावृद्धिं वितन्वते ॥ २ ॥

स्मरौर्वाग्निर्ज्वलत्यन्तर्यत्र स्नेहेन्धनः सदा ।
यो घोररोगशोकादिमत्स्यकच्छपसंकुलः ॥ ३ ॥

दुर्बुद्धिमत्सरद्रोहैर्विद्युद्दुर्वातगर्जितैः ।
यत्र सांयात्रिका लोकाः, पतन्त्युत्पातसङ्कटे ॥ ४ ॥

ज्ञानी तस्माद् भवाम्भोधेर्नित्योद्विग्नोऽतिदारुणात् ।
तस्य सन्तरणोपायं सर्वयत्नेन काङ्क्षति ॥ ५ ॥

तैलपात्रधरो यद्वद्राधावेधोद्यतो यथा ।
क्रियास्वनन्यचित्तः स्याद्, भवभीतस्तथा मुनिः ॥ ६ ॥

विषं विषस्य वह्नेश्च, वह्निरेव यदौषधम् ।
तत्सत्यं भवभीतानामुपसर्गेऽपि यन्न भीः ॥ ७ ॥

स्थैर्यं भवभयादेव, व्यवहारे मुनिर्व्रजेत् ।
स्वात्मारामसमाधौ तु, तदप्यन्तर्निमज्जति ॥ ८ ॥

## २३ लोकसंज्ञात्यागाऽष्टकम्

प्राप्तः षष्ठं गुणस्थानं, भवदुर्गाऽद्रिलङ्घनम् ।
लोकसंज्ञारतो न स्यान्मुनिर्लोकोत्तरस्थितिः ॥ १ ॥

यथा चिन्तामणिं दत्ते, बठरो बदरीफलैः ।
हहा जहाति सद्धर्मं, तथैव जनरञ्जनैः ॥ २ ॥

लोकसंज्ञामहानद्यामनुश्रोतोऽनुगा न के ।
प्रतिश्रोतोऽनुगस्त्वेको, राजहंसो महामुनिः ॥ ३ ॥

लोकमालम्ब्य कर्तव्यं, कृतं बहुभिरेव चेत् ।
तदा मिथ्यादृशां धर्मो, न त्याज्यः स्यात्कदाचन ॥ ४ ॥

श्रेयोऽर्थिनो हि भूयांसो, लोके लोकोत्तरे च न ।
स्तोका हि रत्नवणिजः, स्तोकाश्च स्वात्मसाधकाः ॥ ५ ॥

लोकसंज्ञाहता हन्त, नीचैर्गमनदर्शनैः ।
शंसयन्ति स्वसत्याङ्ग-मर्मघातमहाव्यथाम् ॥ ६ ॥

आत्मसाक्षिकसद्धर्मसिद्धौ किं लोकयात्रया ।
तत्र प्रसन्नचन्द्रश्च, भरतश्च निदर्शनम् ॥ ७ ॥

लोकसंज्ञोज्झितः साधुः, परब्रह्मसमाधिमान् ।
सुखमास्ते गतद्रोहममतामत्सरज्वरः ॥ ८ ॥

## २४ शास्त्रदृष्ट्यष्टकम्

चर्मचक्षुर्भृतः सर्वे, देवाश्चाऽवधिचक्षुषः ।
सर्वतश्चक्षुषः सिद्धाः, साधवः शास्त्रचक्षुषः ॥ १ ॥

पुरःस्थितानिवोर्ध्वाधस्तिर्यग्लोकविवर्त्तिनः ।
सर्वान् भावानवेक्षन्ते, ज्ञानिनः शास्त्रचक्षुषा ॥ २ ॥

शासनात् त्राणशक्तेश्च, बुधैः शास्त्रं निरुच्यते ।
वचनं वीतरागस्य, तत्तु नाऽन्यस्य कस्यचित् ॥ ३ ॥

शास्त्रे पुरस्कृते तस्माद्, वीतरागः पुरस्कृतः ।
पुरस्कृते पुनस्तस्मिन्, नियमात् सर्वसिद्धयः ॥ ४ ॥

अदृष्टार्थेऽनुधावन्तः, शास्त्रदीपं विना जडाः ।
प्राप्नुवन्ति परं खेदं, प्रस्खलन्तः पदे पदे ॥ ५ ॥

शुद्धोञ्छाद्यपि शास्त्राऽऽज्ञानिरपेक्षस्य नो हितम् ।
भौतहन्तुर्यथा तस्य, पदस्पर्शनिवारणम् ॥ ६ ॥

अज्ञानाऽहिमहामन्त्रं, स्वाच्छन्द्यज्वरलङ्घनम् ।
धर्मारामसुधाकुल्यां, शास्त्रमाहुर्महर्षयः ॥ ७ ॥

शास्त्रोक्ताचारकर्ता च, शास्त्रज्ञः शास्त्रदेशकः ।
शास्त्रैकदृङ् महायोगी, प्राप्नोति परमं पदम् ॥ ८ ॥

## २५ परिग्रहाऽष्टकम्

न परावर्तते राशेर्वक्रतां जातु नोज्झति ।
परिग्रहग्रहः कोऽयं, विडम्बितजगत्त्रयः ॥ १ ॥

परिग्रहग्रहाऽऽवेशाद्दुर्भाषितरजःकिराम् ।
श्रूयन्ते विकृताः किं न, प्रलापा लिङ्गिनामपि ॥ २ ॥

यस्त्यक्त्वा तृणवद्बाह्यमान्तरं च परिग्रहम् ।
उदास्ते तत्पदाम्भोजं, पर्युपास्ते जगत्त्रयी ॥ ३ ॥

चित्तेऽन्तर्ग्रन्थगहने, बहिर्निर्ग्रन्थता वृथा ।
त्यागात्कञ्चुकमात्रस्य, भुजङ्गो न हि निर्विषः ॥ ४ ॥

त्यक्ते परिग्रहे साधोः, प्रयाति सकलं रजः ।
पालित्यागे क्षणादेव, सरसः सलिलं यथा ॥ ५ ॥

त्यक्तपुत्रकलत्रस्य, मूर्च्छामुक्तस्य योगिनः ।
चिन्मात्रप्रतिबद्धस्य, का पुद्गलनियन्त्रणा ॥ ६ ॥

चिन्मात्रदीपको गच्छेत्, निर्वातस्थानसन्निभैः ।
निष्परिग्रहतास्थैर्यं, धर्मोपकरणैरपि ॥ ७ ॥

मूर्च्छाच्छन्नधियां सर्वं, जगदेव परिग्रहः ।
मूर्च्छया रहितानां तु, जगदेवाऽपरिग्रहः ॥ ८ ॥

## २६ अनुभवाऽष्टकम्

सन्ध्येव दिनरात्रिभ्यां, केवलश्रुतयोः पृथक् ।
बुधैरनुभवो दृष्टः, केवलाऽर्काऽरुणोदयः ॥ १ ॥

व्यापारः सर्वशास्त्राणां, दिक्प्रदर्शनमेव हि ।
पारं तु प्रापयत्येकोऽनुभवो भववारिधेः ॥ २ ॥

अतीन्द्रियं परं ब्रह्म, विशुद्धाऽनुभवं विना ।
शास्त्रयुक्तिशतेनाऽपि, न गम्यं यद् बुधा जगुः ॥ ३ ॥

ज्ञायेरन् हेतुवादेन, पदार्था यद्यतीन्द्रियाः ।
कालेनैतावता प्राज्ञैः, कृतः स्यात्तेषु निश्चयः ॥ ४ ॥

केषां न कल्पनादर्वी, शास्त्रक्षीरान्नगाहिनी ।
विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥ ५ ॥

पश्यतु ब्रह्म निर्द्वन्द्वं, निर्द्वन्द्वानुभवं विना ।
कथं लिपिमयी दृष्टिर्वाङ्मयी वा मनोमयी ॥ ६ ॥

न सुषुप्तिरमोहत्वाद् नापि च स्वापजागरौ ।
कल्पनाशिल्पविश्रान्ते, स्तुर्यैवानुभवो दशा ॥ ७ ॥

अधिगत्याखिलं शब्द-ब्रह्म शास्त्रदृशा मुनिः ।
स्वसंवेद्यं परं ब्रह्मानुभवेनाधिगच्छति ॥ ८ ॥

## २७ योगाऽष्टकम्

मोक्षेण योजनाद्योगः, सर्वोऽप्याचार इष्यते ।
विशिष्य स्थानवर्णार्थालम्बनैकाग्र्यगोचरः ॥ १ ॥

कर्मयोगद्वयं तत्र, ज्ञानयोगत्रयं विदुः ।
विरतेष्वेष नियमाद्, बीजमात्रं परेष्वपि ॥ २ ॥

कृपानिर्वेदसंवेगप्रशमोत्पत्तिकारिणः ।
भेदाः प्रत्येकमत्रेच्छाप्रवृत्तिस्थिरसिद्धयः ॥ ३ ॥

इच्छा तद्वत्कथाप्रीतिः, प्रवृत्तिः पालनं परम् ।
स्थैर्यं बाधकभीहानिः, सिद्धिरन्यार्थसाधनम् ॥ ४ ॥

अर्थालम्बनयोश्चैत्यवन्दनादौ विभावनम् ।
श्रेयसे योगिनः स्थानवर्णयोर्यत्न एव च ॥ ५ ॥

आलम्बनमिह ज्ञेयं, द्विविधं रूप्यरूपि च ।
अरूपिगुणसायुज्ययोगोऽनालम्बनः परः ॥ ६ ॥

प्रीतिभक्तिवचोऽसङ्गैः, स्थानाद्यपि चतुर्विधम् ।
तस्मादयोगयोगाप्तेर्मोक्षयोगः क्रमाद् भवेत् ॥ ७ ॥

स्थानाद्ययोगिनस्तीर्थोच्छेदाद्यालम्बनादपि ।
सूत्रदाने महादोष, इत्याचार्याः प्रचक्षते ॥ ८ ॥

## २८ नियागाऽष्टकम्

यः कर्म हुतवान् दीप्ते, ब्रह्माग्नौ ध्यानधाय्यया ।
स निश्चितेन यागेन, नियागप्रतिपत्तिमान् ॥ १ ॥

पापध्वंसिनि निष्कामे, ज्ञानयज्ञे रतो भव ।
सावद्यैः कर्मयज्ञैः किं, भूतिकामनयाविलैः ॥ २ ॥

वेदोक्तत्वान्मनःशुद्ध्या, कर्मयज्ञोऽपि योगिनः ।
ब्रह्मयज्ञ इतीच्छन्तः, श्येनयागं त्यजन्ति किम् ? ॥ ३ ॥

ब्रह्मयज्ञः परं कर्म, गृहस्थस्याधिकारिणः ।
पूजादि वीतरागस्य, ज्ञानमेव तु योगिनः ॥ ४ ॥

भिन्नोद्देशेन विहितं, कर्म कर्मक्षयाक्षमम् ।
क्लृप्तभिन्नाधिकारं च , पुत्रेष्ट्यादिवदिष्यताम् ॥ ५ ॥

ब्रह्मार्पणमपि ब्रह्म-यज्ञान्तर्भावसाधनम् ।
ब्रह्माग्नौ कर्मणो युक्तं, स्वकृतत्वस्मये हुते ॥ ६ ॥

ब्रह्मण्यर्पितसर्वस्वो, ब्रह्मदृग्ब्रह्मसाधनः ।
ब्रह्मणा जुह्वदब्रह्म, ब्रह्मणि ब्रह्मगुप्तिमान् ॥ ७ ॥

ब्रह्माध्ययननिष्ठावान्, परब्रह्मसमाहितः ।
ब्राह्मणो लिप्यते नाघैर्नियागप्रतिपत्तिमान् ॥ ८ ॥

## २९ भावपूजाऽष्टकम्

दयाम्भसा कृतस्नानः सन्तोषशुभवस्त्रभृत् ।
विवेकतिलकभ्राजी, भावनापावनाशयः ॥ १ ॥

भक्तिश्रद्धानघुसृणोन्मिश्रपाटीरजद्रवैः ।
नवब्रह्माङ्गतो देवं, शुद्धमात्मानमर्चय ॥ २ ॥

क्षमापुष्पस्रजं धर्मयुग्मक्षौमद्वयं तथा ।
ध्यानाभरणसारं च, तदङ्गे विनिवेशय ॥ ३ ॥

मदस्थानभिदात्यागैर्लिखाग्रे चाष्टमङ्गलीम् ।
ज्ञानाग्नौ शुभसङ्कल्पकाकतुण्डं च धूपय ॥ ४ ॥

प्राग्धर्मलवणोत्तारं, धर्मसन्यासवह्निना ।
कुर्वन् पूरय सामर्थ्यराजन्नीराजनाविधिम् ॥ ५ ॥

स्फुरन् मङ्गलदीपं च, स्थापयानुभवं पुरः ।
योगनृत्यपरस्तौर्यत्रिकसंयमवान्भव ॥ ६ ॥

उल्लसन्मनसः सत्यघण्टां वादयतस्तव ।
भावपूजारतस्येत्थं, करक्रोडे महोदयः ॥ ७ ॥

द्रव्यपूजोचिता भेदोपासना गृहमेधिनाम् ।
भावपूजा तु साधूनामभेदोपासनात्मिका ॥ ८ ॥

## ३० ध्यानाऽष्टकम्

ध्याता ध्येयं तथा ध्यानं, त्रयं यस्यैकतां गतम् ।
मुनेरनन्यचित्तस्य, तस्य दुःखं न विद्यते ॥ १ ॥

ध्याताऽन्तरात्मा ध्येयस्तु, परमात्मा प्रकीर्तितः ।
ध्यानं चैकाग्र्यसंवित्तिः, समापत्तिस्तदेकता ॥ २ ॥

मणाविव प्रतिच्छाया, समापत्तिः परात्मनः ।
क्षीणवृत्तौ भवेद् ध्यानादन्तरात्मनि निर्मले ॥ ३ ॥

आपत्तिश्च ततः पुण्यतीर्थकृत्कर्मबन्धतः ।
तद्भावाभिमुखत्वेन, सम्पत्तिश्च क्रमाद् भवेत् ॥ ४ ॥

इत्थं ध्यानफलाद्युक्तं, विंशतिस्थानकाद्यपि ।
कष्टमात्रं त्वभव्यानामपि नो दुर्लभं भवे ॥ ५ ॥

जितेन्द्रियस्य धीरस्य, प्रशान्तस्य स्थिरात्मनः ।
सुखासनस्य नासाग्रन्यस्तनेत्रस्य योगिनः ॥ ६ ॥

रूद्धबाह्यमनोवृत्तेर्धारणाधारया रयात् ।
प्रसन्नास्याऽप्रमत्तस्य, चिदानन्दसुधालिहः ॥ ७ ॥

साम्राज्यमप्रतिद्वन्द्वमन्तरेव वितन्वतः ।
ध्यानिनो नोपमा लोके, सदेवमनुजेऽपि हि ॥ ८ ॥

## ३१ तपोऽष्टकम्

ज्ञानमेव बुधाः प्राहुः, कर्मणां तापनात्तपः ।
तदाभ्यन्तरमेवेष्टं, बाह्यं तदुपबृंहकम् ॥ १ ॥

आनुश्रोतसिकी वृत्तिर्बालानां सुखशीलता ।
प्रातिश्रोतसिकी वृत्तिर्ज्ञानिनां परमं तपः ॥ २ ॥

धनार्थिनां यथा नास्ति, शीततापादि दुःसहम् ।
तथा भवविरक्तानां, तत्त्वज्ञानार्थिनामपि ॥ ३ ॥

सदुपायप्रवृत्तानामुपेयमधुरत्वतः ।
ज्ञानिनां नित्यमानन्दवृद्धिरेव तपस्विनाम् ॥ ४ ॥

इत्थं च दुःखरूपत्वात्, तपो व्यर्थमितीच्छताम् ।
बौद्धानां निहता बुद्धिर्बौद्धानन्दाऽपरिक्षयात् ॥ ५ ॥

यत्र ब्रह्म जिनार्चा च, कषायाणां तथा हतिः ।
सानुबन्धा जिनाज्ञा च, तत्तपः शुद्धमिष्यते ॥ ६ ॥

तदेव हि तपः कार्यं, दुर्ध्यानं यत्र नो भवेत् ।
येन योगा न हीयन्ते, क्षीयन्ते नेन्द्रियाणि च ॥ ७ ॥

मूलोत्तरगुणश्रेणिप्राज्यसाम्राज्यसिद्धये ।
बाह्यमाभ्यन्तरं चेत्थं, तपः कुर्यान् महामुनिः ॥ ८ ॥

## ३२ सर्वनयाष्टकम्

धावन्तोऽपि नयाः सर्वे, स्युर्भावे कृतविश्रमाः ।
चारित्रगुणलीनः स्यादिति सर्वनयाश्रितः ॥ १ ॥

पृथङ्नया मिथः पक्षप्रतिपक्षकदर्थिताः ।
समवृत्तिसुखाऽऽस्वादी, ज्ञानी सर्वनयाश्रितः ॥ २ ॥

नाऽप्रमाणं प्रमाणं वा, सर्वमप्यविशेषितम् ।
विशेषितं प्रमाणं स्यादिति सर्वनयज्ञता ॥ ३ ॥

लोके सर्वनयज्ञानां, ताटस्थ्यं वाऽप्यनुग्रहः ।
स्यात्पृथङ्नयमूढानां, स्मयार्तिर्वाऽतिविग्रहः ॥ ४ ॥

श्रेयः सर्वनयज्ञानां, विपुलं धर्मवादतः ।
शुष्कवादाद्विवादाच्च, परेषां तु विपर्ययः ॥ ५ ॥

प्रकाशितं जनानां यैर्मतं सर्वनयाश्रितम् ।
चित्ते परिणतं चेदं, येषां तेभ्यो नमो नमः ॥ ६ ॥

निश्चये व्यवहारे च, त्यक्त्वा ज्ञाने च कर्मणि ।
एकपाक्षिकविश्लेषमारूढाः शुद्धभूमिकाम् ॥ ७ ॥

अमूढलक्ष्याः सर्वत्र, पक्षपातविवर्जिताः ।
जयन्ति परमानन्दमयाः, सर्वनयाश्रयाः ॥ ८ ॥

## प्रशस्तिस्वरूपकीर्तनम्

पूर्णो मग्नः स्थिरोऽमोहो, ज्ञानी शान्तो जितेन्द्रियः ।
त्यागी क्रियापरस्तृप्तो, निर्लेपो निःस्पृहो मुनिः ॥ १ ॥

विद्याविवेकसम्पन्नो, मध्यस्थो भयवर्जितः ।
अनात्मशंसकस्तत्त्वदृष्टिः सर्वसमृद्धिमान् ॥ २ ॥

ध्याता कर्मविपाकानामुद्विग्नो भववारिधेः ।
लोकसंज्ञाविनिर्मुक्तः, शास्त्रदृग् निष्परिग्रहः ॥ ३ ॥

शुद्धानुभववान् योगी, नियागप्रतिपत्तिमान् ।
भावार्चाध्यानतपसां भूमिः सर्वनयाश्रितः ॥ ४ ॥

स्पष्टं निष्टङ्कितं तत्त्वमष्टकैः प्रतिपन्नवान् ।
मुनिर्महोदयं ज्ञानसारं समधिगच्छति ॥ ५ ॥

निर्विकारं निराबाधं, ज्ञानसारमुपेयुषाम् ।
विनिवृत्तपराशानां, मोक्षोऽत्रैव महात्मनाम् ॥ ६ ॥

चित्तमार्द्रीकृतं ज्ञानसारसारस्वतोर्मिभिः ।
नाप्नोति तीव्रमोहाऽग्निप्लोषशोषकदर्थनाम् ॥ ७ ॥

अचिन्त्या काऽपि साधूनां, ज्ञानसारगरिष्ठता ।
गतिर्ययोर्ध्वमेव स्यादधःपातः कदाऽपि न ॥ ८ ॥

क्लेशक्षयो हि मण्डूकचूर्णतुल्यः क्रियाकृतः ।
दग्धतच्चूर्णसदृशो, ज्ञानसारकृतः पुनः ॥ ९ ॥

ज्ञानपूतां परेऽप्याहुः, क्रियां हेमघटोपमाम् ।
युक्तं तदपि तद्भावं, न यद् भग्नाऽपि सोज्झति ॥ १० ॥

क्रियाशून्यं च यज्ज्ञानं, ज्ञानशून्या च या क्रिया ।
अनयोरन्तरं ज्ञेयं भानुखद्योतयोरिव ॥ ११ ॥

चारित्रं विरतिः पूर्णा, ज्ञानस्योत्कर्ष एव हि ।
ज्ञानाद्वैतनये दृष्टिर्देया तद्योगसिद्धये ॥ १२ ॥

## रचनाक्षेत्रकालादिप्रशस्तिः

सिद्धिं सिद्धपुरे पुरन्दरपुरस्पर्धावहे लब्धवां-
श्चिद्दीपोऽयमुदारसारमहसा दीपोत्सवे पर्वणि ।
एतद्भावनभावपावनमनश्चञ्चच्चमत्कारिणां,
तैस्तैर्दीपशतैःसुनिश्चयमतैर्नित्योऽस्तु दीपोत्सवः ॥ १३ ॥

केषांचिद्विषयज्वरातुरमहो चित्तं परेषां विषा-
ऽऽवेगोदर्ककुतर्कमूर्च्छितमथान्येषां कुवैराग्यतः ।
लग्नालर्कमबोधकूपपतितं चास्ते परेषामपि,
स्तोकानां तु विकारभाररहितं तज्ज्ञानसाराश्रितम् ॥ १४ ॥

जातोद्रेकविवेकतोरणततौ धावल्यमातन्वति,
हृद्गेहे समयोचितः प्रसरति स्फीतश्च गीतध्वनिः ।
पूर्णानन्दघनस्य किं सहजया तद्भाग्यभङ्ग्याऽभवन्,
नैतद्ग्रन्थमिषात् करग्रहमहश्चित्रं चरित्रश्रियः ॥ १५ ॥

भावस्तोमपवित्रगोमयरसैर्लिप्तैव भूः सर्वतः ।
संसिक्ता समतोदकैरथ पथि न्यस्ता विवेकस्रजः ।
अध्यात्मामृतपूर्णकामकलशश्चक्रेऽत्र शास्त्रे पुरः ।
पूर्णानन्दघने पुरं प्रविशति स्वीयं कृतं मङ्गलम् ॥ १६ ॥

## स्वगुर्वादिप्रशस्तिः

गच्छे श्रीविजयादिदेवसुगुरोः स्वच्छे गुणानां गणैः,
प्रौढिं प्रौढिमधाम्नि जीतविजयप्राज्ञाः परामैयरुः ।
तत्सातीर्थ्यभृतां नयादिविजयप्राज्ञोत्तमानां शिशोः,
श्रीमन्न्यायविशारदस्य कृतिनामेषा कृतिः प्रीतये ॥ १७ ॥

# ॥ अध्यात्मोपनिषत् ॥

## शास्त्रयोगशुद्धिः

### प्रथमोऽधिकारः

ऐन्द्रवृन्दनतं नत्वा वीतरागं स्वयंभुवम् ।
अध्यात्मोपनिषन्नामा ग्रन्थोऽस्माभिर्विधीयते ॥ १ ॥

आत्मानमधिकृत्य स्याद्यः पञ्चाचारचारिमा ।
शब्दयोगार्थनिपुणास्तदध्यात्मं प्रचक्षते ॥ २ ॥

रूढ्यर्थनिपुणास्त्वाहुश्चित्तं मैत्र्यादिवासितम् ।
अध्यात्मं निर्मलं बाह्यव्यवहारोपबृंहितम् ॥ ३ ॥

एवंभूतनये ज्ञेयः प्रथमोऽर्थोऽत्र कोविदैः ।
यथायथं द्वितीयोऽर्थो व्यवहारर्जुसूत्रयोः ॥ ४ ॥

गलन्नयकृतभ्रान्तिर्यः स्याद्विश्रान्तिसंमुखः ।
स्याद्वादविशदालोकः स एवाध्यात्मभाजनम् ॥ ५ ॥

मनोवत्सो युक्तिगवीं मध्यस्थस्यानुधावति ।
तामाकर्षति पुच्छेन तुच्छाग्रहमनःकपिः ॥ ६ ॥

अनर्थायैव नार्थाय जातिप्रायाश्च युक्तयः ।
हस्ती हन्तीति वचने प्राप्ताप्राप्तविकल्पवत् ॥ ७ ॥

ज्ञायेरन् हेतुवादेन पदार्था यद्यतीन्द्रियाः ।
कालेनैतावता प्राज्ञैः कृतः स्यात्तेषु निश्चयः ॥ ८ ॥

आगमश्चोपपत्तिश्च संपूर्णं दृष्टिलक्षणम् ।
अतीन्द्रियाणामर्थानां सद्भावप्रतिपत्तये ॥ ९ ॥

अन्तरा केवलज्ञानं छद्मस्थाः खल्वचक्षुषः ।
हस्तस्पर्शसमं शास्त्रज्ञानं तद्व्यवहारकृत् ॥ १० ॥

शुद्धोञ्छाद्यपि शास्त्राज्ञानिरपेक्षस्य नो हितम् ।
भौतहन्तुर्यथा तस्य पदस्पर्शनिषेधनम् ॥ ११ ॥

शासनात्त्राणशक्तेश्च बुधैः शास्त्रं निरुच्यते ।
वचनं वीतरागस्य तच्च नान्यस्य कस्यचित् ॥ १२ ॥

वीतरागोऽनृतं नैव ब्रूयात्तद्धेत्वभावतः ।
यस्तद्वाक्येष्वनाश्वासस्तन्महामोहजृम्भितम् ॥ १३ ॥

शास्त्रे पुरस्कृते तस्माद्वीतरागः पुरस्कृतः ।
पुरस्कृते पुनस्तस्मिन्नियमात् सर्वसिद्धयः ॥ १४ ॥

एनं केचित् समापत्तिं वदन्त्यन्ये ध्रुवं पदम् ।
प्रशान्तवाहितामन्ये विसभागक्षयं परे ॥ १५ ॥

चर्मचक्षुर्भृतः सर्वे देवाश्चावधिचक्षुषः ।
सर्वतश्चक्षुषः सिद्धा योगिनः शास्त्रचक्षुषः ॥ १६ ॥

परीक्षन्ते कषच्छेदतापैः स्वर्णं यथा जनाः ।
शास्त्रेऽपि वर्णिकाशुद्धिं परीक्षन्तां तथा बुधाः ॥ १७ ॥

विधयः प्रतिषेधाश्च भूयांसो यत्र वर्णिताः ।
एकाधिकारा दृश्यन्ते कषशुद्धिं वदन्ति ताम् ॥ १८ ॥

सिद्धान्तेषु यथा ध्यानाध्ययनादिविधिव्रजाः ।
हिंसादीनां निषेधाश्च भूयांसो मोक्षगोचराः ॥ १९ ॥

अर्थकामविमिश्रं यद्यच्च क्लृप्तकथाविलम् ।
आनुषङ्गिकमोक्षार्थं यन्न तत् कषशुद्धिमत् ॥ २० ॥

विधीनां च निषेधानां योगक्षेमकरी क्रिया ।
वर्ण्यते यत्र सर्वत्र तच्छास्त्रं छेदशुद्धिमत् ॥ २१ ॥

कायिकाद्यपि कुर्वीत गुप्तश्च समितो मुनिः ।
कृत्ये ज्यायसि किं वाच्यमित्युक्तं समये यथा ॥ २२ ॥

अन्यार्थं किंचिदुत्सृष्टं यत्रान्यार्थमपोह्यते ।
दुर्विधिप्रतिषेधं तन्न शास्त्रं छेदशुद्धिमत् ॥ २३ ॥

निषिद्धस्य विधानेऽपि हिंसादेर्भूतिकामिभिः ।
दाहस्येव न सद्वैद्यैर्याति प्रकृतिदुष्टता ॥ २४ ॥

हिंसा भावकृतो दोषो दाहस्तु न तथेति चेत् ।
भूत्यर्थं तद्विधानेऽपि भावदोषः कथं गतः ॥ २५ ॥

वेदोक्तत्वान्मनःशुद्ध्या कर्मयज्ञोऽपि योगिनः ।
ब्रह्मयज्ञ इतीच्छन्तः श्येनयागं त्यजन्ति किम् ॥ २६ ॥

वेदान्तविधिशेषत्वमतः कर्मविधेर्हतम् ।
भिन्नात्मदर्शकाः शेषा वेदान्ता एव कर्मणः ॥ २७ ॥

कर्मणां निरवद्यानां चित्तशोधकतां परम् ।
सांख्याचार्या अपीच्छन्तीत्यास्तामेषोऽत्र विस्तरः ॥ २८ ॥

यत्र सर्वनयालम्बिविचारप्रबलाग्निना ।
तात्पर्यश्यामिका न स्यात्तच्छास्त्रं तापशुद्धिमत् ॥ २९ ॥

यथाह सोमिलप्रश्ने जिनः स्याद्वादसिद्धये ।
द्रव्यार्थादहमेकोऽस्मि दृग्ज्ञानार्थादुभावपि ॥ ३० ॥

अक्षयश्चाव्ययश्चास्मि प्रदेशार्थविचारतः ।
अनेकभूतभावात्मा पर्यायार्थपरिग्रहात् ॥ ३१ ॥

द्वयोरेकत्वबुद्ध्यापि यथा द्वित्वं न गच्छति ।
नयैकान्तधियाप्येवमनेकान्तो न गच्छति ॥ ३२ ॥

सामग्र्येण न मानं स्याद् द्वयोरेकत्वधीर्यथा ।
तथा वस्तुनि वस्त्वंशबुद्धिर्ज्ञेया नयात्मिका ॥ ३३ ॥

एकदेशेन चैकत्वधीर्द्वयोः स्याद्यथा प्रमा ।
तथा वस्तुनि वस्त्वंशबुद्धिर्ज्ञेया नयात्मिका ॥ ३४ ॥

इत्थं च संशयत्वं यन्नयानां भाषते परः ।
तदपास्तं विलम्बानां प्रत्येकं न नयेषु यत् ॥ ३५ ॥

सामग्र्येण द्वयालम्बेऽप्यविरोधे समुच्चयः ।
विरोधे दुर्नयव्राताः स्वशस्त्रेण स्वयं हताः ॥ ३६ ॥

कथं विप्रतिषिद्धानां न विरोधः समुच्चये ।
अपेक्षाभेदतो हन्त कैव विप्रतिषिद्धता ॥ ३७ ॥

भिन्नापेक्षा यथैकत्र पितृपुत्रादिकल्पना ।
नित्यानित्याद्यनेकान्तस्तथैव न विरोत्स्यते ॥ ३८ ॥

व्यापके सत्यनेकान्ते स्वरूपपररूपयोः ।
आनेकान्त्यान्न कुत्रापि निर्णीतिरिति चेन्मतिः ॥ ३९ ॥

अव्याप्यवृत्तिधर्माणां यथावच्छेदकाश्रया ।
नापि ततः परावृत्तिस्तत् किं नात्र तथेक्ष्यते ॥ ४० ॥

आनैगमान्त्यभेदं तत्परावृत्तावपि स्फुटम् ।
अभिप्रेताश्रयेणैव निर्णयो व्यवहारकः ॥ ४१ ॥

अनेकान्तेऽप्यनेकान्तादनिष्ठैवमपाकृता ।
नयसूक्ष्मेक्षिकाप्रान्ते विश्रान्तेः सुलभत्वतः ॥ ४२ ॥

आत्माश्रयादयोऽप्यत्र सावकाशा न कर्हिचित् ।
ते हि प्रमाणसिद्धार्थात् प्रकृत्यैव पराङ्मुखाः ॥ ४३ ॥

उत्पन्नं दधिभावेन नष्टं दुग्धतया पयः ।
गोरसत्वात् स्थिरं जानन् स्याद्वादद्विड् जनोऽपि कः ॥ ४४ ॥

इच्छन् प्रधानं सत्त्वाद्यैर्विरुद्धैर्गुम्फितं गुणैः ।
सांख्यः संख्यावतां मुख्यो नानेकान्तं प्रतिक्षिपेत् ॥ ४५ ॥

विज्ञानस्यैकमाकारं नानाकारकरम्बितम् ।
इच्छंस्तथागतः प्राज्ञो नानेकान्तं प्रतिक्षिपेत् ॥ ४६ ॥

चित्रमेकमनेकं च रूपं प्रामाणिकं वदन् ।
योगो वैशेषिको वापि नानेकान्तं प्रतिक्षिपेत् ॥ ४७ ॥

प्रत्यक्षं मितिमात्रंशे मेयांशे तद्विलक्षणम् ।
गुरुर्ज्ञानं वदन्नेकं नानेकान्तं प्रतिक्षिपेत् ॥ ४८ ॥

जातिव्यक्त्यात्मकं वस्तु वदन्ननुभवोचितम् ।
भट्टो वापि मुरारिर्वा नानेकान्तं प्रतिक्षिपेत् ॥ ४९ ॥

अबद्धं परमार्थेन बद्धं च व्यवहारतः ।
ब्रुवाणो ब्रह्मवेदान्ती नानेकान्तं प्रतिक्षिपेत् ॥ ५० ॥

ब्रुवाणा भिन्नभिन्नार्थान्नयभेदव्यपेक्षया ।
प्रतिक्षिपेयुर्नो वेदाः स्याद्वादं सार्वतान्त्रिकम् ॥ ५१ ॥

विमतिः संमतिर्वापि चार्वाकस्य न मृग्यते ।
परलोकात्ममोक्षेषु यस्य मुह्यति शेमुषी ॥ ५२ ॥

तेनानेकान्तसूत्रं यद्यद्वा सूत्रं नयात्मकम् ।
तदेव तापशुद्धं स्यान्न तु दुर्नयसंज्ञितम् ॥ ५३ ॥

नित्यैकान्ते न हिंसादि तत्पर्यायापरिक्षयात् ।
मनःसंयोगनाशादौ व्यापारानुपलम्भतः ॥ ५४ ॥

बुद्धिलेपोऽपि को नित्यनिर्लेपात्मव्यवस्थितौ ।
सामानाधिकरण्येन बन्धमोक्षौ हि संगतौ ॥ ५५ ॥

अनित्यैकान्तपक्षेऽपि हिंसादिकमसंगतम् ।
स्वतो विनाशशीलानां क्षणानां नाशकोऽस्तु कः ॥ ५६ ॥

आनन्तर्यं क्षणानां तु न हिंसादिनियामकम् ।
विशेषादर्शनात्तस्य बुद्धलुब्धकयोर्मिथः ॥ ५७ ॥

संक्लेशेन विशेषश्चेदानन्तर्यमपार्थकम् ।
न हि तेनापि संक्लिष्टमध्ये भेदो विधीयते ॥ ५८ ॥

मनोवाक्काययोगानां भेदादेवं क्रियाभिदा ।
समग्रैव विशीर्येतेत्येतदन्यत्र चर्चितम् ॥ ५९ ॥

नित्यानित्याद्यनेकान्तशास्त्रं तस्माद्विशिष्यते ।
तद्दृष्ट्यैव हि माध्यस्थ्यं गरिष्ठमुपपद्यते ॥ ६० ॥

यस्य सर्वत्र (सर्वेषु) समता नयेषु तनयेष्विव ।
तस्यानेकान्तवादस्य क्व न्यूनाधिकशेमुषी ॥ ६१ ॥

स्वतन्त्रास्तु नयास्तस्य नांशाः किं तु प्रकल्पिताः ।
रागद्वेषौ कथं तस्य (तेषां) दूषणेऽपि च भूषणे ॥ ६२ ॥

अर्थे महेन्द्रजालस्य दूषितेऽपि च भूषिते ।
यथा जनानां माध्यस्थ्यं दुर्नयार्थे तथा मुनेः ॥ ६३ ॥

दूषयेदज्ञ एवोच्चैः स्याद्वादं न तु पण्डितः ।
अज्ञप्रलापे सुज्ञानां न द्वेषः करुणैव तु ॥ ६४ ॥

त्रिविधं ज्ञानमाख्यातं श्रुतं चिन्ता च भावना ।
आद्यं कोष्ठगबीजाभं वाक्यार्थविषयं मतम् ॥ ६५ ॥

महावाक्यार्थजं यत्तु सूक्ष्मयुक्तिशतान्वितम् ।
तद्द्वितीयं जले तैलबिन्दुरीत्या प्रसृत्वरम् ॥ ६६ ॥

ऐदम्पर्यगतं यच्च विध्यादौ यत्नवच्च यत् ।
तृतीयं तदशुद्धोच्चजात्यरत्नविभानिभम् ॥ ६७ ॥

आद्ये ज्ञाने मनाक् पुंसस्तद्रागाद्दर्शनग्रहः ।
द्वितीये न भवत्येष चिन्तायोगात्कदाचन ॥ ६८ ॥

चारिसंजीवनीचारकारकज्ञाततोऽन्तिमे ।
सर्वत्रैव हिता वृत्तिर्गाम्भीर्यात्तत्त्वदर्शिनः ॥ ६९ ॥

तेन स्याद्वादमालम्ब्य सर्वदर्शनतुल्यताम् ।
मोक्षोद्देशाविशेषेण यः पश्यति स शास्त्रवित् ॥ ७० ॥

माध्यस्थ्यमेव शास्त्रार्थो येन तच्चारु सिध्यति ।
स एव धर्मवादः स्यादन्यद् बालिशवल्गनम् ॥ ७१ ॥

पुत्रदारादि संसारो धनिनां मूढचेतसाम् ।
पण्डितानां तु संसारः शास्त्रमध्यात्मवर्जितम् ॥ ७२ ॥

माध्यस्थ्यसहितं ह्येकपदज्ञानमपि प्रमा ।
शास्त्रकोटिर्वृथैवान्या तथा चोक्तं महात्मना ॥ ७३ ॥

वादांश्च प्रतिवादांश्च वदन्तोऽनिश्चितांस्तथा ।
तत्त्वान्तं नैव गच्छन्ति तिलपीलकवद्गतौ ॥ ७४ ॥

इति यतिवदनात्पदानि बुद्ध्वा प्रशमविवेचनसंवराभिधानि ।
प्रदलितदुरितः क्षणाच्चिलातितनय इह त्रिदशालयं जगाम ॥ ७५ ॥

न चानेकान्तार्थावगमरहितस्यास्य फलितं
कथं माध्यस्थ्येन स्फुटमितिविधेयं भ्रमपदम् ।
समाधेरव्यक्ताद्यदभिदधति व्यक्तिसदृशं
फलं योगाचार्या ध्रुवमभिनिवेशे विगलिते ॥ ७६ ॥

विशेषादोघाद्वा सपदि तदनेकान्तसमये
समुन्मीलद्भक्तिर्भवति य इहाध्यात्मविशदः ।
भृशं धीरोदात्तप्रियतमगुणोज्जागररुचि-
र्यशः श्रीस्तस्याङ्कं त्यजति न कदापि प्रणयिनी ॥ ७७ ॥

## ज्ञानयोगशुद्धिः

### द्वितीयोऽधिकारः

दिशा दर्शितया शास्त्रैर्गच्छन्नच्छमतिः पथि ।
ज्ञानयोगं प्रयुञ्जीत तद्विशेषोपलब्धये ॥ १ ॥

योगजादृष्टजनितः स तु प्रातिभसंज्ञितः ।
सन्ध्येव दिनरात्रिभ्यां केवलश्रुतयोः पृथक् ॥ २ ॥

पदमात्रं हि नान्वेति शास्त्रं दिग्दर्शनोत्तरम् ।
ज्ञानयोगो मुनेः पार्श्वमाकैवल्यं न मुञ्चति ॥ ३ ॥

तत्त्वतो ब्रह्मणः शास्त्रं लक्षकं न तु दर्शकम् ।
न चादृष्टात्मतत्त्वस्य दृष्टभ्रान्तिर्निवर्तते ॥ ४ ॥

तेनात्मदर्शनाकाङ्क्षी ज्ञानेनान्तर्मुखो भवेत् ।
द्रष्टुर्दृगात्मता मुक्तिर्दृश्यैकात्म्यं भवभ्रमः ॥ ५ ॥

आत्मज्ञाने मुनिर्मग्नः सर्वं पुद्गलविभ्रमम् ।
महेन्द्रजालवद्वेत्ति नैव तत्रानुरज्यते ॥ ६ ॥

आस्वादिता सुमधुरा येन ज्ञानरतिः सुधा ।
न लगत्येव तच्चेतो विषयेषु विषेष्विव ॥ ७ ॥

सत्तत्त्वचिन्तया यस्याभिसमन्वागता इमे ।
आत्मवान् ज्ञानवान् वेदधर्मवान् ब्रह्मवांश्च सः ॥ ८ ॥

विषयान् साधकः पूर्वमनिष्टत्वधिया त्यजेत् ।
न त्यजेन्न च गृह्णीयात् सिद्धो विन्द्यात् स तत्त्वतः ॥ ९ ॥

योगारम्भदशास्थस्य दुःखमन्तर्बहिः सुखम् ।
सुखमन्तर्बहिर्दुःखं सिद्धयोगस्य तु ध्रुवम् ॥ १० ॥

प्रकाशशक्त्या यद्रूपमात्मनो ज्ञानमुच्यते ।
सुखं स्वरूपविश्रान्तिशक्त्या वाच्यं तदेव तु ॥ ११ ॥

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतदुक्तं समासेन लक्षणं सुखदुःखयोः ॥ १२ ॥

ज्ञानमग्नस्य यच्छर्म तद्वक्तुं नैव पार्यते ।
नोपमेयं प्रियाश्लेषैर्नापि तच्चन्दनद्रवैः ॥ १३ ॥

तेजोलेश्याविवृद्धिर्या पर्यायक्रमवृद्धितः ।
भाषिता भगवत्यादौ सेत्थम्भूतस्य युज्यते ॥ १४ ॥

चिन्मात्रलक्षणेनान्यव्यतिरिक्तत्वमात्मनः ।
प्रतीयते यदश्रान्तं तदेव ज्ञानमुत्तमम् ॥ १५ ॥

शुभोपयोगरूपोऽयं समाधिः सविकल्पकः ।
शुद्धोपयोगरूपस्तु निर्विकल्पस्तदेकदृक् ॥ १६ ॥

आद्यः सालम्बनो नाम योगोऽनालम्बनः परः ।
छायाया दर्पणाभावे मुखविश्रान्तिसंनिभः ॥ १७ ॥

यद्दृश्यं यच्च निर्वाच्यं मननीयं च यद्भुवि ।
तद्रूपं परसंश्लिष्टं न शुद्धद्रव्यलक्षणम् ॥ १८ ॥

अपदस्य पदं नास्तीत्युपक्रम्यागमे ततः ।
उपाधिमात्रव्यावृत्त्या प्रोक्तं शुद्धात्मलक्षणम् ॥ १९ ॥

यतो वाचो निवर्तन्ते ह्यप्राप्य मनसा सह ।
इति श्रुतिरपि व्यक्तमेतदर्थानुभाषिणी ॥ २० ॥

अतीन्द्रियं परं ब्रह्म विशुद्धानुभवं विना ।
शास्त्रयुक्तिशतेनापि नैव गम्यं कदाचन ॥ २१ ॥

केषां न कल्पना दर्वी शास्त्रक्षीरान्नगाहिनी ।
विरलास्तद्रसास्वादविदोऽनुभवजिह्वया ॥ २२ ॥

पश्यतु ब्रह्म निर्द्वन्द्वं निर्द्वन्द्वानुभवं विना ।
कथं लिपिमयी दृष्टिर्वाङ्मयी वा मनोमयी ॥ २३ ॥

न सुषुप्तिरमोहत्वान्नापि च स्वापजागरौ ।
कल्पनाशिल्पविश्रान्तेस्तुर्यैवानुभवो दशा ॥ २४ ॥

अधिगत्याखिलं शब्दब्रह्म शास्त्रदृशा मुनिः ।
स्वसंवेद्यपरं ब्रह्मानुभवैरधिगच्छति ॥ २५ ॥

ये पर्यायेषु निरतास्ते ह्यन्यसमयस्थिताः ।
आत्मस्वभावनिष्ठानां ध्रुवा स्वसमयस्थितिः ॥ २६ ॥

आवापोद्वापविश्रान्तिर्यत्राशुद्धनयस्य तत् ।
शुद्धानुभवसंवेद्यं स्वरूपं परमात्मनः ॥ २७ ॥

गुणस्थानानि यावन्ति यावन्त्यश्चापि मार्गणाः ।
तदन्यतरसंश्लेषो नवातः परमात्मनः ॥ २८ ॥

कर्मोपाधिकृतान् भावान् य आत्मन्यध्यवस्यति ।
तेन स्वाभाविकं रूपं न बुद्धं परमात्मनः ॥ २९ ॥

यथा भृत्यैः कृतं युद्धं स्वामिन्येवोपचर्यते ।
शुद्धात्मन्यविवेकेन कर्मस्कन्धोर्जितं तथा ॥ ३० ॥

मुषितत्वं यथा पान्थगतं पथ्युपचर्यते ।
तथा व्यवहरत्यज्ञश्चिद्रूपे कर्मविक्रियाम् ॥ ३१ ॥

स्वत एव समायान्ति कर्माण्यारब्धशक्तितः ।
एकक्षेत्रावगाहेन ज्ञानी तत्र न दोषभाक् ॥ ३२ ॥

दारुयन्त्रस्थपाञ्चालीनृत्यतुल्याः प्रवृत्तयः ।
योगिनो नैव बाधायै ज्ञानिनो लोकवर्तिनः ॥ ३३ ॥

प्रारब्धादृष्टजनितात् सामायिकविवेकतः ।
क्रियापि ज्ञानिनो व्यक्तामौचितीं नातिवर्तते ॥ ३४ ॥

संसारे निवसन् स्वार्थसज्जः कज्जलवेश्मनि ।
लिप्यते निखिलो लोको ज्ञानसिद्धो न लिप्यते ॥ ३५ ॥

नाहं पुद्गलभावानां कर्ता कारयिता च न ।
नानुमन्तापि चेत्यात्मज्ञानवान् लिप्यते कथम् ॥ ३६ ॥

लिप्यते पुद्गलस्कन्धो न लिप्ये पुद्गलैरहम् ।
चित्रव्योमाञ्जनेनेव ध्यायन्निति न लिप्यते ॥ ३७ ॥

लिप्तता ज्ञानसंपातप्रतिघाताय केवलम् ।
निर्लेपज्ञानमग्नस्य क्रिया सर्वोपयुज्यते ॥ ३८ ॥

तपःश्रुतादिना मत्तः क्रियावानपि लिप्यते ।
भावनाज्ञानसंपन्नो निष्क्रियोऽपि न लिप्यते ॥ ३९ ॥

समलं निर्मलं चेदमिति द्वैतं यदा गतम् ।
अद्वैतं निर्मलं ब्रह्म तदैकमवशिष्यते ॥ ४० ॥

महासामान्यरूपेऽस्मिन्मज्जन्ति नयजा भिदाः ।
समुद्र इव कल्लोलाः पवनोन्माथनिर्मिताः ॥ ४१ ॥

षड्द्रव्यैकात्म्यसंस्पर्शि सत्सामान्यं हि यद्यपि ।
परस्यानुपयोगित्वात् स्वविश्रान्तं तथापि तत् ॥ ४२ ॥

नयेन संग्रहेणैवमृजुसूत्रोपजीविना ।
सच्चिदानन्दरूपत्वं ब्रह्मणो व्यवतिष्ठते ॥ ४३ ॥

सत्त्वचित्त्वादिधर्माणां भेदाभेदविचारणे ।
न चार्थोऽयं विशीर्येत निर्विकल्पप्रसिद्धितः ॥ ४४ ॥

योगजानुभवारूढे सन्मात्रे निर्विकल्पके ।
विकल्पौघासहिष्णुत्वं भूषणं न तु दूषणम् ॥ ४५ ॥

यो ह्याख्यातुमशक्योऽपि प्रत्याख्यातुं न शक्यते ।
प्राज्ञैर्न दूषणीयोऽर्थः स माधुर्यविशेषवत् ॥ ४६ ॥

कुमारी न यथा वेत्ति सुखं दयितभोगजम् ।
न जानाति तथा लोको योगिनां ज्ञानजं सुखम् ॥ ४७ ॥

अत्यन्तपक्वबोधाय समाधिर्निर्विकल्पकः ।
वाच्योऽयं नार्धविज्ञस्य तथा चोक्तं परैरपि ॥ ४८ ॥

आदौ शमदमप्रायैर्गुणैः शिष्यं प्रबोधयेत् ।
पश्चात् सर्वमिदं ब्रह्म शुद्धस्त्वमिति बोधयेत् ॥ ४९ ॥

अज्ञस्यार्धप्रबुद्धस्य सर्वं ब्रह्मेति यो वदेत् ।
महानरकजालेषु स तेन विनियोजितः ॥ ५० ॥

तेनादौ शोधयेच्चित्तं सद्विकल्पैर्व्रतादिभिः ।
यत्कामादिविकाराणां प्रतिसंख्याननाश्यता ॥ ५१ ॥

विकल्परूपा मायेयं विकल्पेनैव नाश्यते ।
अवस्थान्तरभेदेन तथा चोक्तं परैरपि ॥ ५२ ॥

अविद्ययैवोत्तमया स्वात्मनाशोद्यमोत्थया ।
विद्या संप्राप्यते राम ! सर्वदोषापहारिणी ॥ ५३ ॥

शाम्यति ह्यस्त्रमस्त्रेण मलेन क्षाल्यते मलः ।
शमं विषं विषेणैति रिपुणा हन्यते रिपुः ॥ ५४ ॥

ईदृशी भूतमायेयं यां स्वनाशेन हर्षद ! ।
न लक्ष्यते स्वभावोऽस्याः प्रेक्ष्यमाणैव नश्यति ॥ ५५ ॥

व्रतादिः शुभसंकल्पो निर्णाश्याशुभवासनाम् ।
दाह्यं विनैव दहनः स्वयमेव विनङ्क्ष्यति ॥ ५६ ॥
इयं नैश्चयिकी शक्तिर्न प्रवृत्तिर्न वा क्रिया ।
शुभसंकल्पनाशार्थं योगिनामुपयुज्यते ॥ ५७ ॥

द्वितीयापूर्वकरणे क्षायोपशमिका गुणाः ।
क्षमाद्या अपि यास्यन्ति स्थास्यन्ति क्षायिकाः परम् ॥ ५८ ॥

इत्थं यथाबलमनुद्यममुद्यमं च कुर्वन् दशानुगुणमुत्तममान्तरार्थे ।
चिन्मात्रनिर्भरनिवेशितपक्षपातः प्रातर्द्युरत्नमिव दीप्तिमुपैति योगी ॥ ५९

अभ्यस्य तु प्रविततं व्यवहारमार्गं प्रज्ञापनीय इह सद्गुरुवाक्यनिष्ठः ।
चिद्दर्पणप्रतिफलत्त्रिजगद्विवर्ते वर्तेत किं पुनरसौ सहजात्मरूपे ॥ ६० ॥

भवतु किमपि तत्त्वं बाह्यमाभ्यन्तरं वा
हृदि वितरति साम्यं निर्मलश्चिद्विचारः ।
तदिह निचितपञ्चाचारसंचारचारु-
स्फुरितपरमभावे पक्षपातोऽधिको नः ॥ ६१ ॥

स्फुटमपरमभावे नैगमस्तारतम्यं
प्रवदतु न तु हृष्येत्तावता ज्ञानयोगी ।

कलितपरमभावं चिच्चमत्कारसारम्
सकलनयविशुद्धं चित्तमेकं प्रमाणम् ॥ ६२ ॥

हरिरपरनयानां गर्जितैः कुञ्जराणाम्
सहजविपिनसुप्तो निश्चयो नो बिभेति ।
अपि तु भवति लीलोज्जृम्भिजृम्भोन्मुखेऽस्मिन्
गलितमदभरास्ते नोच्छ्वसन्त्येव भीताः ॥ ६३ ॥

कलितविविधबाह्यव्यापकोलाहलौघ-
व्युपरमपरमार्थे भावनापावनानाम् ।
क्वचन किमिपि शोच्यं नास्ति नैवास्ति मोच्यं
न च किमपि विधेयं नैव गेयं न देयम् ॥ ६४ ॥

इति सुपरिणतात्मख्यातिचातुर्यकेलि-
र्भवति यतिपतिर्यश्चिद्धरोद्धासिवीर्यः ।
हरहिमकरहारस्फारमन्दारगङ्गा
रजतकलशशुभ्रा स्यात्तदीया यशःश्रीः ॥ ६५ ॥

## क्रियायोगशुद्धिः

### तृतीयोऽधिकारः

यान्येव साधनान्यादौ गृह्णीयाज्ज्ञानसाधकः ।
सिद्धयोगस्य तान्येव लक्षणानि स्वभावतः ॥ १ ॥

अत एव जगौ यात्रां सत्तपोनियमादिषु ।
यतनां सोमिलप्रश्ने भगवान् स्वस्य निश्चिताम् ॥ २ ॥

अतश्चैव स्थितप्रज्ञभावसाधनलक्षणे ।
अन्यूनाभ्यधिके प्रोक्ते योगदृष्ट्या परैरपि ॥ ३ ॥

नाज्ञानिनो विशेष्येत यथेच्छाचरणे पुनः ।
ज्ञानी स्वलक्षणाभावात्तथा चोक्तं परैरपि ॥ ४ ॥

बुद्धाऽद्वैतसतत्त्वस्य यथेच्छाचरणं यदि ।
शुनां तत्त्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ ५ ॥

अबुद्धिपूर्विका वृत्तिर्न दुष्टा तत्र यद्यपि ।
तथापि योगजादृष्टमहिम्ना सा न संभवेत् ॥ ६ ॥

निवृत्तमशुभाचाराच्छुभाचारप्रवृत्तिमत् ।
स्याद्वा चित्तमुदासीनं सामायिकवतो मुनेः ॥ ७ ॥

विधयश्च निषेधाश्च न त्वज्ञाननियन्त्रिताः ।
बालस्यैवागमे प्रोक्तो नोद्देशः पश्यकस्य यत् ॥ ८ ॥

न च सामर्थ्ययोगस्य युक्तं शास्त्रं नियामकम् ।
कल्पातीतस्य मर्यादाप्यस्ति न ज्ञानिनः क्वचित् ॥ ९ ॥

भावस्य सिद्ध्यसिद्धिभ्यां यच्चाकिंचित्करी क्रिया ।
ज्ञानमेव क्रियामुक्तं राजयोगस्तदिष्यताम् ॥ १० ॥

मैवं नाकेवली पश्यो नापूर्वकरणं विना ।
धर्मसंन्यासयोगी चेत्यन्यस्य नियता क्रिया ॥ ११ ॥

स्थैर्याधानाय सिद्धस्यासिद्धस्यानयनाय च ।
भावस्येव क्रिया शान्तचित्तानामुपयुज्यते ॥ १२ ॥

क्रियाविरहितं हन्त ज्ञानमात्रमनर्थकम् ।
गतिं विना पथज्ञोऽपि नाप्नोति पुरमीप्सितम् ॥ १३ ॥

स्वानुकूलां क्रियां काले ज्ञानपूर्णोऽप्यपेक्षते ।
प्रदीपः स्वप्रकाशोऽपि तैलपूर्त्यादिकं यथा ॥ १४ ॥

बाह्यभावं पुरस्कृत्य ये क्रिया व्यवहारतः ।
वदने कवलक्षेपं विना ते तृप्तिकाङ्क्षिणः ॥ १५ ॥

गुणवद्बहुमानादेर्नित्यस्मृत्या च सत्क्रिया ।
जातं न पातयेद्भावमजातं जनयेदपि ॥ १६ ॥

क्षायोपशमिके भावे या क्रिया क्रियते तया ।
पतितस्यापि तद्भावप्रवृद्धिर्जायते पुनः ॥ १७ ॥

गुणवृद्ध्यै ततः कुर्यात् क्रियामस्खलनाय वा ।
एकं तु संयमस्थानं जिनानामवतिष्ठते ॥ १८ ॥

अज्ञाननाशकत्वेन ननु ज्ञानं विशिष्यते ।
न हि रज्जावहिभ्रान्तिर्गमने न निवर्तते ॥ १९ ॥

सत्यं क्रियागमप्रोक्ता ज्ञानिनोऽप्युपयुज्यते ।
संचितादृष्टनाशार्थं नासूरोऽपि यदभ्यधात् ॥ २० ॥

तण्डुलस्य यथा वर्म यथा ताम्रस्य कालिका ।
नश्यति क्रियया पुत्र ! पुरुषस्य तथा मलम् ॥ २१ ॥

जीवस्य तण्डुलस्येव मलं सहजमप्यलम् ।
नश्यत्येव न संदेहस्तस्मादुद्यमवान् भव ॥ २२ ॥

अविद्या च दिदृक्षा च भवबीजं च वासना ।
सहजं च मलं चेति पर्यायाः कर्मणः स्मृताः ॥ २३ ॥

ज्ञानिनो नास्त्यदृष्टं चेद्भस्मसात्कृतकर्मणः ।
शरीरपातः किं न स्याज्जीवनादृष्टनाशतः ॥ २४ ॥

शरीरमीश्वरस्येव विदुषोऽप्यवतिष्ठते ।
अन्यादृष्टवशेनेति कश्चिदाह तदक्षमम् ॥ २५ ॥

शरीरं विदुषः शिष्याद्यदृष्टाद्यदि तिष्ठति ।
तदाऽसुहृददृष्टेन न नश्येदिति का प्रमा ॥ २६ ॥

न चोपादाननाशेऽपि क्षणं कार्यं यथेष्यते ।
तार्किकैः स्थितिमत्तद्वच्चिरं विद्वत्तनुस्थितिः ॥ २७ ॥

निरुपादानकार्यस्य क्षणं यत्तार्किकैः स्थितिः ।
नाशहेत्वन्तराभावादिष्टा न च स दुर्वचः ॥ २८ ॥

अन्यादृष्टस्य तत्पातप्रतिबन्धकतां नयेत् ।
म्रियमाणोऽपि जीव्येत शिष्यादृष्टवशाद् गुरुः ॥ २९ ॥

स्वभावान्निरुपादानं यदि विद्वत्तनुस्थितिः ।
तथापि कालनियमे तत्र युक्तिर्न विद्यते ॥ ३० ॥

उच्छृङ्खलस्य तच्चिन्त्यं मतं वेदान्तिनो ह्यदः ।
प्रारब्धादृष्टतः किंतु ज्ञेया विद्वत्तनुस्थितिः ॥ ३१ ॥

तत्प्रारब्धेतरादृष्टं ज्ञाननाश्यं यदीष्यते ।
लाघवेन विजातीयं तन्नाश्यं तत्प्रकल्प्यताम् ॥ ३२ ॥

इत्थं च ज्ञानिनो ज्ञाननाश्यकर्मक्षये सति ।
क्रियैकनाश्यकर्मौघक्षयार्थं सापि युज्यते ॥ ३३ ॥

सर्वकर्मक्षये ज्ञानकर्मणोस्तत्समुच्चयः ।
अन्योऽन्यप्रतिबन्धेन तथा चोक्तं परैरपि ॥ ३४ ॥

न यावत्सममभ्यस्तौ ज्ञानसत्पुरुषक्रमौ ।
एकोऽपि नैतयोस्तावत्पुरुषस्येह सिध्यति ॥ ३५ ॥

यथा छाद्मस्थिके ज्ञानकर्मणी सहकृत्वरे ।
क्षायिके अपि विज्ञेये तथैव मतिशालिभिः ॥ ३६ ॥

संप्राप्तकेवलज्ञाना अपि यज्जिनपुङ्गवाः ।
क्रियां योगनिरोधाख्यां कृत्वा सिध्यन्ति नान्यथा ॥ ३७ ॥

तेन ये क्रियया मुक्ता ज्ञानमात्राभिमानिनः ।
ते भ्रष्टा ज्ञानकर्मभ्यां नास्तिका नात्र संशयः ॥ ३८ ॥

ज्ञानोत्पत्तिं समुद्भाव्य कामादीनन्यदृष्टितः ।
अपह्नुवानैर्लोकेभ्यो नास्तिकैर्वञ्चितं जगत् ॥ ३९ ॥

ज्ञानस्य परिपाकाद्धि क्रियाऽसङ्गत्वमङ्गति ।
न तु प्रयाति पार्थक्यं चन्दनादिव सौरभम् ॥ ४० ॥

प्रीतिभक्तिवचोऽसङ्गैरनुष्ठानं चतुर्विधम् ।
यत्परैर्योगिभिर्गीतं तदित्थं युज्यतेऽखिलम् ॥ ४१ ॥

ज्ञाने चैव क्रियायां च युगपद्विहितादरः ।
द्रव्यभावविशुद्धः सन् प्रयात्येव परं पदम् ॥ ४२ ॥

क्रियाज्ञानसंयोगविश्रान्तचित्ताः समुद्भूतनिर्बाधचारित्रवृत्ताः ।
नयोन्मेषनिर्णीतनिःशेषभावास्तपःशक्तिलब्धप्रसिद्धप्रभावाः ॥४३॥

भयक्रोधमायामदाज्ञाननिद्राप्रमादोज्झिताः शुद्धमुद्रा मुनीन्द्राः ।
यशःश्रीसमालिङ्गिता वादिदन्तिस्मयोच्छेदहर्यक्षतुल्या जयन्ति ॥ ४४ ॥

## साम्ययोगशुद्धिः

### चतुर्थोऽधिकारः

ज्ञानक्रियाश्वद्वययुक्तसाम्य-रथाधिरूढः शिवमार्गगामी ।
न ग्रामपूःकण्टकजारतीनां जनोऽनुपानत्क इवार्तिमेति ॥ १ ॥

आत्मप्रवृत्तावतिजागरूकः परप्रवृत्तौ बधिरान्धमूकः ।
सदा चिदानन्दपदोपयोगी लोकोत्तरं साम्यमुपैति योगी ॥ २ ॥

परीषहैश्च प्रबलोपसर्ग-योगाच्चलत्येव न साम्ययुक्तः ।
स्थैर्याद्विपर्यासमुपैति जातु क्ष्मा न शैलैर्न च सिन्धुनाथैः ॥ ३ ॥

इतस्ततो नारतिवह्नियोगा-दुड्डीय गच्छेद्यदि चित्तसूतः ।
साम्यैकसिद्धौषधमूर्छितः सन् कल्याणसिद्धेर्न तदा विलम्बः ॥ ४ ॥

अन्तर्निमग्नः समतासुखाब्धौ बाह्ये सुखे नो रतिमेति योगी ।
अटत्यटव्यां क इवार्थलुब्धो गृहे समुत्सर्पति कल्पवृक्षे ॥ ५ ॥

यस्मिन्नविद्यार्पितबाह्यवस्तु-विस्तारजभ्रान्तिरुपैति शान्तिम् ।
तस्मिंश्चिदेकार्णवनिस्तरङ्ग-स्वभावसाम्ये रमते सुबुद्धिः ॥ ६ ॥

शुद्धात्मतत्त्वप्रगुणा विमर्शाः स्पर्शाख्यसंवेदनमादधानाः ।
यदान्यबुद्धिं विनिवर्तयन्ति तदा समत्वं प्रथतेऽवशिष्टम् ॥ ७ ॥

विना समत्वं प्रसरन्ममत्वं सामायिकं मायिकमेव मन्ये ।
आये समानां सति सद्गुणानां शुद्धं हि तच्छुद्धनया विदन्ति ॥ ८ ॥

निशानभोमन्दिररत्नदीप्र-ज्योतिर्भिरुद्योतितपूर्वमन्तः ।
विद्योतते तत्परमात्मतत्त्वं प्रसृत्वरे साम्यमणिप्रकाशे ॥ ९ ॥

एकां विवेकाङ्कुरितां श्रिता यां निर्वाणमापुर्भरतादिभूपाः ।
सैवर्जुमार्गः समता मुनीनामन्यस्तु तस्या निखिलः प्रपञ्चः ॥ १० ॥

अल्पेऽपि साधुर्न कषायवह्ना-वह्नाय विश्वासमुपैति भीतः ।
प्रवर्धमानः स दहेद् गुणौघं साम्याम्बुपूरैर्यदि नापनीतः ॥ ११ ॥

प्रारब्धजा ज्ञानवतां कषाया आभासिका इत्यभिमानमात्रम् ।
नाश्यो हि भावः प्रतिसंख्यया यो नाबोधवत्साम्यरतौ स तिष्ठेत् ॥ १२

साम्यं विना यस्य तपःक्रियादे निष्ठा प्रतिष्ठार्जनमात्र एव ।
स्वर्धेनुचिन्तामणिकामकुम्भान् करोत्यसौ काणकपर्दमूल्यान् ॥१३॥

ज्ञानी क्रियावान् विरतस्तपस्वी ध्यानी च मौनी स्थिरदर्शनश्च ।
साधुर्गुणं तं लभते न जातु प्राप्नोति यं साम्यसमाधिनिष्ठः ॥ १४ ॥

दुर्योधनेनाभिहतश्चुकोप न पाण्डवैर्यो न नुतो जहर्ष ।
स्तुमो भदन्तं दमदन्तमन्तः समत्ववन्तं मुनिसत्तमं तम् ॥ १५ ॥

यो दह्यमानां मिथिलां निरीक्ष्य शक्रेण नुन्नोऽपि नमिः पुरीं स्वाम् ।
न मेऽत्र किंचिज्ज्वलतीति मेने साम्येन तेनोरूयशो वितेने ॥ १६ ॥

साम्यप्रसादास्तवपुर्ममत्वाः सत्त्वाधिकाः स्वं ध्रुवमेव मत्वा ।
न सेहिरेऽर्त्तिं किमु तीव्रयन्त्रकनिष्पीडिताः स्कन्धकसूरिशिष्याः १७

लोकोत्तरं चारुचरित्रमेतन्मेतार्यसाधोः समतासमाधेः ।
हृदाप्यकुप्यन्न यदार्द्रचर्मबद्धेऽपि मूर्धन्ययमाप तापम् ॥ १८ ॥

जज्वाल नान्तश्च सु(न)राधमेन प्रोज्ज्वालितेऽपि ज्वलनेन मौलौ ।
मौलिर्मुनीनां स न कैर्निषेव्यः कृष्णानुजन्मा समतामृताब्धिः ॥ १९ ॥

गङ्गाजले यो न जहौ सुरेण विद्धोऽपि शूले समतानुवेधम् ।
प्रयागतीर्थोदयकृन्मुनीनां मान्यः स सूरिस्तनुजोऽन्निकायाः ॥ २० ॥

स्त्रीभ्रूणगोब्राह्मणघातजात-पापादधःपातकृताभिमुख्याः ।
दृढप्रहारिप्रमुखाः क्षणेन साम्यावलम्बात्पदमुच्चमापुः ॥ २१ ॥

अप्राप्तधर्माऽपि पुरादिमार्हन्-माता शिवं यद्भगवत्यवाप ।
नाप्नोति पारं वचसोऽनुपाधि-समाधिसाम्यस्य विजृम्भितं तत् २२

इति शुभमतिर्मत्वा साम्यप्रभावमनुत्तरं
य इह निरतो नित्यानन्दः कदापि न खिद्यते ।
विगलदखिलाविद्यः पूर्णस्वभावसमृद्धिमान्
स खलु लभते भावारीणां जयेन यशःश्रियम् ॥ २३ ॥

# ॥ प्रतिमाशतकम् ॥

ऐन्द्रश्रेणिनता प्रतापभवनं भव्याङ्गिनेत्रामृतं,
सिद्धान्तोपनिषद्विचारचतुरैः प्रीत्या प्रमाणीकृता ।
मूर्त्तिः स्फुर्त्तिमती सदा विजयते जैनेश्वरी विस्फुरन्
मोहोन्मादघनप्रमादमदिरामत्तैरनालोकिता ॥ १ ॥

नामादित्रयमेव भावभगवत्ताद्रूप्यधीकारणं,
शास्त्रात्स्वानुभवाच्च शुद्धहृदयैरिष्टं च दृष्टं मुहुः ।
तेनार्हत्प्रतिमामनादृतवतां भावं पुरस्कुर्वता-
मन्धानामिव दर्पणे निजमुखालोकार्थिनां का मतिः ॥ २ ॥

लुप्तं मोहविषेण किं किमु हतं मिथ्यात्वदम्भोलिना,
मग्नं किं कुनयावटे किमु मनो लीनं तु दोषाकरे ।
प्रज्ञप्तौ प्रथमं नतां लिपिमपि ब्राह्मीमनालोकयन्,
वन्द्याऽर्हत्प्रतिमा न साधुभिरिति ब्रूते यदुन्मादवान् ॥ ३ ॥

किं नामस्मरणेन न प्रतिमया किंवा भिदा कानयोः,
सम्बन्धः प्रतियोगिना न सदृशो भावेन किंवा द्वयोः ।
तद्द्वन्द्वं द्वयमेव वा जडमते ! त्याज्यं द्वयं वा त्वया,
स्यात्तर्कादत एव लुम्पकमुखे दत्तो मषीकूर्चकः ॥ ४ ॥

स्वान्तं ध्वान्तमयं मुखं विषमयं दृग्धूमधारामयी,
तेषां यैर्न नता स्तुता न भगवन्मूर्तिर्न वा प्रेक्षिता ।
देवैश्चारणपुङ्गवैः सहृदयैरानन्दितैर्वन्दितां,
ये त्वेनां समुपासते कृतधियस्तेषां पवित्रं जनुः ॥ ५ ॥

प्रज्ञप्तौ प्रतिमानतिर्न विदिता किं चारणैर्निर्मिता,
तेषां लब्ध्युपजीवनाद्विकटनाभावात्त्वनाराधना ।
सा कृत्याकरणादकृत्यकरणाद्भग्नव्रतत्वं भवे-
दित्येता विलसन्ति सन्नयसुधासारा बुधानां गिरः ॥ ६ ॥

तेषां न प्रतिमानतिः स्वरसतो लीलानुषङ्गात्तु सा,
लब्ध्याप्तादिति कालकूटकवलोद्गारा गिरः पाप्मनाम् ।
हन्तैवं न कथं नगादिषु नतिर्व्यक्ता कथं चेह सा,
चैत्यानामिति तर्ककर्कशगिरा स्यात्तन्मुखं मुद्रितम् ॥ ७ ॥

ज्ञानं चैत्यपदार्थमाह न पुनर्मूर्त्ति प्रभोर्यो द्विषन्,
वन्द्यं तत्तदपूर्ववस्तुकलनाद्दृष्टार्थसंचार्यपि ।
धातुप्रत्ययरूढिवाक्यवचनव्याख्यामजानन्नसौ,
प्रज्ञावत्सु जडः श्रियं न लभते काको मरालेष्विव ॥ ८ ॥

अर्हच्चैत्यमुनीन्दुनिश्रिततया शक्रासनक्ष्मावधि,
प्रज्ञप्तौ भगवाञ्जगाद चमरस्योत्पातशक्तिं ध्रुवम् ।
जैनीं मूर्तिमतो न योऽत्र जिनवज्जानाति जानाति क-
स्तं मर्त्यं बत शृङ्गपुच्छरहितं स्पष्टं पशुं पण्डितः ॥ ९ ॥

मूर्तीनां त्रिदशैस्तथा भगवतां सक्थ्नां सदाऽऽशातना
त्यागो यत्र विधीयते जगति सा ख्याता सुधर्मा सभा ।
इत्यन्वर्थविचारणापि हरते निद्रां दृशोर्दुर्नय-
ध्वान्तच्छेदरविप्रभा जडधियं घूकं विना कस्य न ॥ १० ॥

प्राक्पश्चाच्च हितार्थतां हृदि विदन् तैस्तैरुपायैर्यथा,
मूर्तीः पूजितवान्मुदा भगवतां सूर्याभनामा सुरः ।

याति प्रच्युतवर्णकर्णकुहरे तप्तत्रपुत्वं नृप
प्रश्नोपाङ्गसमर्थिता हतधियां व्यक्ता तथा पद्धतिः ॥ ११ ॥

नात्र प्रेत्य हितार्थतोच्यत इति व्यक्ता जिनार्चास्थिति
र्देवानां न तु धर्महेतुरिति ये पूत्कुर्वते दुर्धियः ।
प्राक् पश्चादिव रम्यतां परभवश्रेयोऽर्थितासङ्गतां,
प्राक् पश्चाच्च हितार्थितां श्रुतवतां पश्यन्त्यहो ते न किम् ॥ १२ ॥

वाप्यादेरिव पूजना दिविषदां मूर्तेर्जिनानां स्थितिः,
सादृश्यादिति ये वदन्ति कुधियः पश्यन्ति भेदं तु न ।
एकत्वं यदि ते वदन्ति निजयोः स्त्रीत्वेन जायाम्बयो-
स्तत्को वा यततामसंवृततरं वक्त्रं पिधातुं बुधः ॥ १३ ॥

सद्धर्मव्यवसायपूर्वकतया शक्रस्तवप्रक्रिया-
भावभ्राजितहृद्यपद्यरचनालोकप्रणामैरपि ।
ईक्षन्तेऽतिशयं न चेद्भगवतां मूर्त्यर्चने स्वःसदां,
बालास्तत्पथि लौकिकेऽपि शपथप्रत्यायनीया न किम् ॥ १४ ॥

भव्योऽभ्यग्रगबोधिरल्पभवभाक् सद्दृष्टिराराधको,
यश्चोक्तश्चरमोऽर्हता स्थितिरहो सूर्याभनाम्नोऽस्य या ।
सा कल्पस्थितिवन्न धर्मपरतामत्येति भावान्वयात्,
मा कार्षुर्भ्रममत्र केऽपि पिशुनैः शब्दान्तरैर्वञ्चिताः ॥ १५ ॥

सद्भक्त्यादिगुणान्वितानपि सुरान् सम्यग्दृशो ये ध्रुवं,
मन्यन्ते स्म विधर्मणो गुरुकुलभ्रष्टा जिनार्चाद्विषः ।
देवाशातनयाऽनया जिनमतान्मातङ्गवल्लेभिरे,
स्थानाङ्गप्रतिषिद्धया विहितया ते सर्वतो बाह्यताम् ॥ १६ ॥

शक्रेऽवग्रहदातृता व्रतभृतां निष्पापवाग्भाषिता,
सच्छर्माद्यभिलाषिता च गदिता प्रज्ञप्तिसूत्रे स्फुटम् ।
इत्युच्चैरतिदेशपेशलमतिः सम्यग्दृशां स्वःसदां,
धर्मित्वप्रतिभूः खलस्खलनकृद्धर्मस्थितिं जानताम् ॥ १७ ॥

देवानामपि भक्तिकृत्यमपि न श्लाघ्यं यतीनां यतः,
सूर्याभः कृतनृत्यदर्शनरुचिप्रश्नोऽर्हता ऽनादृतः ।
हन्तेयं जडचातुरी गुरुकुले कुत्र त्वया शिक्षिता,
सर्वत्रापि हि पण्डितैरनुमतं येनानिषिद्धं स्मृतम् ॥ १८ ॥

इच्छा स्वस्य न नृत्यदर्शनविधौ स्वाध्यायभङ्गः पुनः,
साधूनां त्रिदशस्य चातिशयिनी भक्तिर्भवध्वंसिनी ।
तुल्यायव्ययतामिति प्रतियता तूष्णींस्थितं स्वामिना,
बाह्यस्तत्प्रतिषेधको न कलयेत्तद्वंशजानां स्थितिम् ॥ १९ ॥

सावद्यं व्यवहारतोऽपि भगवान् साक्षात् किलानादिशन्,
बल्यादिप्रतिमार्चनादि गुणकृन्मौनेन संमन्यते ।
नत्यादि द्युसदां तदाचरणतः कर्त्तव्यमाह स्फुटं,
योग्येच्छामनुगृह्य वा व्रतमतश्चित्रो विभोर्वाक्क्रमः ॥ २० ॥

दानादाविव भक्तिकर्मणि विभुर्दोषान्निषेधे विधौ,
मौनी स्यादिति गीर्मृषैव कुधियां दुष्टे निषेधस्थितेः ।
अन्यत्र प्रतिबन्धतोऽनभिमतत्यागानुपस्थापनात्,
प्रज्ञाप्ये विनयान्विते विफलताद्द्वेषोदयासंभवात् ॥ २१ ॥

ज्ञातैः शल्यविशादिभिर्नु भरतादीनां निषिद्धा यथा,
कामा नो जिनसद्मकारणविधिर्व्यक्तं निषिद्धस्तथा ।

तीर्थेशानुमते परानुमतेर्द्रव्यस्तवे किं ततो,
नेष्टा चेज्ज्वरिणां ततः किमु सिता माधुर्यमुन्मुञ्चति ॥ २२ ॥

साधूनां वचनं च चैत्यनमनश्लाघार्चनोद्देशतः,
कायोत्सर्गविधायकं ह्यनुमतिं द्रव्यस्तवस्याह यत् ।
तत्किं लुम्पक ! लुम्पतस्तव भयं दुःखौघहालाहल-
ज्वालाजालमये भवाहिवदने पातेन नोत्पद्यते ॥ २३ ॥

किं हिंसानुमतिर्न संयमवतां द्रव्यस्तवश्लाघये-
त्येतल्लुम्पकलुब्धकस्य वचनं मुग्धे मृगे वागुरा ।
हृद्याधाय सरागसंयम इव त्यक्ताश्रवांशाः स्थिता,
भावाङ्गांशमदूषणा इति पुनस्तच्छेदशस्त्रं वचः ॥ २४ ॥

मिश्रस्यानुपदेश्यता यदि तदा श्राद्धस्य धर्मस्तथा,
सर्वः स्यात्सदृशी नु दोषघटना सौत्रक्रमोल्लङ्घनात् ।
तत्सम्यग्विधिभक्तिपूर्वमुचितद्रव्यस्तवस्थापने,
विघ्नो नापरमत्र लुम्पकमुखम्लानिं विना दूषणम् ॥ २५ ॥

नाशंसानुमतिर्दयापरिणतिस्थैर्यार्थमुद्यच्छतां,
संवासानुमतिस्त्वनायतनतो दूरस्थितानां कथम् ।
हिंसाया अनिषेधनानुमतिरप्याज्ञास्थितानां न यत्,
साधूनां निरवद्यमेव तदिदं द्रव्यस्तवश्लाघनम् ॥ २६ ॥

साधूनामनुमोद्यमित्यथ न किं कर्त्तव्यमर्चादिकं,
सत्यं केवलसाहचर्यकलनान्नेष्टाऽनुमानप्रथा ।
व्याप्तिः क्वापि गता स्वरूपनिरयाचारादुपाधेस्तवं,
क्लीबस्येव वृथा वधूनिधुवने तद्बाल ! तर्के रतिः ॥ २७ ॥

दुग्धं सर्पिरपेक्षते न तु तृणं साक्षाद्यथोत्पत्तये,
द्रव्यार्चानुमतिप्रभृत्यपि तथा भावस्तवो न त्विमाम् ।
इत्येवं शुचिशास्त्रतत्त्वमविदन् यत्किञ्चिदापादयन्,
किं मत्तोऽसि पिशाचकी किमथवा किं वातकी पातकी ॥ २८ ॥

द्रव्यार्चामवलम्बते न हि मुनिस्तर्तुं समर्थो जलं,
बाहुभ्यामिव काष्ठमत्र विषमं नैतावता श्रावकः ।
बाहुभ्यां भववारि तर्तुमपटुः काष्ठोपमां नाश्रयेद्
द्रव्यार्चामपि विप्रतारकगिरा भ्रान्तीरनासादयन् ॥ २९ ॥

अक्षीणाविरतिज्वरा हि गृहिणो द्रव्यस्तवं सर्वदा,
सेवन्ते कटुकौषधेन सदृशं नानीदृशाः साधवः ।
इत्युच्चैरधिकारिभेदमविदन् बालो वृथा खिद्यते,
नैतस्य प्रतिमाद्विषो व्रतशतैर्मुक्तिः परं विद्यते ॥ ३० ॥

वैतृष्ण्यादपरिग्रहस्य दृढता दानेन धर्मोन्नतिः,
सद्धर्मव्यवसायतश्च मलिनारम्भानुबन्धच्छिदा ।
चैत्यानत्युपनम्रसाधुवचसामाकर्णनात्कर्णयो-
रक्ष्णोश्चामृतमञ्जनं जिनमुखज्योत्स्नासमालोकनात् ॥ ३१ ॥

नानासङ्घसमागमात्सुकृतवत्सद्गन्धहस्तिव्रज-
स्वस्तिप्रश्नपरम्परापरिचयादप्यद्भुतोद्भावना ।
वीणावेणुमृदङ्गसङ्गमचमत्काराच्च नृत्योत्सवे,
स्फारार्हद्गुणलीनताभिनयनाद्भेदभ्रमप्लावना ॥ ३२ ॥

पूजापूजकपूज्यसङ्गतगुणध्यानावधानक्षणे,
मैत्री सत्त्वगणेष्वनेन विधिना भव्यः सुखी स्तादिति ।

वैरव्याधिविरोधमत्सरमदक्रोधैश्च नोपप्लव-
स्तत्को नाम गुणो न दोषदलनो द्रव्यस्तवोपक्रमे ॥ ३३ ॥

सत्तन्त्रोक्तदशत्रिकादिकविधौ सूत्रार्थमुद्राक्रिया
योगेषु प्रणिधानतो व्रतभृतां स्याद्भावयज्ञो ह्ययम् ।
भावापद्विनिवारणाद्बहुगुणे ह्यप्यत्र हिंसामति-
र्मूढानां महती शिला खलु गले जन्मोदधौ मज्जताम् ॥ ३४ ॥

सम्यग्दृष्टिरयोगतो भगवतां सर्वत्र भावापदं,
भेत्तुं तद्भवने तदर्चनविधिं कुर्वन्न दुष्टो भवेत् ।
वाहिन्युत्तरणोद्यतो मुनिरिव द्रव्यापदं निस्तरन्,
वैषम्यं किमिहेति हेतुविकलः शून्यं परं पश्यतु ॥ ३५ ॥

नो नद्युत्तरणे मुनेर्नियमनाद्वैषम्यमिष्टं यतः,
पुष्टालम्बनकं न तन्नियमितं किंतु श्रुते रागजम् ।
अस्मिन् सत्त्ववधे वदन्ति किल येऽशक्यप्रतीकारतां,
तैर्निन्दामि पिबामि चाम्भ इति हि न्यायः कृतार्थः कृतः ॥ ३६ ॥

यन्नद्युत्तरणं प्रवृत्तिविषयो ज्ञानादिलाभार्थिनां,
दुष्टं तद्यदि तत्र कः खलु विधिव्यापारसारस्तदा ।
तस्मादीदृशकर्मणीहितगुणाधिक्येन निर्दोषतां,
ज्ञात्वापि प्रतिमार्चनात्पशुरिव त्रस्तोऽपि किं दुर्मते ! ॥ ३७ ॥

गर्त्तादङ्गविघर्षणैरपि सुतं मातुर्यथाऽहेर्मुखात्,
कर्षन्त्या न हि दूषणं ननु तथा दुःखानलार्चिर्भृतात् ।
संसारादपि कर्षतो बहुजनान् द्रव्यस्तवोद्योगिन-
स्तीर्थस्फातिकृतो न किञ्चन मतं हिंसांशतो दूषणम् ॥ ३८ ॥

एतेनैव समर्थिता जिनपतेः श्रीनाभिभूपान्वय-
व्योमेन्दोः सुतनीवृतां विभजना शिल्पादिशिक्षापि च ।
अंशोऽस्यां बहुदोषबारणमतिश्रेष्ठो हि नेष्टोऽपरो,
न्यायोऽसावपि दुर्मतद्रुमवनप्रोद्दामदावानलः ॥ ३९ ॥

किं योग्यत्वमकृत्स्नसंयमवतां पूजासु पूज्या जगुः,
श्राद्धानां न महानिशीथसमये भक्त्या त्रिलोकीगुरोः ।
नन्दीदर्शितसूत्रवृन्दविदितप्रामाण्यमुद्राभृतो,
निद्राणेषु पतन्ति डिण्डिमडमत्कारा इवैता गिरः ॥ ४० ॥

यद्दानादिचतुष्कतुल्यफलता संकीर्त्तनं या पुन-
र्द्वौ श्राद्धस्य परो मुनेः स्तव इति व्यक्ता विभागप्रथा ।
यच्च स्वर्णजिनौकसः समधिकौ प्रोक्तौ तपःसंयमौ,
तत्सर्वं प्रतिमार्चनस्य किमु न प्राग्धर्मताख्यापकम् ॥ ४१ ॥

प्रामाण्यं न महानिशीथसमये प्राचामपीत्यप्रियं,
यत्तुर्याध्ययने न तत्परिमितैः केषाञ्चिदालापकैः ।
वृद्धास्त्वाहुरिदं न सातिशयमित्याशङ्कनीयं क्वचित्,
तत्किं पाप ! तवापदः परगिरां प्रामाण्यतो नोदिताः ॥ ४२ ॥

भ्रष्टैश्चैत्यकृतेऽर्थितः कुवलयाचार्यो जिनेन्द्रालये,
यद्यप्यस्ति तथाप्यदः सतम इत्युक्त्वा भवं तीर्णवान् ।
एतत् किं नवनीतसारवचनं नो मानमायुष्मतां,
यत्कुर्वन्ति महानिशीथबलतो द्रव्यस्तवस्थापनम् ॥ ४३ ॥

भ्रान्त प्रान्तधिया किमेतदुदितं पूर्वापरानिश्चयात्,
येन स्वश्रमक्लृप्तचैत्यममता मूढात्मनां लिङ्गिनाम् ।

उन्मार्गस्थिरता न्यषेधि न पुनश्चैत्यस्थितिः सूरिणा,
वाग्भङ्गी किमु यद्यपीति न मुखं वक्रं विधत्ते तव ॥ ४४ ॥

यत्कर्मापरदोषमिश्रिततया शास्त्रे विगीतं भवेत्,
स्वाभीष्टार्थलवेन शुद्धमपि तल्लुम्पन्ति दुष्टाशयाः ।
मध्यस्थास्तु पदे पदे धृतधियः संबध्य सर्वं बुधाः,
शुद्धाशुद्धविवेकतः स्वसमयं निःशल्यमातन्वते ॥ ४५ ॥

तेनाकोविदकल्पितश्चरणभृद्यात्रानिषेधोद्यत-
श्रीवज्रार्यनिदर्शनेन सुमुनेर्यात्रानिषेधो हतः ।
स्वाच्छन्द्येन निवारिता खलु यतश्चन्द्रप्रभस्यानतिः,
प्रत्यज्ञायि महोत्तरं पुनरियं सा तैः स्वशिष्यैः सह ॥ ४६ ॥

नो यात्रा प्रतिमानतिर्व्रतभृतां साक्षादनादेशनात्,
तत्प्रश्नोत्तरवाक्य इत्यपि वचो मोहज्वरावेशजम् ।
मुख्यार्थैः प्रथिता यतो व्यवहृतिः शेषान् गुणान् लक्षयेत्,
सामग्र्येण हि यावताऽस्ति यतना यात्रा स्मृता तावता ॥ ४७ ॥

वैयावृत्यतया तपो भगवतां भक्तिः समग्राऽपि वा,
वैयावृत्यमुदाहृतं हि दशमे चैत्यार्थमङ्गे स्फुटम् ।
नैतत्स्यादशनादिनैव भजनाद्वाराऽपि किं त्वन्यथा,
सङ्घादेस्तदुदीरणे बत कथं न व्याकुलः स्यात्परः ॥ ४८ ॥

ज्ञानं चैत्यपदार्थमत्र वदतः प्रत्यक्षबाधैकतो,
धर्मिद्वारतया मुनावधिकृते त्वाधिक्यधीरन्यतः ।
दोषायेति परः परः शतगुणप्रच्छादनात् पातकी,
दग्धां गच्छतु पृष्ठतश्च पुरतः कां कांदिशीको दिशम् ॥ ४९ ॥

वैयावृत्त्यमथैवमापतति वस्तुर्ये गुणस्थानके,
यस्माद्भक्तिरभङ्गुरा भगवतां तत्रापि पूजाविधौ ।
सत्यं दर्शनलक्षणेऽत्र विदितेऽनन्तानुबन्धिव्ययान्-
नो हानिं त्वयि निर्मलां धियमिव प्रेक्षामहे कामपि ॥ ५० ॥

श्राद्धानां तपसः परं गुणतया सम्यक्त्वमुख्यत्वतः,
सम्यक्त्वाङ्गमियं तपस्विनि मुनौ प्राधान्यमेषाऽश्नुते ।
धीर्लीलाङ्गतयोपसर्जनविधां धत्ते यथा शैशवे,
तारुण्ये व्यवसायसंभृततया सा मुख्यतामञ्चति ॥ ५१ ॥

अर्थं काममपेक्ष्य धर्ममथबा निघ्नन्ति ये प्राणिनः,
प्रश्नव्याकरणे हि मन्दमतयस्ते दर्शितास्तत्कथम् ।
पुष्पाम्भोदहनादिजीववधतो निष्पाद्यमानां सुरै(जनैः),
पूजां धर्मतया प्रसह्य वदतां जिह्वा न नः कम्पताम् ? ॥ ५२ ॥

भोः पापा भवतां भविष्यति जगद्वैद्योक्तिशङ्काभृतां,
किं मिथ्यात्वमरुत्प्रकम्पवशतः सर्वाङ्गकम्पोऽपि न ।
यो धर्माङ्गतया वधः कुसमये दृष्टोऽत्र धर्माथिका,
सा हिंसा न तु सत्क्रियास्थितिरिति श्रद्धैव सद् भेषजम् ॥ ५३ ॥

यागीयो वध एव धर्मजनकः प्रोक्तः परैः स्वागमे,
नास्मिन्नौघनिषेधदर्शितफलं कार्यान्तरार्थाश्रिते ।
दाहे क्वापि यथा सुवैद्यकबुधैरुत्सर्गतो वारिते,
धर्मत्वेन धृतोऽप्यधर्मफलको धर्मार्थकोऽयं वधः ॥ ५४ ॥

अस्माकं त्वपवादमाकलयतां दोषोऽपि दोषान्तरो-
च्छेदी तुच्छफलेच्छया विरहितश्चोत्सर्गरक्षाकृते ।

यागादावपि सत्त्वशुद्धिफलतो नेयं स्थितिर्दुष्टतः,
श्येनादेरिव सत्त्वशुद्ध्यनुदयात्तत्संभवादन्यतः ॥ ५५ ॥

नन्वेवं किमु पूजयापि भवतां सिध्यत्यवद्योज्झिता-
द्भावापद्विनिवारणोचितगुणः सामायिकादेरपि ।
सत्यं योऽधिकरोति दर्शनगुणोल्लासाय वित्तव्यये,
तस्येयं महते गुणाय विफलो हेतुर्न हेत्वन्तरात् ॥ ५६ ॥

अन्यारम्भवतो जिनार्चनविधावारम्भशङ्काभृतो,
मोहः शासननिन्दनं च विलयो बोधेश्च दोषाः स्मृताः ।
सङ्काशादिवदिष्यते गुणनिधिर्धर्मार्थमृद्ध्यर्जनं,
शुद्धालम्बनपक्षपातनिरतः कुर्वन्नुपेत्यापि हि ॥ ५७ ॥

यः श्राद्धोऽपि यतिक्रियारतमतिः सावद्यसंक्षेपकृत्,
भीरुः स्थावरमर्दनाच्च यतनायुक्तः प्रकृत्यैव च ।
तस्यात्रानधिकारितां वयमपि ब्रूमो वरं दूरतः,
पङ्कास्पर्शनमेव तत्कृतमलप्रक्षालनापेक्षया ॥ ५८ ॥

धमार्थं सृजतां क्रियां बहुविधां हिंसा न धर्मार्थिका,
हिंसांशे न यतः सदाशयभृतां वाञ्छा क्रियांशे परम् ।
न द्रव्याश्रवतश्च बाधनमपि स्वाध्यात्मभावोन्नते-
रारम्भादिकमुच्यते हि समये योगस्थितिव्यापकम् ॥ ५९ ॥

पूजायां खलु भावकारणतया हिंसा न बन्धावहा,
गौणीत्थं व्यवहारपद्धतिरियं हिंसा वृथा निश्चये ।
भावः केवलमेक एव फलदो बन्धोऽविरत्यंशजस्-
त्वन्यः कूपनिदर्शनं तत इहाशङ्कापदं कस्यचित् ॥ ६० ॥

अत्रास्माकमिदं हृदि स्फुरति यद्द्रव्यस्तवे दूषणं,
वैगुण्येन विधेस्तदप्युपहतं भक्त्येति हि ज्ञापनम् ।
कूपज्ञातफलं यतोऽविधियुताप्युक्तक्रिया मोक्षदा,
भक्त्यैव व्यवधानतः श्रुतधराः शिष्टाः प्रमाणं पुनः ॥ ६१ ॥

धर्मार्थः प्रतिमार्चनं यदि वधः स्यादर्थदण्डस्तदा,
तत्किं सूत्रकृते न तत्र पठितो भूताहियक्षार्थवत् ।
या हिंसा खलु जैनमार्गविदिता सा स्यान्निषेध्या स्फुटं,
नाधाकर्मिकवन्निहन्तुमिह किं दोषं प्रसङ्गोद्भवम् ॥ ६२ ॥

आनन्दस्य हि सप्तमाङ्गवचसा हित्वा परिव्राड्वर-
श्राद्धस्य प्रथितौपपातिकगिरा चैत्यान्तरोपासनाम् ।
अर्हच्चैत्यनतिं विशिष्य विहितां श्रुत्वा न यो दुर्मतिं,
स्वान्तान्मुञ्चति नाश्रयप्रियतया कर्माणि मुञ्चन्ति तम् ॥ ६३ ॥

प्रश्नव्याकरणे सुवर्णगुलिकासम्बन्धनिर्धारणे,
शस्ते कर्मणि दिग्द्वयग्रहरहःख्यातौ तृतीयाङ्गतः ।
सम्यग्भावितचैत्यसाक्षिकमपि स्वालोचनाज्ञा श्रुतौ,
सूत्राच्च व्यवहारतो भवति नः प्रीतिर्जिनेन्द्रे स्थिरा ॥ ६४ ॥

तीर्थेशप्रतिमार्चनं कृतवती सूर्याभवद्भक्तितो,
यत् कृष्णा परदर्पमाथि तदिदं षष्ठाङ्गविस्फूर्जितम् ।
सच्चक्रे खलु या न नारदमृषिं मत्वा व्रतासंयतं,
मूढानामुपजायते कथमसौ न श्राविकेति भ्रमः ॥ ६५ ॥

तत्पाणिग्रहणोत्सवे कृतमिति प्रौढ्या प्रमाणं न चेत्,
स्वःसन्निर्मितवन्दनादिकमपि स्थित्युत्सवे किं तथा ।

क्लिष्टेच्छाविरहो द्वयोरपि समस्तुल्यश्च भक्तेर्गुणो,
नागादिप्रतिमार्चनादिह खलु व्यक्ता विशेषप्रथा ॥ ६६ ॥

एतेनैव समर्थिताऽभ्युदयिकी धर्म्या च कल्पोदिता,
श्रीसिद्धार्थनृपस्य यागकरणप्रौढिर्दशाहोत्सवे ।
श्राद्धः खल्वयमादिमाङ्गविदितो यागं जिनार्चां विना,
कुर्यान्नान्यमुदाहृता व्रतभृतां त्याज्या कुशास्त्रस्थितिः ॥ ६७ ॥

इत्येवं शुचिसूत्रवृन्दविदिता निर्युक्तिभाष्यादिभिः,
सन्न्यायेन समर्थिता च भगवन्मूर्त्तिः प्रमाणं सताम् ।
युक्तिस्त्वन्धपरम्पराश्रयहता मा जाघटीद्दुर्धिया-
मेतद्दर्शनवञ्चिता दृगपि किं शून्येव न भ्राम्यति ॥ ६८ ॥

प्राप्या नूनमुपक्रिया प्रतिमया नो काऽपि पूजाकृता,
चैतन्येन विहीनया तत इयं व्यर्थेति मिथ्या मतिः ।
पूजा भावत एव देवमणिवत् सा पूजिता शर्मदे-
त्येतत्तन्मतगर्वपर्वतभिदा वज्रं बुधानां वचः ॥ ६९ ॥

वन्द्याऽस्तु प्रतिमा तथापि विधिना सा कारिता मृग्यते,
स प्रायो विरलस्तथा च सकलं स्यादिन्द्रजालोपमम् ।
हन्तैवं यतिधर्मपौषधमुखश्राद्धक्रियादेर्विधे-
दौर्लभ्येन तदस्ति किं तव न यत्स्यादिन्द्रजालोपमम् ॥ ७० ॥

योगाराधनशंसनैरथ विधेर्दोषः क्रियायां न चेत्,
तत्किं न प्रतिमास्थलेऽपि सदृशं प्रत्यक्षमुद्वीक्षते ।
किंचोक्ता गुरुकारितादिविषयं त्यक्त्वाग्रहं भक्तितः,
सर्वत्राप्यविशेषतः कृतिवरैः पूज्याकृतेः पूज्यता ॥ ७१ ॥

चैत्यानां खलु निश्रितेतरतया भेदेऽपि तन्त्रे स्मृतः,
प्रत्येकं लघुवृद्धवन्दनविधिः साम्ये तु यत्साम्प्रतम् ।
इच्छाकल्पितदूषणेन भजनासंकोचनं सर्वतः,
स्वाभीष्टस्य च वन्दनं तदपि किं शास्त्रार्थबोधोचितम् ॥ ७२ ॥

चैत्यानां न हि लिङ्गिनामिव नतिर्गच्छान्तरस्यो चिते-
त्येतावद्वचसैव मोहयति यो मुग्धाङ्गनानाग्रही ।
तेनावश्यकमेव किं न ददृशे वैषम्यनिर्णायकं,
लिङ्गे च प्रतिमासु दोषगुणयोः सत्त्वादसत्त्वात्तथा ॥ ७३ ॥

लिङ्गे स्वप्रतिबद्धधर्मकलनाद्ग्राज्या भवेद्वन्द्यता,
सैकान्तात्प्रतिमासु भावभगवद्भूयो गुणोद्बोधनात् ।
तुल्ये वस्तुनि पापकर्मरहिते भावोऽपि चारोप्यते,
कूटद्रव्यतया धृतेऽत्र न पुनर्मोहस्ततः कः सताम् ॥ ७४ ॥

नन्वेवं प्रतिमैकतां प्रवदतामिष्टा प्रतिष्ठाऽपि का,
सत्यं सात्मगतैव देवविषयोद्देशेन मुख्योदिता ।
यस्याः सा वचनानलेन परमा स्थाप्ये समापत्तितो,
दग्धे कर्ममले भवेत्कनकता जीवायसः सिद्धता ॥ ७५ ॥

बिम्बेऽसावुपचारतो निजहृदो भावस्य संकीर्त्यते,
पूजा स्याद्विहिता विशिष्टफलदा द्राक् प्रत्यभिज्ञाय याम् ।
तेनास्यामधिकारिता गुणवतां शुद्धाशयस्फूर्त्तये,
वैगुण्ये तु ततः स्वतोऽप्युपनतादिष्टं प्रतिष्ठाफलम् ॥ ७६ ॥

चैत्येऽनायतनत्वमुक्तमथ यत्तीर्थान्तरीयग्रहात्,
तत्किं तन्ननु दुर्मतिग्रहवशाद् दुष्टं श्रयामीति चेत् ।

साम्राज्ये घटमानमेतदखिलं चारित्रभाजां भवेत्,
पार्श्वस्थस्त्वसती सतीचरितवन्नो वक्तुमेतत्प्रभुः ॥ ७७ ॥

सर्वासु प्रतिमासु नाग्रहकृतं वैषम्यमीक्षामहे,
पूर्वाचार्यपरम्परागतगिरा शास्त्रीययुक्त्याऽपि च ।
इत्थं चाविधिदोषतापदलनं शक्ता विधातुं विधि
स्वैरोज्जागररागसागरविधुज्योत्स्नेव भक्तिप्रथा ॥ ७८ ॥

उत्फुल्लामिव मालतीं मधुकरो रेवामिवेभः प्रियां,
माकन्दद्रुममञ्जरीमिव पिकः सौन्दर्यभाजं मधौ ।
नन्दच्चन्दनचारुनन्दनवनीभूमीमिव द्योः पतिस्-
तीर्थेशप्रतिमां न हि क्षणमपि स्वान्ताद्विमुञ्चाम्यहम् ॥ ७९ ॥

मोहोद्दामदवानलप्रशमने पाथोदवृष्टिःशम-
श्रोतोनिर्झरिणी समीहितविधौ कल्पद्रुवल्लिः सताम् ।
संसारप्रबलान्धकारमथने मार्त्तण्डचण्डद्युति-
र्जैनी मूर्त्तिरुपास्यतां शिवसुखे भव्याः पिपासाऽस्ति चेत् ॥ ८० ॥

श्राद्धेन स्वजनुः फले जिनमतात्सारं गृहीत्वाऽखिलं,
त्रैलोक्याधिपपूजने कलुषता मोक्षार्थिना मुच्यताम् ।
धृत्वा धर्मधियं विशुद्धमनसा द्रव्यस्तवे त्यज्यताम्,
मिश्रोऽसाविति लम्बितः पथि परैः पाशोऽपि चाशोभनः ॥ ८१ ॥

भावेन क्रियया तयोर्ननु तयोर्मिश्रत्ववादे चतु-
र्भङ्ग्यां नादिम एकदाऽनभिमतं येनोपयोगद्वयम् ।
भावो धर्मगतः क्रियेतरगतेत्यल्पो द्वितीयःपुनर्-
भावादेव शुभात्क्रियागतरजोहेतुस्वरूपक्षयात् ॥ ८२ ॥

वाहिन्युत्तरणादिके परपदे चारित्रिणामन्यथा,
स्यान्मिश्रत्वमपापभावमिलितां पापक्रियां तन्वताम् ।
किंचाकेवलिनं क्वचार्य समये द्रव्याश्रवं भाषितं,
शुद्धं धर्ममपश्यतस्तनुधियः शोकः कथं गच्छति ॥ ८३ ॥

वाहिन्युत्तरणादिकेऽपि यतनाभागे विधि र्न क्रिया-
भागे ऽप्राप्तविधेयता हि गदिता तन्त्रेऽखिलैस्तान्त्रिकैः ।
हिंसा न व्यवहारतश्च गृहिवत्साधोरितीष्टं तु नो
मिश्रत्वं ननु नो मते किमिह तद्दोषस्य संकीर्त्तनम् ॥ ८४ ॥

हिंसा सद्व्यवहारतो विधिकृतः श्राद्धस्य साधोश्च नो,
सा लोकव्यवहारतस्तु विदिता बाधाकरी नोभयोः ।
इच्छाकल्पनयाऽभ्युपेत्य विहिते तथ्या तदुत्पादनो-
त्पत्तिभ्यां तु भिदा न कोऽपि नियतव्यापारके कर्मणि ॥ ८५ ॥

पूर्णेऽर्थेऽपि विधेयता वचनतः सिद्धा लिङर्थात्मिका,
भागे बुद्धिकृता यतः प्रतिजनं चित्रा स्मृता साऽऽकरे ।
नो चेज्जैनवचः क्रिया नयविधिः सर्वश्च मिश्रो भवे-
दित्थं भेदमयं न किं तव मतं मिश्राद्वयं लुम्पति ॥ ८६ ॥

भावोऽधर्मगतः क्रियेतरगतेत्यत्रापि भङ्गे कथं,
मिश्रत्वं तमधर्ममेव मुनयो भावानुरोधाद्विदुः ।
भक्त्यार्हत्प्रतिमार्चनं कृतवतां न स्पृश्यमानः पुन-
र्भावश्चित्तमिवाग्रहाविलधियां पापेन संलक्ष्यते ॥ ८७ ॥

धर्माधर्मगते क्रिये च युगपद्वृत्तो विरोधं मिथो,
नाप्येते प्रकृतस्थले क्वचिदतस्तुर्योऽपि भङ्गो वृथा ।

शुद्धाशुद्ध उदाहृतो ह्यविधिना योगोऽर्चनाद्यश्च यः,
सोऽप्येको व्यवहारदर्शनमतो नैव द्वयोर्मिश्रणात् ॥ ८८ ॥

भावद्रव्यतया द्विधा परिणतिः प्रस्पन्दरूपाः स्मृता,
योगास्तत्र तृतीयराश्यकथनादाद्येषु नो मिश्रता ।
नैवान्त्येष्वपि निश्चयादिति विषोद्गारः कथं ते भ्रमो,
निष्पीता किमु न क्षमाश्रमणगीः सद्भाष्यसिन्धोः सुधा ॥ ८९ ॥

मिश्रत्वे खलु योगभावविधया कुत्रापि कृत्ये भवे-
न्मिश्रं कर्म न बध्यते च शबलं तत्संक्रमात्स्यात्परम् ।
तद्द्रव्यस्तवमिश्रतां प्रवदता किं तस्य वाच्यं फलं,
स्वव्युद्ग्राहितमूढपर्षदि मदान्मूर्धानमाधुन्वता ॥ ९० ॥

सिद्धान्ते परिभाषितो हि गृहिणां मिश्रत्वपक्षस्ततो,
बन्धानौपयिको विरत्यविरतिस्थानान्वयोत्प्रेक्षया ।
अन्तर्भावित एव सोऽपि पुरतो धर्मे फलापेक्षया,
पूजापौषधतुल्यताऽस्य किमु न व्यक्ता विशेषेक्षिणाम् ॥ ९१ ॥

हिंसांशो यदि दोषकृत्तव जड ! द्रव्यस्तवे केन तन्
मिश्रत्वं यदि दर्शनेन किमु तद्भोगादिकालेऽपि न ।
भक्त्या चेन्ननु साऽपि का यदि मतो रागो भवाङ्गं तदा,
हिंसायामपि शस्तता नु सदृशीत्यत्रोत्तरं मृग्यते ॥ ९२ ॥

एतेनेदमपि व्यपास्तमपरे यत्प्राहुरज्ञाः परं,
पुण्यं कर्म जिनार्चनादि न पुनश्चारित्रवद्धर्मकृत् ।
तद्वत्तस्य सरागतां कलयतः पुण्यार्जनद्वारतो,
धर्मत्वं व्यवहारतो हि जननान्मोक्षस्य नो हीयते ॥ ९३ ॥

या ज्ञानाद्युपकारिता विधियुता शुद्धोपयोगोज्ज्वला,
सा पूजा खलु धर्म एव गदिता लोकोत्तरत्वं श्रिता ।
श्राद्धस्यापि सुपात्रदानवदितस्त्वन्यादृशीं लौकिकी-
माचार्या अपि दानभेदवदिमां जल्पन्ति पुण्याय नः ॥ ९४ ॥

पुण्यं कर्म सरागमन्यदुदितं धर्माय शास्त्रेष्विति,
श्रुत्वा शुद्धनयं न चात्र सुधियामेकान्तधीर्युज्यते ।
तस्माच्छुद्धतरश्चतुर्दशगुणस्थाने हि धर्मं नयः,
किं ब्रूते न तदङ्गतां त्वधिकृतेऽप्यभ्रान्तमीक्षामहे ॥ ९५ ॥

इत्येवं नयभङ्गहेतुगहने मार्गे मनीषोन्मिषेन्-
मुग्धानां करुणां विना न सुगुरोरुद्यच्छतां स्वेच्छया ।
तस्मात्सद्गुरुपादपद्ममधुपः स्वं संविदानो बलं,
सेवां तीर्थकृतां करोतु सुकृती द्रव्येण भावेन वा ॥ ९६ ॥

सेयं ते व्यवहारभक्तिरुचिता शङ्खेश्वराधीश ! यद्,
दुर्वादिव्रजदूषणेन पयसा शङ्कामलक्षालनम् ।
स्वात्मारामसमाधिबाधितभवैर्नास्माभिरुन्नीयते,
दूष्यं दूषकदूषणस्थितिरपि प्राप्तैर्नयं निश्चयम् ॥ ९७ ॥

दर्शं दर्शमवापमव्ययमुदं विद्योतमाना लसद्-
विश्वासं प्रतिमामकेन रहित ! स्वां ते सदानन्द ! याम् ।
सा धत्ते स्वरसप्रसृत्वरगुणस्थानोचितामानम-
द्विश्वासम्प्रति मामके नरहित ! स्वान्ते सदानं दयाम् ॥ ९८ ॥

त्वद्बिम्बे विधृते हृदि स्फुरति न प्रागेव रूपान्तरं,
त्वद्रूपे तु ततः स्मृते भुवि भवेन्नो रूपमात्रप्रथा ।

तस्मात्त्वन्मदभेदबुद्ध्युदयतो नो युष्मदस्मत्पदो-
ल्लेखः किञ्चिदगोचरं तु लसति ज्योतिः परं चिन्मयम् ॥ ९९ ॥

किं ब्रह्मैकमयी किमुत्सवमयी श्रेयोमयी किं किमु,
ज्ञानानन्दमयी किमुन्नतिमयी किं सर्वशोभामयी ।
इत्थं किं किमिति प्रकल्पनपरैस्त्वन्मूर्त्तिरुद्वीक्षिता,
किं सर्वातिगमेव दर्शयति सद्ध्यानप्रसादान्महः ॥ १०० ॥

त्वद्रूपं परिवर्त्ततां हृदि मम ज्योतिः स्वरूपं प्रभो !
तावद्यावदरूपमुत्तमपदं निष्पापमाविर्भवेत् ।
यत्रानन्दघने सुरासुरसुखं संपिण्डितं सर्वतो,
भागेऽनन्ततमेऽपि नैति घटनां कालत्रयीसंभवि ॥ १०१ ॥

स्वान्तं शुष्यति दह्यते च नयनं भस्मीभवत्याननं,
दृष्ट्वा तत्प्रतिमामपीह कुधियामित्याप्तलुप्तात्मनाम् ।
अस्माकं त्वनिमेषविस्मितदृशां रागादिमां पश्यतां,
सान्द्रानन्दसुधानिमज्जनसुखं व्यक्तीभवत्यन्वहम् ॥ १०२ ॥

मन्दारद्रुमचारुपुष्पनिकरैर्वृन्दारकैरर्चितां,
सद्वृन्दाभिनतस्य निर्वृतिलताकन्दायमानस्य ते ।
निस्यन्दात् स्नपनामृतस्य जगतीं पान्तीममन्दामयाऽ-
वस्कन्दात्प्रतिमां जिनेन्द्र ! परमानन्दाय वन्दामहे ॥ १०३ ॥

तपगणमुनिरुद्यत्कीर्त्तितेजोभृतां श्री-
नयविजयगुरूणां पादपद्मोपजीवी ।
शतकमिदमकार्षीद्वीतरागैकभक्तिः
प्रथितशुचियशःश्रीरुल्लसद्व्यक्तयुक्तिः ॥ १०४ ॥

# शास्त्रसन्देशमालाविंशतिभागमध्ये ग्रथितानां ग्रन्थानामकारादिक्रमः

(संख्यया भागा विज्ञेयाः)


## अ

अट्ठारसहस्सशीलंगरहा ( ५ )
अध्यात्मकल्पद्रुमः ( ९ )
अध्यात्मबिन्दुः ( १८ )
अध्यात्मसारः ( ४ )
अध्यात्मोपनिषत् ( ४ )
अनुमानमातृका ( १६ )
अनेकान्तव्यवस्थाप्रकरणस्य मङ्गलप्रशस्ति ( ५ )
अन्नायउंछकुलकम् ( ७ )
अन्ययोगव्यवच्छेदद्वात्रिंशिका ( १६ )
अन्योक्तिशतकम् ( ६ )
अन्तिमाऽऽराधना ( १४ )
अप्पविसोहिकुलयं ( ७ )
अभव्यकुलकम् ( ७ )
अष्टकानि ( ३ )

## आ

आउरपच्चक्खाणं-१ ( १५ )
आउरपच्चक्खाणं-२ ( १५ )
आख्यानकमणिकोशः ( ८ )
आचारोपदेशः ( ११ )
आत्मतत्त्वचिन्ताभावनाचूलिका ( ९ )
आत्मनिन्दाष्टकम् ( १४ )
आत्मप्रबोधः ( १७ )
आत्मबोधकुलकम् ( ७ )
आत्महितकुलकम् ( ७ )
आत्मानुशासनकुलकम् ( ७ )
आत्मानुशासनम् ( १४ )
आत्मानुशास्तिसंज्ञिका पञ्चविंशतिका ( १४ )
आत्मावबोधकुलकम् ( ७ )
आध्यात्मिकमतपरीक्षा ( ५ )
आभाणशतकम् ( ६ )
आराधकविराधकचतुर्भङ्गी ( ४ )
आराधना ( १४ )
आराहणा ( १४ )
आराहणाकुलयं ( ७ )
आराहणापडागा-१ ( १४ )
आराहणापडागा-२ ( १४ )
आराहणापणगं ( १४ )
आराहणापयरणं ( १४ )
आलोयणाकुलयं ( ७ )
आर्षभीयचरितमहाकाव्यम् ( ५ )

## ई

इंद्रियपराजयशतकम् ( ६ )
ईर्यापथिकीषट्त्रिंशिका ( १६ )
ईर्यापथिकीमिथ्यादुष्कृतकुलकम् ( ७ )

## उ

उत्पादादिसिद्धिः ( १६ )
उत्सूत्रपदोद्घाटनकुलकम् ( ७ )
उपदेशकल्पवल्लिः ( ११ )

उपदेशकुलकम्-१ ( ७ )
उपदेशकुलकम्-२ ( ७ )
उपदेशचिन्तामणिः ( १० )
उपदेशपद ( १ )
उपदेशप्रदीपः ( १२ )
उपदेशरत्नकोशः ( ८ )
उपदेशरत्नाकरः ( ८ )
उपदेश( धर्म )रसायनरासः ( ८ )
उपदेशरहस्यम् ( ४ )
उपदेशशतकम् ( ६ )
उपदेशसप्ततिका ( ८ )
उपदेशसप्ततिः ( ११ )
उपदेशसारः ( ११ )
उपदेशामृताकुलकम् ( ७ )
उपधानविधिः-१ ( १० )
उपधानविधिः-२ ( १० )
उवएसचउक्ककुलयं-१ ( ७ )
उवएसचउक्ककुलयं-२ ( ७ )
उवएसमाला ( ८ )

ऋ

ऋषभशतकम् ( ६ )
ऋषिमण्डलस्तवः ( १२ )

ए

एकविंशतिद्वात्रिंशिकाः ( १६ )
ऐन्द्रस्तुतयः ( ५ )

औ

औष्ट्रिकमतोत्सूत्रोद्घाटन कुलकम् ( ७ )

अं

अंगुलसत्तरी ( १३ )

क

कथाकोषः ( १२ )
कथानककोशः ( १२ )
कर्पूरप्रकरः ( १२ )
कर्मप्रकृतिः ( १३ )
कर्मविपाककुलकम् ( ७ )
कर्मविपाकाख्यः प्रथमः प्राचीनकर्मग्रन्थः ( १३ )
कर्मस्तवाख्यः द्वितीयः प्राचीनकर्मग्रन्थः ( १३ )
कम्मबत्तीसी ( १३ )
कविकल्पद्रुमः ( १८ )
कस्तूरीप्रकरः ( १२ )
कायस्थितिस्तोत्रम् ( १३ )
कालसप्ततिका ( १३ )
कालस्वरूपकुलकम् ( ७ )
कुमारविहारशतकम् ( ६ )
कूपदृष्टान्तविशदीकरणम् ( ५ )
कृष्णराजीविमानविचारः ( १३ )
केवलिभुक्तिप्रकरणम् ( १६ )

क्ष

क्षमाकुलकम् ( ७ )
क्षान्तिकुलकम् ( ७ )
क्षुल्लकभवावलि ( १३ )

ख

खामणाकुलयं ( १ ) ( ७ )
खामणाकुलयं ( २ ) ( ७ )

## ग

गणधरसार्धशतकम् ( ६ )
गाङ्गेयभङ्गप्रकरणम्-१ ( १५ )
गाङ्गेयभङ्गप्रकरणम्-२ ( १५ )
गुणस्थानक्रमारोहः ( १३ )
गुणानुरागकुलकम् ( ७ )
गुरुगुणषट्त्रिंशत्षट्त्रिंशिकाकुलकम् ( ७ )
गुरुतत्त्वप्रदीपः ( १६ )
गुरुतत्त्वविनिश्चयः ( ५ )
गुरुदर्शनहर्षकुलकम् ( ७ )
गुरुविरहविलापः ( १४ )
गोडीपार्श्वस्तवनम् ( ५ )
गौतमकुलकम् ( ७ )

## घ

घनगणितसंग्रहगाथाः ( १८ )

## च

चउसरणपइन्नयं ( १५ )
चतुर्गतिजीवक्षपणकानि ( १४ )
चतुर्दशजीवस्थानेषु जघन्योत्कृष्टपदे ( १३ )
चरणकरणमूलोत्तरगुण ( १८ )
चारित्रमनोरथमाला ( ८ )
चित्तशुद्धिफलम् ( १८ )
चेइयवंदणमहाभासं ( १० )
चंदावेज्झयं पइण्णयं ( १५ )

## ज

जघन्योत्कृष्टपद एककालं गुणस्थानकेषु ( १३ )
जल्पकल्पलता ( १६ )
जिनप्रतिमास्तोत्रम् ( १ )
जिनबिम्बप्रतिष्ठाविधिः ( १० )
जिनशतकम्-१ ( ६ )
जिनशतकम्-२ ( ६ )
जीवजोणिभावणाकुलयं ( ७ )
जीवदयाप्रकरणं ( ८ )
जीवसमासः ( १३ )
जीवादिगणितसंग्रहगाथाः ( १८ )
जीवानुशासनम् ( १४ )
जीवानुशास्तिकुलकम् ( ७ )
जीवाभिगमसंग्रहणी ( १५ )
जैनतत्त्वसारः ( १६ )
जैनस्याद्वादमुक्तावली ( १६ )
जोइसकरंडगं पइण्णयं ( १५ )

## ज्ञ

ज्ञाताधर्मकथोपनयगाथाः ( १५ )
ज्ञानप्रकाशकुलकम् ( ७ )
ज्ञानसारः ( ४ )
ज्ञानार्णवः ( ५ )

## त

तत्त्वतरङ्गिणी ( १६ )
तत्त्वबोधतरङ्गिणी ( १२ )
तत्त्वामृतम् ( ९ )
तपकुलकम् ( ७ )
तित्थोगालीपइन्नयं ( १५ )
त्रिशतत्रिषष्टिपाखण्डस्वरूपस्तोत्रम् ( १५ )
त्रिषष्टीयदेशनासंग्रहः ( ११ )

## द

दशश्रावककुलकम् ( ७ )

दर्शन नियमा कुलकम् ( ७ )
दानकुलकम् ( ७ )
दानविधिः ( १० )
दानषट्त्रिंशिका ( ९ )
दानादिप्रकरणम् ( १२ )
दानोपदेशमाला ( ८ )
दीवसागरपन्नत्ति ( १५ )
दृष्टान्तशतकम्-१ ( ६ )
दृष्टान्तशतकम्-२ ( ६ )
देवेन्द्रनरकेन्द्रप्रकरणम् ( १३ )
देशनाशतकम् ( ६ )
देहकुलकम् ( ७ )
देहस्थितिस्तवः ( १३ )
दंसणसुद्धिपयरणं ( १० )
द्वात्रिंशद्द्वात्रिंशिकाः ( ४ )
द्वादश-कुलकम् ( ७ )
द्वादशव्रतस्वरूपम् ( १० )
द्वादशाङ्गीपदप्रमाणकुलकम् ( ७ )

## ध

धनुःपृष्ठबाहासंग्रहगाथाः ( १८ )
धर्मपरीक्षा ( ५ )
धर्मबिन्दुः ( ३ )
धर्मरत्नप्रकरणम् ( १० )
धर्मरत्नकरण्डकः ( ११ )
धर्मविधिः ( ८ )
धर्मशिक्षा ( ९ )
धर्मसंग्रहणिः ( १ )
धर्मसंग्रहः ( ११ )
धर्माचार्यबहुमानकुलकम् ( ७ )
धर्मोद्यमकुलकम् ( ७ )
धर्मोपदेशः ( ९ )
धर्मोपदेशमाला ( ८ )
धम्मारिहगुणोवएसकुलयं ( ७ )
धर्म्मोपदेशकुलकम् ( ७ )
धम्मोवएसकुलयं ( ७ )
धूर्ताख्यानम् ( ३ )
धूमावली ( ३ )
ध्यानदीपिका ( १८ )
ध्यानशतकम् ( ६ )

## न

नन्दीश्वरस्तवः ( १३ )
नमस्कारस्तवः ( १८ )
नयकर्णिका ( १६ )
नयोपदेशः ( ५ )
नरभवदिट्ठंतोवणयमाला ( १२ )
नवकारफलकुलकम् ( ७ )
नवतत्त्वभाष्यम् ( १३ )
नवतत्त्वम् ( १३ )
नवतत्त्वसंवेदनम् ( १३ )
नवपदप्रकरणम् ( १० )
नानाचित्तप्रकरणम् ( ३ )
नारीशीलरक्षाकुलकम् ( ७ )
निगोदषट्त्रिंशिका ( १५ )
नूतनाचार्याय हितशिक्षा ( ९ )
नंदणरायरिसिस्स अन्तिमाऽऽराधना ( १४ )
न्यायखण्डखाद्याऽपरनामा महावीरस्तवः ( ५ )
न्यायावतारः ( १६ )

न्यायावतारसूत्रवार्तिकम् ( १६ )

### प

पज्जंताराहणा ( १४ )
पंचवत्थुगं ( २ )
पञ्चनिर्ग्रन्थी ( १५ )
पञ्चलिङ्गीपगरणं ( १५ )
पञ्चसङ्ग्रहः ( १३ )
पञ्चसंयतप्रकरणम् ( १५ )
पञ्चाशकानि ( १ )
पट्टावलीविसुद्धी ( १६ )
पडिलेहणाविचारकुलकम् ( ७ )
पदार्थस्थापनासंग्रह ( १७ )
पद्मानन्दशतकम् ( ६ )
परमज्योतिःपञ्चविंशतिका ( ५ )
परमाणुखण्डषट्त्रिंशिका ( १५ )
परमात्मपञ्चविंशतिका ( ५ )
परमानन्दपञ्चविंशतिः ( ९ )
पर्यन्ताराधनाकुलकम् ( ७ )
पर्युषणादशशतकम् ( १६ )
पव्वज्जाविहाणकुलयं ( ७ )
पिण्डविशुद्धिः ( १० )
पुण्डरीकतिर्थपतीस्तोत्रम् ( ५ )
पुण्यकुलकम् ( ७ )
पुद्गलपरावर्तस्तवनम् ( १३ )
पुद्गलषट्त्रिंशिका ( १५ )
पुष्पमाला ( ८ )
पूजाविधिः ( ११ )
पोसहविही ( १० )
पौषधषट्त्रिंशिका ( १६ )
प्रज्ञा[illegible]ोपाङ्गतृतीयपदसंग्रहणी ( १५ )
प्रतरप्रमाणसंग्रहगाथाः ( १८ )
प्रतिमाशतकम् ( ४ )
प्रतिसमयजागृतिकुलकम् ( ७ )
प्रत्याख्यानस्वरूपम् ( १० )
प्रबोधचिन्तामणिः ( ९ )
प्रभाते जीवानुशासनम् ( १४ )
प्रमाणनयतत्त्वालोकालङ्कारः ( १६ )
प्रमाणप्रकाशः ( १६ )
प्रमाणमीमांसा ( १६ )
प्रमादपरिहारकुलकम् ( ७ )
प्रवचनपरीक्षा ( १६ )
प्रवचनसारोद्धारः ( १७ )
प्रव्रज्याविधानकुलकम् ( ७ )
प्रशमरतिः ( ९ )
प्रश्नद्वात्रिंशिका ( १६ )
प्रश्नशतकम् ( ६ )
प्रश्नोत्तररत्नमाला ( १२ )
प्राकृतसंवेगामृतपद्धति ( १४ )
प्रातःकालिकजिनस्तुतिः ( ९ )

### ब

बन्धस्वामित्वाख्यः तृतीयः प्राचीनकर्मग्रन्थः ( १३ )
बन्धषट्त्रिंशिका ( १५ )
बन्धहेतुप्रकरणम् ( १३ )
बन्धहेतूदयभङ्गप्रकरणसमाप्तिगते द्वेप्रकरणे ( ५ )
बन्धोदयसत्ता ( १३ )
बृहद्वन्दनकभाष्यम् ( १० )

भ

भवभावना ( ८ )
भावकुलकम् ( ७ )
भावनाशतकम् ( ६ )
भावप्रकरणम् ( १३ )
भाषारहस्यम् ( ५ )
भोजनपूर्वचिन्तागाथा: ( ८ )

म

मंगलकुलयं ( ७ )
मण्डलप्रकरणम् ( १८ )
मदादिविपाककुलकम् ( ७ )
मनुष्यभवदुर्लभता ( ९ )
मनोनिग्रहभावनाकुलकम् ( ७ )
महासतीकुलकम् ( ७ )
मार्गपरिशुद्धि: ( ५ )
मार्ग्गणासु बंधहेतूदयत्रिभंगी ( १३ )
मिच्छदुक्कडवोसिरणविहिकुलयं ( ७ )
मिथ्यात्वकुलकम् ( ७ )
मिथ्यात्वमथनकुलकम् ( ७ )
मिथ्यात्वविचारकुलकम् ( ७ )
मिथ्यात्वस्थानविवरणकुलकम् ( ७ )
मुखवस्त्रिकास्थापनकुलकम् ( ७ )
मूलशुद्धि: ( १० )
मृत्युमहोत्सव: ( १४ )
मोक्षोपदेशपञ्चाशकम् ( ९ )

य

यतिदिनकृत्यम् ( ११ )
यतिदिनचर्या ( १० )
यतिलक्षणसमुच्चय: ( ४ )
यतिशिक्षापञ्चाशिका ( ८ )
यात्रास्तव: ( ११ )
युक्त्यनुशासनम् ( १६ )
युक्तिप्रकाश: ( १६ )
युक्तिप्रबोध: ( १६ )
युगपद्बन्धहेतुप्रकरणम् ( १३ )
योगदृष्टिसमुच्चय: ( ३ )
योगप्रदीप: ( १२ )
योगबिन्दु: ( ३ )
योगशतकम् ( ३ )
योगशास्त्रम् ( १८ )
योगानुष्ठानकुलकम् ( ७ )
योनिस्तव: ( १३ )

र

रत्नत्रयकुलकम् ( ७ )
रत्नसञ्चय: ( १७ )

ल

लघुप्रवचनसारोद्धार: ( १७ )
लघ्वल्पबहुत्व प्रकरणम् ( १३ )
लोकतत्त्वनिर्णय ( ३ )
लोकनालिकाद्वात्रिंशिका ( १३ )

व

वाक्यप्रकाश: ( १८ )
वाणारस्यां कृतं श्रीपार्श्वनाथजिनस्तोत्रम् ( ५ )
विचारपञ्चाशिका ( १३ )
विचारसप्ततिका ( १७ )
विचारसार: ( १७ )

विजयप्रभसूरिक्षामणकविज्ञप्तिः ( ५ )
विजयप्रभसूरिस्वाध्यायः ( ५ )
विजयोल्लासमहाकाव्यम् ( ५ )
विद्वद्गोष्ठी ( १२ )
विभक्तिविचारः ( १५ )
विरतिफलकुलकम् ( ७ )
विविधतपोदिनाङ्ककुलकम् ( ७ )
विवेककुलकम् ( ७ )
विवेकमञ्जरी ( ८ )
विशेष-णवतिः ( १५ )
विंशतिर्विंशिकाः ( ३ )
विषयविरक्तिकुलकम् ( ७ )
वीरस्तवः ( १५ )
वैराग्यकल्पलता ( १९+२० )
वैराग्यरसायनम् ( ८ )
वैराग्यशतकम् ( ६ )
व्यवहारकुलकम् ( ७ )
व्याख्यानविधिशतकम् ( ६ )

## श

शङ्खेश्वरपार्श्वजिनस्तोत्रम् ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम् ( ५ )
शङ्खेश्वरपार्श्वनाथस्तोत्रम् ( ५ )
शमीनपार्श्वस्तोत्रम् ( ५ )
शास्त्रवार्तासमुच्चयः ( ३ )
शीलकुलकम् ( ७ )
शीलोपदेशमाला ( ८ )
शोकनिवारणकुलकम् ( ७ )

## श्र

श्राद्धदिनकृत्यम् ( १० )
श्राद्धविधिः ( १० )
श्रावकधर्मकृत्यम् ( ११ )
श्रावकधर्मविधिः ( ३ )
श्रावकप्रज्ञप्तिः ( १० )
श्रावकव्रतभङ्गप्रकरणम् ( १८ )
श्रीकान्तत्रविभ्रमसूत्रम् ( १८ )
श्रीमद्गीता-तत्त्वगीता ( १८ )
श्रुतास्वादः ( ८ )
श्रृङ्गारवैराग्यतरङ्गिणी ( १२ )

## ष

षट्स्थानकम् ( १३ )
षडशीतिनामा चतुर्थः प्राचीनकर्मग्रन्थः ( १३ )
षड्दर्शनपरिक्रमः ( १६ )
षड्दर्शनसमुच्चयः-१ ( २ )
षड्दर्शनसमुच्चयः-२ ( १६ )
षड्द्रव्यसङ्ग्रहः ( १३ )
षड्विधाऽन्तिमाऽऽराधना ( १४ )
षष्ठिशतकम् ( ६ )
षोडशकप्रकरणम् ( ३ )

## स

संग्रहशतकम् ( ६ )
संज्ञाकुलकम् ( ७ )
संज्ञाधिकारः ( १८ )
संबोधप्रकरणम् ( २ )
संविज्ञसाधुयोग्यनियमकुलकम् ( ७ )

संवेगकुलयं ( ७ )
संवेगद्रुमकन्दली ( ९ )
संवेगमंजरीकुलयं ( ७ )
संवेगरंगमाला ( १४ )
संवेगामृत ( १८ )
सङ्घस्वरूपकुलकम् ( ७ )
सज्जनचित्तवल्लभः ( ९ )
सन्देहदोलावली ( १६ )
सभापञ्चकप्रकरणम् ( १८ )
सप्ततिकाभाष्यम् ( १३ )
समताशतकम् ( ६ )
समवसरणप्रकरणम् ( १३ )
समवसरणस्तोत्रम् ( १३ )
समाधिशतक ( ६ )
समाधिशतकम् ( ६ )
समाधिसाम्यद्वात्रिंशिका ( ४ )
सम्मतिसूत्रम् ( १६ )
सम्मत्तकुलयं-१ ( ७ )
सम्मत्तुप्पायविहीकुलकम् ( ७ )
सम्यक्त्वकुलकम्-२ ( ७ )
सम्यक्त्वकुलकम्-३ ( ७ )
सम्यक्त्वपरीक्षा ( १६ )
सम्यक्त्वसप्ततिः ( १० )
सम्यक्त्वस्वरूपकुलकम् ( ७ )
सर्वज्ञशतकम् ( ६ )
सर्वज्ञसिद्धिः ( २ )
सर्वतीर्थमहर्षिकुलकम् ( ७ )
सर्वश्रीजिनसाधारणस्तवनम् ( २ )
सार्धमिकवात्सल्यकुलकम् ( ७ )
सामाचारी ( ४ )
सामान्यगुणोपदेशकुलकम् ( ७ )
साम्यशतकम् ( ६ )
सारावलीपइण्णयं ( १५ )
सिद्धदण्डिकास्तवः ( १३ )
सिद्धपञ्चाशिका ( १३ )
सिद्धप्राभृतम् ( १३ )
सिद्धसहस्त्रनामकोशः ( ५ )
सिद्धान्तसारोद्धारः ( १८ )
सुक्ष्मार्थविचारसारोद्धारः ( १५ )
सुभाषिताष्टकानि ( १२ )
सुमिणसित्तरी ( ८ )
सूक्तरत्नावली ( १२ )
सूक्तरत्नावली ( १२ )
सूक्तिमुक्तावली ( १२ )
सूक्ष्मार्थसत्तरी प्रकरण ( १८ )
सूत्रकृताङ्गाद्यचतुरध्ययनाऽनुक्रमगाथा (१५)
स्तवपरिज्ञा ( १० )
स्त्रीनिर्वाणप्रकरणम् ( १६ )
स्त्रीवास्तविकताप्रकरणम् ( ८ )
स्याद्वाद कलिका ( १६ )
स्याद्वादभाषा ( १६ )
स्याद्वादमुक्तावली ( १६ )

ह

हिंसाफलाष्टक ( ३ )
हिओवएसमाला ( ८ )
हिङ्गुलप्रकरणम् ( १२ )
हृदयप्रदीपषट्त्रिंशिका ( ९ )

# ॥ शास्त्रसंदेशमाला ॥

१ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - १
२ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - २
३ पू. आ. श्रीहरिभद्रसूरीश्वराणां कृतयः - ३
४ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - १
५ पू. उपा. श्रीयशोविजयगणिवराणां कृतयः - २
६ शतकसंदोहः
७ कुलयसंग्गहो
८ भावणासत्थणिअरो
९ भावनाशास्त्रनिकरः
१० आयारसत्थणिअरो
११ आचारशास्त्रनिकरः
१२ काव्योपदेश-ज्ञातोपदेशग्रन्थनिकरौ
१३ प्रारम्भिकाणि कार्मग्रन्थिकाणि लोकप्रकाशीयानि च प्रकरणानि
१४ अन्तिमाराधनाग्रन्थाः
१५ आगमिकानि प्रकरणानि तथा प्रकीर्णकानि
१६ दार्शनिक-चर्चा ग्रन्थनिकरौः
१७ विविधविषयसंकलनाग्रन्थाः
१८ ध्यानयोग-गणित-व्याकरणशास्त्रनिकराः
१९ वैराग्य कल्पलता - १
२० वैराग्य कल्पलता - २